ॐ श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ कुर्वे कूटस्थदीपस्य
व्याख्यानान्वर्थदीपिका। १ मुमुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य त्वंपदार्थशो-
धनपूर्वकत्वात्त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रन्थमारभमाणा आचार्याः स्वय-
कूटस्थं दृष्टान्तप्रकरणत्वेन तद्दीपं प्रतिबिम्बादिभिर्लक्ष्यज्ञानाय मभिप्रेत्य तत्पद।
लक्ष्यवाच्योः कूटस्थजीवयोः सदृष्टान्तं भेदेन निर्दिशन्ति आदित्येति इत्यादिना: प्र

आदित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् कूट
स्थभासितो देहो धीस्थजीवेन भास्यते १॥ ॥

सिद्धः श्लोकस्यार्थः तेन च कुड्यसंबन्धालोकोल्लसत्तेन तेन दीपिते प्रकाशिते कुड्ये
दर्पणादित्यदीप्तिवद्दर्पणगतप्रतिफलितादित्यप्रतिबिम्बं तेन कुड्यस्य च यथादित्यरश्मिभिर्ल।
प्रकाशनमिव कूटस्थभासितः कूटस्थेनाविकारचैतन्येन भासितः प्रकाशितो दे
हो धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते अनेन सामान्यविशेषा।
न कुड्यावभासकादित्यप्रकाशवद्देहावभासकचैतन्यद्वयमस्तीति द्वि

पं. द.
कू.
२

2

इदानीं देहान्तः कूटस्थचिदाभासयोर्भेदं प्रदर्शनाय देहाद्बहिरपि चिदाभासौ ब्रह्मणी विभज्य दर्शयति घटैकाकारेति घटैकाकारधीस्था चित् घटस्यैकस्यैकाकारवृत्त्या कारो यस्याः सा घटैकाकारा तथाविधा या बुद्धिर्वर्तमाना चिदाभासो घटमेकमेवा वभासयति न तु घटस्य ज्ञातताख्यो धर्मः घटो ज्ञात इति व्यवहारहेतुर्यः स घटक

घटैकाकारधीस्था चिद्घटमेवावभासयेत्। घटस्य ज्ञातता ब्रह्मचैतन्येनावभासते ॥ ४ ॥ अज्ञातत्वेन भातोऽयं घटो बुद्ध्युदयात्पुरा। ब्रह्मणैवोपरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदा ॥ ५ ॥

ज्ञातत्वेनाविर्भावेन ब्रह्मचैतन्येन स्फुरणं भूतेनावभास्य ते प्रकाशमान इत्यर्थः नन्वज्ञातत्वावभासकचैतन्येनैव घटप्रतीतिसम्भवाद्बुद्धिः किमर्था इत्याशङ्क्य घटस्य ज्ञाततादिभेदसिद्ध्यर्थमित्याह अज्ञातत्वेनेति बुद्ध्युदयात्पुरा घटवृत्तेर्वा ब्रह्मणा वा अज्ञातत्वेन प्रकाशितो बुद्ध्युत्पत्तौ सत्यां ज्ञातत्वेन ब्रह्मणैव प्रकाश्यत इत्ययमेव भेदो ज्ञाताज्ञातयोरित्यर्थः ५ ॥

ननु तत्र दर्पणादित्यदीप्तव्यतिरेकेणालोकदीप्तिर्नोपलभ्यत इत्याशंक्यानाभ्या।
स्तां विभज्य दर्शयति अनेकेति यावदनेकबहुदर्पणजन्याः कुड्ये तत्र तत्र मंडला
कारविशेषाभावदृश्यन्ते तासां मध्ये इतरासामान्यप्रकाशरूपा या आलोकदीप्तिप्रभा
वा जनेनाभिव्यक्त्योपलभ्यते तासां दर्पणजन्यप्रभाणामसमभावे दर्पणापगमादौ
नासत्वे च स्वयमेवं प्रकाशते दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति चिदाभा

अनेकदर्पणादित्यदीप्तानां बहुसंधिषु इतराव्यंजनेनासामभावेपि प्रकाश
ते १ चिदाभासविशिष्टानां तथानेकधियामसौ संधिधियामभावे च भासय
न् प्रविविच्यताम् २ ॥ असौ इति तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चि।
त्तविविक्तानामनेकधियामनेकात्मबुद्धिवृत्तीनां यद्ज्ञानादिशब्दवाच्या
नां संधिमंतरालं जाग्रदादौ धियां तासामेव बुद्धिवृत्तीनामभावे च सुषुप्त्यादौ भा
सयन्प्रकाशमानो [illegible] त्यर्थः २ ॥

वार्त्तिककाराणामेव दृष्टौ विवक्षितेति कृतो वा एवमनुक्तायामाशंकायां तत्कृद्भिः श्रीमदाचा।
र्यैरुपदेशसाहस्र्यां तन्न ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह
ब्रह्मविदिति ब्रह्म स्विद्धफलब्रह्मचित्फलयोरिति निर्देशः एवं सति प्रकृते कि-
मायातभिन्नत्वमाह आभासइति यस्माद्ब्रह्मवित्फलयोर्भेदः सिद्धस्तस्माद्घटउदि

ब्रह्मवित्फलयोर्भेदः साहस्र्यां विश्रुतो यतः ॥ आभासउदितस्तस्मा-ज्ज्ञा
ततत्वं जनयेद्घटे तन्न ब्रह्मण्याभासमज्ञाततत्वं वदेवहि ॥ धीहत्वाभासकुं
भानां समो हि भास्यने विना कुंभमात्रफलत्वात्स्वपकस्याभा-सः स्फुरेत्
१४ ॥

टउत्पन्न आभासश्चिदाभासस्तत्र घटे ज्ञाततत्वं जनयेदुत्पन्ने तत् ज्ञात
तत्त्वं ब्रह्मत्वात्तत्त्वब्रह्मणोवबभासं भवतीति प्रसिद्धमित्यर्थः एवं ब्रह्मविदाभास
योर्भेदमनूद्य यादितविषयभेदप्रदर्शनेन तस्य रूपाणि धीहत्वाभासकुंभानामिति।
विनावृक्षचेतन्येनेत्यर्थः चिदाभासस्य कुंभमात्रनिष्ठफलत्वोपपत्तेनाभासेन

ननु तथापि चिदाभासो न कल्पनीयो ब्रह्मचैतन्यस्यैव फलत्वस्य सद्भावादित्याशं
क्याह न फलमिति ब्रह्मचैतन्यं फलं तदा चादिस्फुरणं न भवतीति किंतु तदन्यदाह मा
नादीति मानानामपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वान्फलस्य तु तदुत्पत्तिका
लीनत्वानियमादिति भावः नन्विदं परागर्थप्रमेयेष्वपि तुल्यादित्याशंक्य वार्तिककार आह

न फलं ब्रह्मचैतन्यं मानानामपि स्मृतं ततः ॥१॥ परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥२॥ इति वार्तिककारेणापि चिदाभासस्यैव विव
क्षितत्वात् ॥ ॥ ॥ ॥

मित्याशंक्य तत्तद्धि वक्तव्यानभिज्ञस्येदं चोद्यमिति परिहरति परागर्थेति स्पष्टश्चायम
र्थः परागर्था बाह्या घटादयः पदार्थास्तेषु प्रमेयेषु प्रमाणानि विषयेषु स्वस्य प्रमा
णफलत्वेनाभ्युपेता संविदस्ति सैवेहास्मिन् शास्त्रे वेदान्तोक्तिप्रमाणतः वेदान्तवा
क्यलक्षणप्रमाणतो [illegible] ब्रह्मचैतन्यमहदृशांसिद्धमाभासः प्रमा

नन्वदेहद्वयेऽपि चिदाभासव्याप्यघटाकारवृत्तिवदंतर्विषयगोचरवृत्त्यभावात्क
थंतद्व्यापकश्चिदाभासोऽभ्युपगम्यत इत्याशंक्यांतर्विषयगोचरवृत्त्यभावेऽप्यहमा
दिवृत्तिसद्भावात्तद्व्यापकश्चिदाभासोऽभ्युपगंतव्य इति सदृष्टांतमाह । अहं
वृत्ताविति अहमादिवृत्तीनामेव चिदाभासभास्यत्वं सदृष्टांतमप्रपंचनेन स्पष्टा
यति स्वमात्रमिति एवं चिदाभासविवृत्त्या प्रकूटस्थस्वरूपमभिधातुं तदपेक्षितं दर्शयति या

अहंवृत्तौ चिदाभासः कामक्रोधादिकास्वपि । संव्याप्य वर्तते तप्ते लोहे वह्नि-
र्यथा तथा ॥ १८ ॥ स्वमात्रं भासयेत्तप्तं लोहं नान्यत्कदाचन । एवमाभाससहिता
वृत्तयः स्वस्वभासिकाः ॥ १९ ॥ क्रमाद्विच्छिद्य विच्छिद्य जायंते वृत्तयोऽखिलाः । स
र्वा अपि विलीयंते सुप्तिमूर्छासमाधिषु ॥ २० ॥ संधयोऽखिलवृत्तीनामभावा
श्चावभासिताः । निर्विकारेण येनासौ कूटस्थ इति चोच्यते ॥ २१ ॥ तेन वृत्त्यभा

वावसरं दर्शयति क्रमादिति भवत्वेवं समाध्याद्यवस्थासु वृत्तिविलयोऽनेन कथं कूट
स्थावगतिरित्याशंक्य वृत्त्यभावसाक्षितेनासाववगम्यत इत्याह संधय इति वृत्ति

ननुकूटस्थचिदाभासयोरुभयोरपिचित्त्वेनसमानेप्येककूटस्थत्वमपरस्यत्वकू
टस्थत्वमित्येतत्कुतइत्याशंक्यचिदाभासनिष्ठयोर्जन्मनाशयोरनुभूयमान
त्वादस्याकूटस्थत्वमितरस्याविकारस्यविकारित्वप्रमाणाभावात्कूटस्थ

द्विगुणीकृतचैतन्येजन्मनाशानुभूतितः अकूटस्थंतदन्यत्तुकूटस्थम
विकारतः २४ अन्तःकरणतद्वृत्तिसाक्षीत्यादावनेकधा कूटएवसर्वत्र
पूर्वाचार्यैर्विनिश्चितः २४ ॥

त्वमित्याह द्विगुणीति चिदाभासव्यतिरिक्तंकूटस्थमात्मनोऽभ्युपगमः स्वक।
पोलकल्पितइत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वान्नैवमित्याह अन्तःक
रणेति अन्तःकरणतद्वृत्तिसाक्षीचैतन्यविग्रहः आनन्दरूपः सत्यः सन् किंना
त्मानंप्रपद्यसे इत्यादावित्यर्थः २५ ॥ ॥

पं ८
अ

असंगमस्य कृत्स्नस्य स्वच्छेदमात्रेणाजीवत्वं तन्न घटते। न्यायात्तिरसंगादितिमपविद्धानि अवि
ति उद्धितद्वयोः स्वच्छयाभ्यावेशमप्रकाते न क्रमति। उक्तं स्वच्छत्वं परिच्छेदप्रयोजकं मभ
वतीत्याह तथास्तीति उक्तमर्थं दृष्टान्तेन स्पष्टयति प्रस्थेति सरूकांस्यजन्योः प्रस्थ

अणवमंशः परिच्छेदमात्राज्जीवेयदि अन्यथाघटकुम्भाधारावितिक्रियस्य जीवता २८ न कृ
असद्दृशीबुद्धिः स्वच्छतादितिचेन्नथा अस्तु नाम परिच्छेदः किं स्वच्छेन भवेन्नव २९
प्रस्थेन तदुज्जन्येन कांस्यजन्येन वा नहि विक्रेतव्यतण्डुलादीनां परिमाणं विशिष्यते
तुः परिमाणविशेषोपि प्रतिबिम्बविशिष्यते कांस्यपात्रितदावतद्वाषाभासो भवेद्।
लाभत ३१

णोः स्थिते स्वच्छत्वेन तण्डुलपरिमाणेन्यूनाधिकभावेद्वे तन्नाभवतत्रुत्यर्थः
कांस्यप्रस्थे तण्डुलपरिमाणाधिकाभावेपि प्रतिबिम्बलक्षणमाधिक्यमस्तीत्याशंक।
नहि तद्वावपि चिदाभासो भवपि चिदाभासोभवतैवांशिकत्वास्यादित्याह

प्र

कूटस्थातिरिक्तश्चिदाभासोऽपि नैवेष्टोऽस्तीत्याह आत्माभासेति आत्मा चात्माभासश्च आत्मात्माभासौ आत्मात्माभासयोरित्युक्तलक्षणयोः मुखाभासाश्रयाऽन्यत्रापि न यान्तव प्रसिद्धमाभासेन मुखोपलक्षितविम्बाश्रयोरदर्पणादिरस्तीति चयया यथा प्रत्यक्षेणावगम्य नेपरमात्मकूटस्थाभाससम्प्रयोगः करणादिरिति ब्रयोऽपि शास्त्रयुक्तिभ्याम वगम्यन्ते एवमात्मकूटस्थेऽन्यथा: अत्र चाभासग्राहेन कूटस्थातिरिक्तश्चिदाभा।

आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा । गम्यन्ते शास्त्रयुक्तिभ्यां चिदाभासश्च वीक्षितः २६ बुद्ध्यवच्छिन्नकूटस्थो लोकान्तरगमागमौ कर्तुं शक्तो घटाकाशवदा भासेन किं वद २७

सावर्णीन्त इति भावः ननु आभासादीनि विवक्षितः साक्षी बुद्धेः सा क्षीति बुद्धिमात्रेण प्रतिपादकशास्त्रं रूपं रूपं प्रतिरूपो बभूवेति विद्यमा नप्रतिपादिकं युक्तिस्तु कूटस्थ एव बुद्ध्यवच्छिन्नो घटाकाशवद्देहाद्देहान्तरं लोकान्तरस्य गमनागमने कर्तुं शक्तो निर्विकारित्वात् रूपाद्यभावेः एवमस्य कर्तृभावः नतु चिदाभासमात्रेणेति बुद्ध्यवच्छिन्नेति स्वामिन् कल्प्यमानया तु ध्यानविकारित्वाभ्या

नन्वेवं न हि देहातिरिक्तो जीवोपि न सिद्ध्येदिति प्रतिबंद्या परिहरति स्वात्ममेवेति २४
प्रतिबंदीमाचष्टे देह इति देहव्यतिरिक्ताया बुद्धेः सविज्ञानो भवतीत्यादिश्रुति
सिद्धत्वान्नासत्वमिति भावः ननु श्रुतिवलाद्देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत्त
र्हि प्रवेशश्रुतिवलात्तद्व्यतिरिक्तः श्रीरामास्तेयमभ्युपेय इत्याह तथेति ननु दे

देहमतेपि बुद्धेः प्रवेशः शास्त्राद्दृष्टस्तथा सति बुद्धेरन्यः श्रीरामस्य प्रवेशः श्रुति
प्रस्तुतः २५ जीवकस्य प्रवेशः श्रुतैतरीयेपि च पृथक् स्वात्मप्रवेशं सकृ।
त्सप्रविश्येति सोपठते २६ कथं त्विदस्माद्देहमहन्तेस्यादितीरणात् विश्व
यमर्हे सोमानप्रविष्टस्सदात्मपं २७ ॥ ह्युपाधिकस्यैव प्रवेशोपकल्प्यते नत

स्येति शंकते जीवकस्येति तैत्तरेयश्रुतौ बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणान्मै
वमिति परिहरति तैत्तरीयेति तां श्रुतिमर्थतः पठति कथमिति स्वयं परमा
त्मास्माद्देहमत्ताणिवदेहस्थाद्देदारणैः सहरवतत्त इति स्माद्देहमिदंतत्र।

प्रतिबिंबांगीकारे चिदाभासः कथमङ्गीकृतः स्यादित्याशंक्य प्रतिबिंबाभासशब्दा भ्यामभिधेयस्यार्थस्यैक्यादित्याह ईषदिति प्रतिबिंबस्याभासत्वं कथमित्याशंक्या भासलक्षणयोगादित्याह बिंबेति हि यस्मात्कारणात्प्रतिबिंबो बिंबलक्षणाद्र हितो बिंबवद्भासते तेनाबिंबाभास इति भावः आभासलक्षणयोगित्वमेव स्पष्टयति

ईषद्भासनमाभासः प्रतिबिंबस्तथाविधः बिंबलक्षणहीनः सन्बिंबवद्भासते स हि ससंगत्वविकाराभ्यां बिंबलक्षणहीनता स्फूर्तिरूपत्वमेतस्य बिंबवद्भासनं विदुः नहि धीभावभावित्वादाभासोऽस्ति धियः पृथक् इति चेद ल्पमेवोक्तं धीरप्येवं स्वदेहतः ३५॥

ससंगत्वेति एतस्य चिदाभासस्य ससंगत्व विकाराभ्यां बिंबभूतासंगाविकारिचैतन्यलक्षणहीनत्वं स्फुरणरूपत्वं बिंबव द्भासनमित्यर्थः हेतुलक्षणरहितो हेतुवद्भासमानो हेत्वाभासः नाहेत्वाभासो यथा तद्वदित्यर्थः पूर्वोक्तचिदाभासस्याप्रयोजकत्वमाशंक्य दानीत

पं॰द॰
अ॰
५

अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मेति श्रुत्या कूटस्थस्यात्मनो विभिन्नः प्रदर्शि
तइत्याह अविनाशीति मात्रासंसर्गस्त्वस्य भवतीति श्रुत्याविनाशित्वेहेतुम

अविनाश्यप्रमात्मेति कूटस्थः प्रविवेचितः
मात्रासंसर्गजत्वेनमसंगतत्वस्य कीर्त्तनात् ५

संगतत्वं चोक्तवानित्याह मात्रेति मीयंतेति मात्रा देहादयस्तैरभिरस्यात्मनः
संसर्गो भवतीत्यर्थः ५ ॥ ॥ ॥ ॥

५

नन्वसंगस्यात्मनः प्रवेशोऽयुक्त इति शंकते कथमिति इदं चोद्यमस्माकमपि समान

मित्याह सर्वेति सोपाधिकत्वेनौपाधिकत्वान्न दोष इत्याशंकायां परिहारः प्रवेशोऽपि

समान इत्याह औपाधिकत्वमिति अनयोरौपाधिकत्वे हेतुश्रुतिसमर्थनमाह विनाशश्रुति ३८

प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यो

कथं प्रविष्टोऽसंगश्चेत्तत्सृष्टिर्वास्य कथं वद औपाधिकत्वं तयोरस्तु विनाशश्रुतिसम

स्तयोः ३८ समुत्थायैव भूतेभ्यस्तान्येवानुविनश्यति विनष्टमिति मैत्रेय्यै या

ज्ञवल्क्य उवाच हि ३८ ॥

औपाधिकरूपस्य विनाशश्रुतिं भूतेभ्य उपाधिभ्यः समुत्थाय जीवत्वाभिधानं प्राप्य

तान्येव देहादीनि विनश्यंतमनु विनश्यति तेषु विनष्टेषु तत्कृतं जीवत्वाभिधानं

जहाति एवं प्रकारे [illegible] मैत्रेय्यै उवाच उक्तं

पं. ८.
१०

गाथायां समानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्त्तिककारैः स्पष्टीकृतोऽभिहितस्तत्र समर्थनं तद्वाक्योदाहरणपूर्वकं दर्शयति सोऽयमिति स्थाणुरेष पुमानित्यस्मिन्वाक्ये पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्त्यते यथा एवमहं ब्रह्मास्मीतिबोधेनाहंबुद्धिः कर्त्ताहमस्मीत्येवमादिरूपा वा सर्वापि निवर्त्यत इति एवमन्वयेन

योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव ब्रह्मास्मीति धियाशेषा ह्यहंबुद्धिर्निवर्त्यते नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टीकृतेति समानाधिकरणस्य बाधार्थत्वमतोऽस्त्वतः ४४॥

प्रकारेणाचार्यैर्वार्त्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टीकृतमिति फलितमाह अतोऽस्त्विति अतः कारणाद्ब्रह्माहमस्मीतिवाक्येन सामानाधिकरण्यस्य बाधार्थत्वमस्त्वित्यर्थः ४४ ॥ ॥

१०

ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुत्या सोपाधिकस्याप्यवि
नाशित्वप्रतिपादनादुक्ताशंका नस्यादित्याशंक्य तदेहान्तरप्राप्तिविषयतया नात्यन्तिकनाशाभा
वपरत्वमित्याह जीवापेतमिति जीवापेतं जीवरहितं जीवेन त्यक्तमिति यावन्नना
वयवस्य जीवो न म्रियत इत्यर्थः ननु जीवस्याविनाशित्वेऽहं ब्रह्मास्मीत्यविनाशिब्रह्म

जीवापेतं वाव किल शरीरं म्रियते न सः इत्यत्र न विमोक्षोऽर्थः किं तु लोकांतरे
गतिः ५१ नाहं ब्रह्मेति बुध्येत स विनाशीति चेत्तन्न । सामानाधिकरण्यस्य ।
बाधायामपि संभवात् ५२ ॥

तादात्म्यज्ञानं न घटत इति शंकते नाहमिति विनाशी स जीवोऽहं ब्रह्मेति ब्रह्मत्वे
प्रणत्माने न बुध्येत न जानीयात् विनाश्यविनाशिनोरेकत्वविरोधादिति चेन्न
त्वसमानाधिकरण्याभावेऽपि बाधायां सामानाधिकरण्यसंभवाज्जीवबाधेन ब्र
ह्मभावोऽवगंतव्य इत्याह तदिति ५२ ॥ ॥

नन्वेवमपि कृतिपुत्रार्थायां सामानाधिकरण्यं न कापि दृष्टमित्याशंक्य सर्वं ह्येतद्ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं दृष्टमतो बाधितं तद्विषयमित्याह सर्वमिति ननु तर्हि विवरणाचार्यैर्बाधायां सामानाधिकरण्यं कुतो निराकृतमित्याशंक्य नैवं तद्वाक्येन कूटस्थस्य विवक्षितत्वादित्याह सामानाधिकरण्यस्येति कूटस्थ।

सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् । अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ॥ ४५ ॥ सामानाधिकरण्यस्य बाधार्थत्वं निराकृतम् । उपपत्ते विवरणे कूटस्थात्मविवक्षया ॥ ४६ ॥ शोधितत्वंपदार्थो यः कूटस्थो ब्रह्मरूपताम् । तस्य वक्तुं विवरणे तथोक्तमितरत्र न ॥ ४७ ॥

तद्विवक्षयेत्युक्तमर्थं विवृणोति शोधितइति शोधित इति शोधितो बुद्ध्यादिभ्यो विवेचितस्त्वंपदलक्ष्योऽयः कूटस्थो वदमानस्तस्य ब्रह्मरूपतां ब्रह्मादिलक्षणब्रह्मरूपतां वक्तुं विवरणे पुत्राधामसमानाधिकरणं निराकरणं कृतमितरत्र सामानाधिकरण्यमङ्गीकृतमि

ननु जगदधिष्ठानचैतन्यस्यैकत्वात्तत्त्वंपदार्थभेदाभावेत्तत्त्वंपदार्थयोः पौनरुक्त्य
मित्याशंक्य तयोरौपाधिको भेदो वास्तवमैक्यमित्याह जगदिति जगदिति तदे
कदेशश्चेति समारोपस्य समारोप्यस्य तत्त्वाख्या जातेत्येकत्वं चेतनं ननु चिदाभास
स्य शुक्तिकारजतादिवदधिष्ठानारोप्याभ्यामपृथग्भूतत्वान्नतु एवं भानं कथमारोप्य

जगत्तदेकदेशाख्यसमारोप्यस्य भेदतः तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वे
कता चितः ॥५१॥ कर्तृत्वादीन्बुद्धिधर्मान्स्फूर्त्याख्यां चात्मरूपतां दधद्विभाति
पुरत आभासोऽतो भ्रमो भवेत् ॥५२॥ का बुद्धिः कोऽयमाभासः को वात्मात्र ज
गत्कथम् इत्यनिर्णयतो मोहः सोऽयं संसार उच्यते ॥५३॥

तत्रभित्याशंक्याह कर्तृत्वादीनिति बुद्ध्युपाधिकत्वादारोप्यं कर्तृत्वभोक्तृ
त्वप्रमातृत्वादीन्स्फुरणलक्षणामात्मरूपतां च दधत्पुरतो भाति सोऽयं प्रतिभा
सतः तत्राभासः कल्पितः स्फूर्तिः अन्यथा भ्रमः किं कारणमित्याकांक्षायां

उदाहृतपुराणवाक्यस्थतात्पर्यमाह इतीति इत्येवंप्रकारेणमुक्तसंहितादिषुपु-
राणेषु जीवेशत्वादिकल्पनारहितः केवलोऽद्वितीयः स्वप्रभः स्वयंप्रकाशश्चैतन्य-
रूपः शिवः कूटस्थो विविच्यते इत्यन्वयः जीवेशत्वादिराहित्यं तत्र कथमित्याशं-
क्यास्मिन्नर्थे मायिकत्वप्रदर्शनादित्याह मायेति जीवेशावाभासेन करोति

इति शैवपुराणेषु कूटस्थः प्रविविच्यते। जीवेशत्वादिरहितः केवलः स्वप्र-
भः शिवः ५५ मायाभासेन जीवेशौ करोतीति श्रुतत्वतः। मायिकावेव जी-
वेशौ स्वच्छौ तौ काचकुम्भवत् ६ ॥

मायाचाविद्या च स्वयमेव भवतीति श्रुति-
र्मायाविद्याधिष्ठानयोश्चिदाभासयोर्मायिकत्वं प्रतिपादयतीति भावः मायिक-
त्वेतयोर्देहादिभ्यो वैलक्षण्यं न स्यादित्याशंक्य पार्थिवत्वाविशेषेपि काचकुम्-
भस्य घटादिभ्यो वैलक्षण्यमिव तयोरपि स्यादित्याह स्वच्छौ ताविति ६ ॥

२३

13

स्वाभासत्यस्य जगतस्त्वालंबनत्वेनाधिष्ठानत्वेन सत्यः जडस्य सर्वस्य साधकत्वेनाव।
भासकत्वाच्चिद्रूपः सर्वदा प्रेमविषयत्वादानंदरूपः आनंदरूप इति सर्वार्थावभा
सकत्वेन सर्वार्थानात्मस्फुरणरूपमुच्यते अत्र चेदमपि प्रेते विमतः शिवोऽहंत्वादिस्वो
भियते रूप्यादिसाक्षित्वात् यद्रूप्यादिस्वो नाभिधीयते तन्न रूप्यादिसाक्षी न भवति।
विमतः सत्योऽभवितुमर्हति मिथ्याधिष्ठानत्वादसत्यस्यानधिष्ठानशुक्तिवत् वि

असत्यालंबनत्वेन सत्यः सर्वजडस्य तु साधकत्वेन चिद्रूपः सदा प्रेमास्पद
त्वतः ५७ आनंदरूपः सर्वार्थसाधकत्वेन हेतुना सर्वसंबंधवत्वेन संपूर्णः शि
वः संशितः ५८ ॥

मतश्चिद्रूपः जडमात्रावभासकत्वात् यत्तु चिद्रूपं न भवति
तत्सर्वं जडावभासकमपि न भवति यथा जडादिः ३ विमतः परिपूर्णः सर्वसंबंधि
त्वाद्गगनवत् सर्वसंबंधित्वं च सर्वार्थसाधकत्वेन विमतः सर्वसंबंधवान् सर्वाव
ता भासकत्वात् यः सर्वसंबंधवान्न भवति स सर्वावभासकोऽपि न भवति यथा दीपः

ईश्वरस्यापिमायिकत्वेनस्वजीववदसर्वज्ञत्वादिकंस्यादित्याशंक्यसर्वज्ञत्वादि
कमपिमायैवकल्पयिष्यतीत्याह सर्वज्ञत्वादिकमिति तत्रोपपत्तिमाह धर्मि
णमिति ननुजीवेशयोरिवकूटस्थस्यापिमायिकत्वप्रसङ्गेनेतिशंकते कूटस्थे

सर्वज्ञत्वादिकंचेशेकल्पयित्वाप्रदर्शयेत धर्मिणंकल्पयेद्यास्याः को
भारोपयमांकल्पने कूटस्थोपिनिशंकास्यादितिचेन्मातिशंक्यतां कूट
स्थमायिकत्वेनप्रमाणंनहिविद्यते ६५ वस्तुत्वंघोषयंत्यस्यवेदांताः स
कलाअपि सकलत्नरूपंवस्त्वन्यन्नसहंतेत्रकिंचन ६६

पीति प्रमाणाभावान्नैवमिति परिहरति मातिशंक्यतामिति कूटस्थस्यमा
यिकत्वेपिप्रमाणेनोपलभ्यतइत्याशंक्यस्फुतयः सर्वोपिप्रमाणमित्याह व
स्तुत्वमिति अत्रकूटस्थस्यपारमार्थिकत्वेप्रतिपक्षभूतमन्यवस्तुकिंचनन

ननु स्वच्छकाचकुंभयोर्मृत्पिण्डयोर्भेदात् हेतोर्नवैलक्षण्यमुचितं न तु जीवेश्वरभेदहेतोर्मा
यायाः एकत्वात्तयोर्जगतोर्वैलक्षण्यमनुचितमित्याशंक्यान्नजन्ययोर्देहमनसो
र्यथा वैलक्षण्यं न तद्वदित्याह अन्नजन्यमिति भवनकाचादिवत्स्वच्छत्वे चित्वं न कु

अन्नजन्यं मनो देहात्स्वच्छं यद्वत्तथैव तौ मायिकावपि सर्वस्मादन्यस्मात्स्व
च्छतां गतौ ६१ चिद्रूपत्वं च संभाव्यं चित्त्वेनैव प्रकाशनात् सर्वकल्पनशक्ता
याः मायाया दुःशकं नहि ६२ अस्मन्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजे
त् महामाया सृजत्येतावित्याश्चर्यं किमत्र ते ६३ ॥ ॥ श्रीराम ॥

तत्वाशंक्यानुभवादित्याह चिद्रूपत्वमिति चित्त्वेन प्रकाशनमपि मायापि चेन्न
उपपन्नमित्याशंक्य तस्या दुर्घटकारित्वादुपपन्नमित्याह सर्वेति उक्तमर्थं कैमु
तिकन्यायेन द्रढयति अस्मन्निद्रेति ६३ ॥ ॥ ॥

पं. द.
श्रु.
१५

कृतस्य स्वज्ञानमात्रनिवर्त्यत्वाभावः कुतोऽवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभि
प्रेत्य तद्दर्शकं पठति न निरोध इति ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्र
तिपादनं किमर्थमित्याशंक्याज्ञानस्यागोचरस्यात्मनो बोधनायेत्याह श्रु

न निरोधो न चोत्पत्तिर्न बद्धो नापि साधकः न मुमुक्षुर्न वै मुक्त इत्येषा पर
मार्थता ॥ ७१ ॥ अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा जीवमीशं जगद्वापि
समाश्रित्य प्रबोधयेत् यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि सा सै
व प्रक्रियेह स्यात् साध्वीत्याचार्यभाषितं ७२ ॥

वाक्यान्तरमेति ननु तत्त्वस्यैकरूपस्य श्रुतिबोध्यत्वे श्रुतिषु विज्ञानं कुतो दृश्यत इ
त्याशंक्य न तत्त्वविज्ञानस्य रूपविन्यस्य बोधनप्रकारस्तदपि वा प्रयुक्त चिन्त्य
वेषम्यात् समारब्धा पुंसां व्युत्पत्तिमित्याह यया ययेति ७३ ॥

१५

वा

15

ननु कूटस्थस्य जीवेशयोश्च वास्तवत्वात् वास्तवत्वसाधने फलं यद्यदपथं तेनैतत्कैः किंच हृदि पिशाचपन इत्याशंक्य समुद्धरणं श्रुत्यर्थं कीदृशोनुसंधेय इत्यत आह वि शदीकरणाय यत्कूटस्थत्वात्तत्कोपन्यास इत्यत आह श्रुत्यर्थेति ततः किमित्यत आह तस्मादिति समुद्धरणं श्रुत्यर्थः कीदृशोनुसंधेय इत्यत आह श्रुतावेति स्कृतिष्व

श्रुत्यर्थं विशदीकुर्मो न तर्कात् वच्मि किंचन तेन तार्किकशंकानामत्र कोवसरो वद ६७ तस्मात्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत् श्रुतौ तु मायया जीवेशौ करोतीति प्रदर्शितः ६८ ईक्षणादिप्रवेशान्ता सृष्टिरीशकृता भवेत् जाग्रदादिविमोक्षान्तः संसारो जीवकर्तृकः ६९ असंग एव कूटस्थः सर्वदा नास्य कश्चन भवत्यतिशयस्तेन मनस्येवं विचार्यताम् ७० जीवेशयोर्मायिक त्वमीक्षणादिप्रवेशान्तायाः सृष्टेरीश्वरकर्तृकत्वं जाग्रदादिमोक्षान्तस्य संसारस्य जीवकर्तृकत्वं कूटस्थस्य असंगत्वादिकं स्मृतिज

श्रुत्यर्थस्यैकरूपत्वे तत्प्रतिपादकानामेव कुतो विप्रतिपत्तिरित्याशंक्य श्रुतितात्प
र्यबोधशून्यानामेव विप्रतिपत्तिः न तु तद्विदामित्याह श्रुतितात्पर्यमिति तर्हि विवे
किनां निश्चयः कीदृश इत्याकाङ्क्षायामाह मायामेघ इति ग्रंथाभ्यासफलमाह

श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः। विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानं
दवारिधौ ७४ मायामेघो जगन्नीरं वर्षत्वेष यथा तथा। चिदाकाशस्य नो
हानिर्न वा लाभ इति स्थितिः ७५ इमं कूटस्थदीपं योऽनुसंधत्ते निरंतरं स्वयं
कूटस्थरूपेण दीप्यतेऽसौ निरंतरम् ७६ इति कूटस्थदीपस्तृतीयः ३ ॥

इममिति इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्य।
मुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचितायां कूटस्थदीपव्याख्या।
समाप्ता ३ ॥ ॥

ननूदाहृतश्रुतिवाक्ये आत्मनः कारणत्वं श्रूयते नानंदस्येत्याशंक्यैतत्प्रतिपादकं तदी
यमेवानंदाद्ध्येव खल्विमानि भूतानि जायंते इत्यादिवाक्यमर्थतः पठति आनंदाद्धेवेति या
वत्यानेकाल्पितमाह इतीति अत्रेदमनुमानं सूचितं विमतं जगदानंदान्न भिद्यते तत्कार्य
त्वात् यत्तत्कार्यं तत्ततो न भिद्यते यथा मृत्कार्यं घटादि मृदो न भिद्यत इति कुलालादुत्पन्नस्य घटस्य त
तो भेददर्शनादनैकांतिकता हेतोरित्याशंक्य कुलालस्य निमित्तकारणत्वाद्धेतोश्चानं
दस्योपादानत्वसमर्थनान्मैवमित्याह कुलालादिति एवमानंदो मृद्वद्घटस्योपा

आनंदादेव तज्जातं तिष्ठत्यानंद एव तत् आनन्द एव लीनं चेत्युक्तानंदात्कथं पृथक्
४ कुलालाद्धट उत्पन्नो भिन्न इति न शंक्यतां मृद्वदेष उपादानं नो निमित्तं कुला
लवत् ४ स्थितिलयौ घटस्य कुलाले स्तो न हि क्वचित् दृष्टौ तौ च मृदि तद्वत्सानं दे

दानमुपादानकारणं कुलालवत् निमित्तकारणं न भवति न श्रुतेरिति ५ ॥
ननु कुतो नोपादानत्वं कुलालस्येत्याशंक्य स्थितिलयपायात्रूपोपादानलक्षणाभावादि
त्याह स्थितीति हि यस्मात्कारणाद्धटस्य स्थितिलयौ कुलालाधारौ न भवतो नोपादानत्व
मिति शेषः कुत्र तर्हि तावित्यत आह दृष्टाविति तौ घटस्य स्थितिलयौ तदुपादानभूताया
मृद्येव दृष्टौ प्रसिद्धौ उपलभ्यौ भवतस्तद्वत्प्रकृते किमायातमित्यत आह तद्वदिति त

ॐ श्रीगणेशाय नमः ॐ नत्वानंदात्मविद्यो ब्रह्मानंदो विद्यामलं तथा विषयानंद इति प्रथमः

ध्याय आनंदत्रयमेव प्रतिज्ञाय द्वितीयाध्याये तदानीं क्वात्मानं निरूपयन् द्वितीयो ज्ञा। २

यत इत्याशंक्याह योगानंद इति यथा प्रतिज्ञातस्यैव ब्रह्मानंदस्य योगानंदमात्मानात्कार

विषयत्वेन योगानंदत्वं निरूपाधिकत्वेन निजानंदत्वं च व्यवहृतं तथात्मस्यैव गौणा मिथ्या

मुख्यात्मविवेचनेनावगम्यत्वविवक्षयात्मानंदत्वमभिहितमिति भावः नतु सजातीया

द्गौणात्मनः पुत्रभार्यादेः मिथ्यात्मनो देहादेः विजातीयादाकाशादेश्च विभिन्नस्य हृय

योगानंदः पुरोक्तो यः स आत्मानन्द इष्यतां कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेच्छृणु:

आकाशादिस्वदेहांतं तैत्तिरीयश्रुतीरितं जगन्नास्त्यन्यदानंदादद्वैतब्रह्मता ततः २

स्यात्मानंदस्य प्रथमाध्यायोक्ताद्वितीययोगानंदरूपतानसंभवतीति शंकते कथमि

ति सजातीयत्वेनाभिमतस्य गौणात्मनः पुत्रादेः मिथ्यात्मनो देहादेश्च तैत्तिरीयश्रुत्य

भिहितजगदंतःपातित्वादाकाशादेश्च जगतः आत्मानंदातिरेकाभावात्वाद्वितीयत्व

स्वरूपतास्य चेत्युक्तं इति संबद्धमानमनुवमाह श्रुतिरिति आकाशादिति तस्माद्वा एतस्मा

दात्मन आकाशः संभूत इत्यादिकया तैत्तिरीयश्रुत्याभिहितं जगत्कारणभूतादात्मा।

नंदायतः पृथक् न [illegible] दद्वितीयब्रह्मत्वमित्यर्थः २ ॥

पं॰ द॰
अ॰
२

विवर्त्तलक्षणमाह अवस्थेति तत्त्वादस्पृष्टस्यान्यदृष्ट्या हि तत्त्वादप्रच्युतानां पूर्वावस्था
मपरित्यज्यैवावस्थान्तरभानं विवर्त्तः उदाहरति रज्ज्विति यथा रज्ज्वात्मनावस्थितस्यैव द्रव्य
स्य सर्पात्मनावभासनं ननु विवर्त्तमानस्य रज्ज्वादेः सावयवत्वदर्शनान्निरंशस्यापि न तद्युक्त
मित्याशंक्य निरवयवे गगनादावपि तद्दर्शनान्मैवमित्याह निरंशेपीति असौ विवर्त्तो व्यो
म्नि गगने तलमयो मुखेन नीलकटाहत्वस्य तलमालिन्यमीलवर्णत्वे तयोः कल्पनाद्धेतोः

अवस्थान्तरभानं तु विवर्त्तो रज्जुसर्पवत् निरंशेप्यस्त्यसौ व्योम्नि तलमालिन्यक
ल्पनात् ॥ ततो निरंशआनन्दे विवर्त्तो जगदिष्यतां मायाशक्तिः कल्पिका स्यादैन्द्रे
न्द्रजालिकशक्तिवत् १० ॥

शशविषाणवन्निर्विशेषारोपासम्भवादित्यर्थः फलितमाह त
त इति ततो निरंशेपि विवर्त्तसंभवाज्जगन्निरंश आनन्दे विवर्तकल्पितमित्यङ्गीकार्यमि
त्यर्थः ननु अद्वितीयानन्दे जगत्कल्पनमनुपपन्नं कल्पनाहेतोरभावादित्याशंक्याह मा
येति शक्तेः कल्पकत्वं कुत्र दृष्टमित्यत आह ऐन्द्रजालिकेति यथैन्द्रजालिकनिष्ठाया
मणिमन्त्रादिरूपाया मायाशक्तेर्गन्धर्वनगरादिकल्पकत्वं तद्वदित्यर्थः ११ ॥ ॥

18

२

आनंदरूपस्याभिमतंतथाचउपादानत्वंवक्तुंतदवांतरभेदमाह उपादानमिति तत्रविवर्तिपदंव
शेषयितुमितरेपदेनोरूपयति तत्रेति आत्माकारंभपरिणामपदेनोनिरंशेनिरवयववस्तुनि
नावकाशिनो आवकाशवंतौनस्भवतः ६ तयोरनवकाशित्वमेवदर्शयितुंतावदारंभवा
दिनोमतमनुवदति आरंभेति आरंभवादिनोवैशेषिकादयः अन्यस्मात्कार्योपेतपान्यस्मा
त्कारणादन्यस्यकारणापेदयान्यस्यकार्यस्योत्पत्तिमूचिरे उक्तं च तंतुभ्यः पटवदित्याह

उपादानेक्रियाभिन्नेविवर्तिपरिणामिच आरंभकंचतर्कोत्योनिरंशेनावकाशिनो
६ आरंभवादिनोन्यस्मादन्यस्योत्पत्तिमूचिरे तंतोःपटस्यनिष्पत्तेर्भिन्नौतंतुपटौखलु .
७ अवस्थांतरतापत्तिरेकस्यपरिणामिता स्यात्क्षीरंदधिमृत्कुंभः सुवर्णंकुंडलंयथा

तंतोरिति निष्पत्तेरुत्पत्तेर्दर्शनादितिभावः एतावताकथंकार्यकारणभेदसिद्धिरित्यत
आह भिन्नाविति अन्यस्मात्कारणाद्धि उत्पद्यतेपरिणामाहि उद्धार्थः क्रियादतादृशीतिभा
वः इदानींपरिणामस्वरूपमाह अवस्थेति एकस्यैववस्तुनः पूर्वावस्थात्यागपूर्वकस्य
मवस्थांतरप्राप्तिपरिणाम इत्यर्थः तमुदाहरति स्यादिति यथाक्षीरमृत्सुवर्णादीनांदध्या
दिव्यवहारयोग्यतापत्तिरन्यत्रव्याकादिव्यवहारयोग्यतापत्ति ७ ॥ ॥

पं.द.
अं. ३

19

इत्थं लौकिकशक्तिस्वरूपतः प्रमाणान्तरेणापि न संभवेदानीं मायाशक्तिसद्भावे तेध्यानयोगा-
नुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति निर्धारणात्मा अनयोपनिषद्वाक्यमर्थतः पठति।
देवात्मेति मुनयः कारणस्वभावादिषु कारणत्वादिषु दोषदर्शनात् कोऽन्यो जगत्कारणमिति ध्या-
यान्तो ध्यानयोगमास्थिताः स्वाधिकारिणो देवात्मशक्तिं देवस्य द्योतमानस्य स्वप्रकाशचिद्रूप-
स्यात्मनः परमात्मनः अभिन्नस्य ब्रह्मणः शक्तिं मायारूपां स्वगुणैः स्वकार्यभूतैः स्थूलसूक्ष्मश-
रीरैर्निरन्तरां गूढामाहृतामविदन् सा नान्यत्र लब्धतत्त्वं यत्तः तस्यामेवोपनिषदि स्थितं पद्य।

देवात्मशक्तिं स्वगुणैर्निगूढां मुनयोऽविदन् परास्य शक्तिर्विविधा क्रियाज्ञानब-
लात्मिका १३ इति वेदवचः प्राह वशिष्ठस्तथाब्रवीत् सर्वशक्ति परं ब्रह्म नित्यमा-
पूर्णमद्वयम् १४ ॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति वाक्यं
तदर्थतः पठति परास्येति अस्य ब्रह्मणः परा उत्कृष्टा मूला शक्तिर्विविधा श्रूयते इति।
वाक्यशेषः विविधत्वमेवाह क्रियेति क्रियाज्ञानेषु प्रसिद्धे बलमिच्छाशक्तिः ज्ञानक्रिया
शक्तिसाहचर्यात् क्रियादिशब्दः प्रत्येकमात्मस्वरूपं यस्याः सा क्रियाज्ञानबलात्मिका १३
इदं वाक्यद्वयं श्रुतत्वामित्यनन्तरमाह इतीति न केवलमायाशक्तिः श्रुतिसिद्धा किन्तु स्मृति-
सिद्धापीत्याह वशिष्ठोऽपि यथा श्रुतिविहितां मायाशक्तिं [illegible]

नन्वानेदाहस्यातिरिक्ता या मायाया अग्न्युपरामे दहनापत्तिविपाकोऽन्वस्यान्धनिर्वचनीयत्वेनान्त
त्ववत्कमनत्रस्त्ववदप्यमायापयालौकिकाग्न्यादिगतशक्तेस्तावदुदेत्वानिर्वचनीयशक्यत्वद्
शयति शक्तिरिति याक्तेरग्न्यादिनिष्ठास्फोटादिजनिकाशक्ताद्ग्न्यादिस्वरूपात्पृथक्सद्दे
ननास्तिकुतइत्यतआह तद्वदिति तद्वत्यास्तयभेदनाममतस्पृष्टदर्शनादग्न्यादिस्व
रूपातिरेकेणानुपलभ्यमानत्वादित्यर्थः नाग्न्यादिस्वरूपमेवशक्तिरित्याह नचातिश
भिदाप्रभेदापिनचनेवतत्रापिहेतुमाह प्रतिबंधस्येति मंत्रादिभिः शक्तिकार्यस्फोटादेः

शक्तिः शक्तात्पृथग्नास्ति तद्वद्दृष्टेर्नचाभिदा प्रतिबंधस्य दृष्टत्वाच्छक्तत्वमावेत्कस्य सः
॥ शक्तेः कार्यानुमेयत्वादकार्यंप्रतिबंधनं जलत्वाग्नेरदाहस्यान्मंत्रादिप्रतिबंधता

प्रतिबंधदर्शनात्स्वरूपातिरिक्ता शक्तिरस्त्वेवेत्यभिप्रायः भवतु प्रतिबंधदर्शनशक्तेर्भेदो
ऽपिमास्तु तत्कोपयत्नस्तत्राह शक्तत्वमावेति प्रत्यक्षसिद्धस्याग्न्यादिस्वरूपस्यप्रतिबंधासंभवात
द्गतिरिक्तानुपरामेपिप्रतिबंधोनिर्विषयः स्यादित्यभिप्रायः ॥ नन्वतींद्रियायाः शक्तेः क
थंप्रतिबंधावगतिरित्याशंक्याह शक्तेरिति अतींद्रियापिशक्तिः पुनः कार्यलिंगास्या
नुकार्यस्यापिकारणकार्यानुत्पत्तेस्तस्याः प्रतिबंधनंप्रतिबंधस्यावगम्यतइतिशेषः उक्तो
मर्थंदृष्टांतप्रदर्शनेनस्पष्टयति जलत्वमिति लोकेस्वरूपेणजलत्वप्रमाणेः प्रकाशदाहादिन

सर्वेति नित्यमासर्गात्मसहवमिति ब्रह्मणः पारमार्थिकं स्वरूपमुक्तं सर्वशक्तित्वमिति तस्यैव दर्शं
यदा पार्थिके रूपे तत्त्वं ब्रह्म यदा शक्तौ ह्लसति विकल्पविलसितेत्यर्थः तदा तदा सो शक्तिः
प्रकाशमधिगच्छति [illegible] भिन्नाक्तिः प्रासोति [illegible] शक्तिं प्रपंचयति चिच्छक्तिर्वि
तिशरीरेषु देवतिर्यङ्मनुष्यादिस्वतारेषु चिच्छक्तिः [illegible] हेतुमूलोपलभ्य

यथोल्लसति शक्त्यासौ प्रकाशमधिगच्छति चिच्छक्तिर्ब्राह्मणो नामशरीरेषूपलभ्य
ते १५ स्पंदशक्तिर्मरुतो [illegible] शक्तिस्तथाप्यले द्रवशक्तिस्तथाप्सु दाहशक्ति
स्तथानले १६ शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि यथा एडं तमेहास्तरं
जगदस्ति तथात्मनि १७ फलपत्रलतागुल्मशाखाविटपमूलवान् ततुबीजे यथा ह्य
स्तथेदं ब्रह्मणि स्थितं १८ ॥ तेहृश्यते १५ स्पंदनशक्तिः पवनतेहत्वमूला प्रकाशम
धिगच्छति [illegible] भिन्नवक्तिः दृशा [illegible] जगत् [illegible] दर्शिता १६ अनभिव्य
क्तस्यापि सतो दृष्टांतमाह विचित्रस्यापि तस्य सतो दृष्टांतमाह फलेति यथांग
तमेतादृत्यादिस्सार्थेन ततस्सर्वासामपि शक्तीनां युगपदेवाभिव्यक्तिः [illegible]
क्याह ॥ ॥

विवेकिनोऽज्ञजनाः पृथुबुध्नादिरूपं कार्यं शाह्लस्पर्शादिगुणरूपां कारणभूतां मृत्तिकां चावि-
चारितपक्षीकृत्य घटशब्दत्याचरन्ति ३३ उक्तस्य घटस्य व्यवहारस्याविचारमूलत्वं कुत इ-
त्याशंक्याह कुलालेति कुलालव्यापारात्पूर्वभाविनो मृद्देशस्याघटस्य घटत्वेनव्य-

पृथुत्वादिविकारांतांस्पर्शादिरूपां मृत्तिकां पक्षीकृत्य घटं प्राङ्विचारविक-
लाजनाः ३३ कुलालव्यापृतेः पूर्वो यावन्नेशः स्वतो घटः पाश्चात्यपृथुबुध्नादिम-
त्त्वेयुक्ताहि कुम्भतः ३४ ॥ ॥ ॥ ॥ राम ॥

व्यवहारादविचारमूलत्वं लक्ष्येतिभावः कस्य तर्हि घटत्वमित्यत आह पाश्चात्येति कुला-
लादिव्यवहारानन्तरभाविनः पृथुबुध्नोदराकारस्यैव घटशब्दवाच्यत्वमस्त्विति तदुक्त-
ज्ञानन्तरमेव घटशब्दप्रयोगदर्शनादितिभावः ३४ ॥

६

नष्टत्वादिविति शङ्कां घटत्वादिः कार्यधर्मो नास्ति शान्तादिकस्यास्य धर्मोऽपि न विद्यते
तो वित्सलतोऽन्यथा: तर्हि स्माकीदृश इत्यत आह अस्थितेति यथा तथा क्रमेणार्थस्य स्वरूपं स्थितिः
तदेवेति यतः कार्यस्याग्रहणस्य विलक्षणाग्रतएव वैद्याचित्या चितिनिष्पत्तिः तत्र शङ्क्या नन्वत्र तर्हि।
चिन्त्यत्वमेव लक्षणानुरूपं स्यादित्याशङ्क्याह न निर्वचनं तर्हीति भेदेनाभेदेन वाचित्यत्वाद
नावाकेनापि रूपेण निर्वचनेनार्हतीत्यर्थः २। ननु कारणस्वरूपातिरिक्ताशक्तिर्धर्म
नष्टत्वादिनेश ह्यादिः शक्तावस्था यथा तथा सतएव वर्तितस्य वाननिर्वचमर्हति ३८ का
र्यात्मनेः प्रवाशक्तिनिरूढा मृद्यवस्थिता कृत्स्नत्वादिदृष्टान्ते न शक्तिविकारत्वं न ३८
स्तितर्हि कारणस्वरूपमित्र नस्या कुतो वभासते इत्याशङ्क्याह कार्यात्मनेति निरूढ शक्ति
घटादि कार्यात्मने पूर्वं मृदि निरूढा मृद्यवस्थिता वतिष्ठते तेनावभासते इत्यर्थः निरूढा
ते उपरिष्टादपि तस्या अभिव्यक्तिः स्यादित्याशङ्क्या नाभिव्यक्तस्यापि तवतीत्याह स्वच्छना।
दिनैव कुलालादिव्यापारेण तस्या अभिव्यक्तिः स्यादित्याह कुलालादीति आदिशब्देन द
ण्डचक्रादयो ग्राह्या इति ३९ ननु कारणातिरिक्तस्य शक्तिकार्यस्य सतेः कार्यकारणभेदेन
कुतो वभासते इत्याशङ्काभेद प्रतीति हेतोर्विचारस्याभावादित्याह पृथक्त्वादीति म

पं॰द॰
मू॰ १

२३

मायामयत्वेन मायायाः कार्यत्वेन विकारस्य कार्यरूपस्य घटादेरनृतत्वमित्यात्म
त्वविकाराणां घटादीनां मायारम्भतया मृदः सत्यत्वं वाचारम्भणं विकारो नामधेयम्
तिकेत्येव सत्यमित्यादिश्रुतिः फक्कृतवतीत्यर्थः इदानीं वाचारम्भणमित्युदाहृतं वाक्यमर्थ
तः पठति वाग्भिः षणायामिति विकारो मृत्कार्यो घटादिर्वाग्भिः षणायां वागिन्द्रियेणारब्धायेन
समारब्धं नाममात्रं घटादेर्न सत्यता नाममात्रलिंगिकेण न पारमार्थिकं रूपमस्तीत्येकं वृत्तदा
यारम्भतामृदेव सत्येत्यर्थः २५ शांकिनत्का यथा सत्वे तत्वेन तदाधारस्य सत्यत्वेन च कारण

एवं मायामयत्वेन विकारस्यानृतत्वमुक्त्वा विकाराधारस्य मृदः सत्यत्वं वाचारम्भश्रुतिः
२८ वाग्भिः षणायेन नाममात्रं विकारो नास्य सत्यता स्पर्शादिगुणकार्यकारिता सत्या केवलं
मृत्तिका २५ व्यक्ताव्यक्तेन दाधारं स्थितिर्विष्णुः यथा हेयो पर्ययः कालभेदेन न तु नी
यस्तन्तु गच्छति ५ ॥ माह व्यक्ताव्यक्तयोरिति व्यक्तो घटादिलक्षणः कार्यः अव्यक्ता

तत्कारणभूता शक्तिः तेव्यक्ताव्यक्तयोराधारभूता शक्तिः तेव्यक्ताव्यक्तेन योराधारभूता नाममात्रलिंगिके ये
तेषु त्रिषु मध्ये आद्ययोः प्रथमद्वितीययोर्हेयोः कार्यशक्त्योः सर्वविनाशो कालभेदेन तयोर्भेदे ।
न भेदस्याविद्यमानत्वात् याथः क्रमेण भवतनीयत्कामस्यादिरनुगच्छति उभयत्रानुवर्त

ननुपारमार्थिकस्यघटस्यानिर्वचनीयशक्तिकार्यत्वमयुक्तमित्याशंक्यघटस्यापिपारमा
र्थिकत्वमसिद्धमित्याह सघटइति घटोमृदः पृथक्कृत्यद्रष्टुमशक्यत्वान्नमृदोभिन्नस्तेनापि
मृदेवपिण्डावस्थायामनुपलभ्यमानत्वान्नतः शक्तिवदनिर्वचनीयएवघटः फलितमाह
तेनेति ननुशक्तिकार्ययोरुभयोरप्यनिर्वचनीयत्वेशक्तिकार्यंचेतिभेदव्यवहारः कुतइ

सघटोनमृदोभिन्नोवियोगेसत्वनीक्षणात् नाप्यभिन्नः पुरापिण्डदशायामनवे
क्षणात् ३५ अतोनिर्वचनीयोयंशक्तिवत्तेनशक्तिजः अव्यक्तत्वेशक्तिरुक्ताव्यक्तत्वे
घटनामभृत् ३६ ऐन्द्रजालिकनिष्ठापिमायानव्यज्यतेपुरा पश्चाद्गन्धर्वसेनादिरूपेणाव्य
क्तिमाप्नुयात् ३७ ॥

त्याशंक्याह अव्यक्तत्वइति पूर्वमनभिव्यक्तामायाशक्तिः पश्चादभिव्यज्यते इत्येतत्प्रसि
द्धमायायामुपलभ्यतइत्याशंक्याह ऐन्द्रजालिकेति पुरामणिमन्त्रादिप्रयोगात्पूर्वंशक्ति
कार्यस्यगन्धर्वनगरादेरनन्तशक्तत्वायास्यमन्त्रादेः सत्यत्वमित्येतत्सकाशात्पश्चान्नावप्यभिहि

भगवतामनोवागिन्द्रियजन्मशब्दमात्रात्मिकत्वाद्बाह्यविषयविदेहगुप्य हृदि निवेश्य मोहकृतः एवं
योगश्चराचरस्वरूपः कार्यः असत्यो भवतुमर्हति निस्सत्त्वात् यद्यसत्यं न भवति तन्न विसत्त्वं यथा च
राद्युपादानंमृदिति केवलव्यतिरेको पदमितं हेतु द्वयापि योजनीयं एवं विकारस्यासत्यत्वमु
पपाद्येदानीं तदधिष्ठानभूतात्मसदेः सत्यत्वमुपपादयति अन्त्याते आद्यिकालोस्थितिकाले
ततः सर्वस्मिन्कालेऽकुर्वन्मयिष्यन्तु विनाशानन्तरकालेपि एकस्वरूपभाक् एकाकारः सन्ततत्व
त्वेन वास्तवरूपेण सद्दर्शनेऽस्मिन् नतम् विनाशविकारेण सह नाशरहितं च यन्महत्तत्
सत्यमिति कथ्यते विमतं मन्दस्सत्यं भवितुमर्हति सतत्त्वादात्मवदित्यादियोज्यं ननु च बा
द्यः कार्यजातस्यासत्यत्वे तस्यारोपितरजितादेरिवाधिष्ठानतत्वाननिवर्तनास्यादिति शंकते आ

आद्यन्ताकालेऽनन्तः पूर्वमूर्ध्वमप्येकरूपभाक् सततं सविनाशं च सत्यं सद्भिस्तु कथ्यते ४४ य
द्यन्वतो विकारश्च सत्येनोमभिधीयते अर्थश्चेदन्ततः कस्मान्महाबोधेनिवर्तते ४५ निवृत्तप
वयस्मात्तेनास्सत्यत्वमतिमनः इहोङ्कृतिरेवात्रबोधजानान्नभासनम् ४६ ॥ तमिति आद्यमि
त्यादिभिः शब्दैरभिधीयमानो योऽर्थः कार्यरूपस्तस्य कारणातिरेकेणासत्यत्वमङ्गीक्रियमाणे
सत्यत्वेनास्य कारणस्य ज्ञाने किं न तन्निवृत्तिः स्यादित्यर्थः इष्टापत्तिरीतिपरिहरति निवृत्तिरि
ति तत्रोपपत्तिमाह यस्मादिति यस्मात्कारणात्तत्त्वबोधविषयासत्यत्वबुद्धिर्नेष्टा अतः सतिनि
वृत्तपदेत्यर्थः नन्वारोपितरजतादिस्वरूपस्येवाप्रतीतिरुपलभ्यते न सत्यत्वबुद्ध्युपगमइत्या
शंक्यतस्यानिरुपाधिकभ्रमत्वात्तथात्वमिह तु सोपाधिकभ्रमे सत्यत्वबुद्ध्यापगम एव नि
वृत्तिः स्यादित्यभिप्रायेणाह इहेति अत्र सोपाधिकभ्रमस्थले रोपे सत्यत्वबुद्ध्यपगमः

८

२४

इदानीं विकारस्यैवासत्यत्वे हेत्वन्तरमाह निरूप्यत्वमिति सार्द्धेन वाक्शब्दवाच्यं घटादिकं
कार्यस्वरूपेण सदेवावभासते तथोत्पत्तिविनाशवद्रूपलम्भाते उत्पत्त्यनन्तरं वागिन्द्रिय
जन्यनामात्मकेनैव व्यवह्रियते किंच वाक्कार्यस्वरूपेणेष्टविप्रतिपत्त्यभावाद्भिन्नं नामरूप
क्ते ७ नृणां शब्दप्रयोक्तृणां मनुष्याणां वदनेष्वनुवर्तते ततः किं तत्राह तेनेति वाक्कार्यत्ते
नवाचाव्यवह्रियमाणेन नाम्ना शब्देन निरूप्यत्वाद्व्यवह्रियमाणत्वात्तद्रूपं तस्य नाम्नो रूप
मेवरूपं यस्य तत्तथा नामात्मकमुच्यते इत्यर्थः अयंभावः विमतो घटादिः शब्दात्मको भ

निरूप्यत्वे भासमानं च वाक्कमुत्पत्तिविनाशभाक् तदुत्पत्तौ तस्य नाम्ना वाचा निरूप्यते नामि:
५१ वाक्केनेष्टपि नामैतन्नृवक्त्रेष्वनुवर्तते तेन नाम्ना निरूप्यत्वाद्वाक्कं तद्रूपमुच्यते ५२
निरूप्यत्वाद्धि विनाशित्वाद्वाचारंभणनामतः वाक्कस्य न तु तद्रूपं सत्यं किंचिन्मृदादिवत्

वितुमर्हतीति घटशब्देन व्यवह्रियमाणत्वात् पटशब्दवदिति एवं हेतुत्रयं प्रदर्श्येदानीम
नुमानरचनाप्रकारं सूचयति निरूप्यत्वादिति वाक्कस्य घटादिरूपस्य कार्यस्य यत्स्वरूपं
मादृपकारं रूपमस्तितात्किं विकिमपि सत्यं न भवति निरूप्यत्वेन निर्गतत्वं वाक्त्वं रूपं यस्मा
त्तिरूप्यत्वं तस्य भावस्तस्मात् तथा विनाशित्वात् मृदिश्यत्वामेव नाशप्रतियोगित्वात्तथा वाचारं

ननु घटस्य मृद्विवर्त्तत्वमनुपपन्नं घटनाशोत्तरं मृद्भावादर्शनादिति शंकते घटश्चेति मृ
द्भावाभावे कारणमाह कपालानामिति कपालानामपि नाशे मृद्भावोपलब्धिस्यादि
ति परिहरति मैवमिति स्वर्णत्वेन ज्ञाद्यामेवानवकाशमित्याह स्वर्णेति ५. ननु परिणामे
दृष्टान्तत्वेनाभिहितानां क्षीरमृत्स्वर्णानां मध्ये यदि मृत्स्वर्णयोर्विवर्त्तदृष्टान्तत्वमङ्गीक्रि
यते तर्हि तद्वदेव क्षीरस्यापि तथात्वस्यादित्याशंक्याह क्षीरादाविति तर्हि क्षीरवदेवाव
स्थान्तरमापद्यमानयोस्तयोर्विवर्त्तदृष्टान्तत्वं न भवेदित्याशंक्याह एतावतेति एतमेव

दृष्टे भग्ने न सद्भावः कपालानामवेक्षणात् मैवं स्वर्णे स्थिते दृष्टे स्वर्णे रूपे त्वनिस्फुटं
५. क्षीरादौ परिणामोस्तु पुनस्तद्भाववर्जनात् एतावता मृदादीनां दृष्टान्तत्वं न हीयते
५१. आरम्भवादिनः कार्यमदो हेतुगुणमापनेन रूपस्पर्शादयः साक्षात्कार्यकारणयोः
पृथक् ५२ ॥

क्षीरादेः परिणामत्वेन मृदादीनां स्वर्णादीनां दृष्टान्तत्वविव
र्तदृष्टान्तभावो न हीयते तेन नश्यतीत्ययमभिप्रायः क्षीरस्य पूर्वरूपत्यागपुरस्सरमवस्था
न्तरापत्तिसद्भावेपि पूर्वरूपपरित्यागाभावाद्विवर्त्तनापीति ननु मृत्स्वर्णयोः परिणा
मविकारंभकत्वमपि किं नाङ्गीक्रियते इत्याशंक्याह आरम्भेति आरम्भवादिनो मते कार्यं
घटादि रूपे मदो मतिकादेश्च स्वहेतुगुणे कार्याकारेण कारणाकारेण च विहितगुणात्वा।

पं.द.
ग्रं.
१.

26

कार्यस्य सत्यान्नांशाद्युपपन्नत्वात्कारणज्ञानात्कार्यगतसत्यांशज्ञानं भवतीत्यभिप्रायेण
समृत्कस्येति समृत्कस्यार्थस्यानुगतमृत्सहितस्य विकारस्यारोपितस्य घटादिरूपस्य।
कार्यता कार्यशब्दार्थत्वं लोकप्रसिद्धमित्यर्थः। भवत्वेवमेतावता कारणज्ञानात्कार्यज्ञाने
न सम्भवतीति चोद्यस्य कः परिहारो ज्ञायत इत्याशंक्य कार्यगतानृतांशज्ञानाभावेऽपि तद्गतस
त्यांशज्ञानं भवत्येवेति परिहार इति वास्तव इति अत्र कार्ये वा वास्तवो मृदंशोऽस्ति अस्य वास्तवो

समृत्कस्य विकारस्य कार्यता लोकदृष्टितः। वास्तवोऽत्र मृदंशोऽस्य बोधः कारणबोधतः।
५५ अनृतांशो न बोद्धव्यस्तद्बोधानुपयोगतः। तत्त्वज्ञानं पुमर्थं स्यान्नानृतांशावबोधनं

शस्य बोधो ज्ञानं कारणज्ञानाद्भवतीत्यर्थः। ननु कार्यगतसत्यांशवदनृतांशोऽपि बोद्धव्य
इत्याशंक्य प्रयोजनाभावान्नैवमित्याह अनृतांश इति प्रयोजनाभावमेव प्रकटयति तत्त्व
ज्ञानमिति तत्त्वस्याबाध्यस्य वस्तुनो ज्ञानं पुमर्थं पुंसो ज्ञातुः पुरुषस्यार्थः प्रयोजनं य
स्मिंस्तत्पुमर्थमिति बहुव्रीहिः अनृतांशस्य विकारांशस्यावबोधनं प्रयोजनवन्न भवतीत्यर्थः।
५६ ननु कारणज्ञानात्कार्यज्ञानं भवतीत्येतत्क्वापि दृष्टो चमत्कारहेतुर्भविष्यतीत्यभिप्रा

१.

पं॰ टं॰
श्रु॰
११

ननु यथाश्रुतमर्थं परित्यज्यैतस्यां व्याख्यायां किं कारणमित्याशंक्य श्रुतेस्तत्तात्पर्याभावा
दित्याह अहैतमिति अहैतो विज्ञाने शिष्यमभिमुखीकर्तुमेवञ्चोदितः पुनरेवैकस्य का
रणस्य विज्ञानात्सर्वेषां कार्याणां विज्ञानमुक्तं न तु कार्यगतमनेकेषां विज्ञानं सिद्ध्य
तीत्यभिप्रायः इदानीमेकविज्ञानेन सर्वविज्ञाने दृष्टान्तप्रदर्शनपूर्वकं यथा सोम्यैके
न मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादिति वाक्यस्यार्थं तावत्पूर्वं प्रमाणपुरस्सरं दार्ष्टान्तिकप्रदर्श

आहैतमभिमुखीकर्तुमेवाहैकस्य वायतः सर्वं श्रोत्रयः श्रुतेनैवं ज्ञानं न वस्त्वविवक्षया इह
एकमृत्पिण्डविज्ञानात्सर्वं मृण्मयधीर्यथा तथैकब्रह्मबोधेन जगद्बुद्धिर्विभाव्यतां
श्रुते

नपरस्य उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतम्भवत्यमतं मतमविज्ञातं विज्ञातम्भवतीति
वाक्यस्यार्थं प्रदर्शयन्प्रकृतं फलितमाह एकमृत्पिण्डेति यथा घटशरावादिरूपादा
नस्यैकस्य मृत्पिण्डस्य बोधेन विकाराणां सर्वेषां घटादीनां बोधो भवति एवं सर्वोपादा
नस्यैकस्य ब्रह्मणो बोधेन तत्कार्यस्य कृत्स्नस्य जगतो बोधो भवतीत्येवं व्याख्यानमित्यर्थः ६।
ननु ब्रह्मजगतोः स्वरूपापरिज्ञाने ब्रह्मज्ञानात् ॥ ॥

२७

११

तर्हीति कारणस्य मृदादेर्ज्ञानात्कार्यज्ञानमृदादिसंस्थानं शज्ञानं भवतीत्युक्तेऽमूलज्ञानान्म
दोज्ञानमित्युक्तं भवति एवं च सति शङ्कनपदं च मत्कारोनार्थं तत्र इत्यर्थः ५१ इह विवेक
वतो विस्मयाभावेऽपि तद्वादिनो विस्मयः स्यादेवेति परिहरति सत्यमिति कार्यं घटा
दि पुर्विद्यमानो वा सत्त्वेऽशः कारणस्वरूपमेवेति यज्ञानं तिलेभ्यो मातृपर्याप्तमूलतः नरे पा
तज्ज्ञानं मूल्यानां ज्ञायमानो विस्मयो न निवारयितुं शक्यत इत्यर्थः युक्तस्य विस्मयो भवेदि

तर्हि कारणविज्ञानात्कार्यज्ञानमितीरिते । मद्धोपान्सृतिकाबुद्धिरित्युक्तं कोऽत्र विस्म
यः ५७ सत्यं कार्येषु वस्त्वंशः कारणात्मेति जानतः । विस्मयोऽमास्त्विवान्यस्तु विस्मयः के
न वार्यते ५८ आरंभोपरिणामो वत्सौकिकश्चैककारणे । ज्ञाते सर्वं मतिं मुत्वाभासं
त्यज विस्मयम् ५९

उक्तमेवार्थं प्रपंचयति आरंभेति आरंभो नाम समवाय्यसमवा
यि निमित्तकारणेभ्योऽभिन्नस्योत्पत्तिस्तां यो वक्ति स आरंभीत्युच्यते सुवर्णरूपपरित्यागे
न रूपान्तरप्राप्तिलक्षणः परिणामस्तं यो वक्ति स परिणामीत्युच्यते तयोः क्रियाद्वयमज्ञानानो
लोकव्यवहारमात्रपरो लौकिक इत्युच्यते एषां त्रयाणामपि कारणस्यैकस्य ज्ञाना

सृष्टिदानं दृष्ट्वैव नामरूपयोरभिव्यक्तिं दर्शयति विचिन्त्येति सर्वाणि रूपाणि विचित्य धीरो नामा-
नि कृत्वाभिवदन् यदास्ते इति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ।
च छान्दोग्ये जगतो नामरूपैः सृष्टिं दर्शितमित्यर्थः ६४ तत्र श्रुत्यन्तरमुदाहरति अव्या-
कृतमिति बृहदारण्यकश्रुतौ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत ।
सोऽनामायमिदंरूप इति सृष्टस्य जगतो नामरूपात्मकत्वं दर्शितमित्यर्थः सृष्टेः पूर्वमिदं
जगदव्याकृतमव्याकृतनामरूपात्मकत्वमभूत् इदं स्पष्टं वक्ष्यते हि धातोर्वाच्यवाचकरूपत्वेन

विचिन्त्य सर्वरूपाणि कृत्वा नामानि तिष्ठति अहं व्याकरवाणीमे नामरूपे इति श्रुतेः
६४ अव्याकृतपुरा सृष्टेरिदं व्याक्रियते द्विधा अचिन्त्यशक्तिर्मायैषा ब्रह्मण्यव्याकृता-
भिधा ६५ अविक्रियब्रह्मनिष्ठा विकारं यात्यनेकधा मायां तु प्रकृतिं विद्यान्मायिनं
तु महेश्वरं ६६

व्याक्रियते व्यक्तीकृतमित्यर्थः इदानीं तर्हि इदं तर्ह्यव्याकृतमासीदित्य-
त्राव्याकृतशब्दस्यार्थमाह अचिन्त्येति ये यब्रह्मण्यचिन्त्या शक्तिर्मायाख्या सैषा अव्याकृता-
भिधा अव्याकृतमभिधानामयस्याः सा अव्याकृताभिधा अस्मिन्वाक्ये अव्याकृतशब्देनाभिधी-
यत इत्यर्थः तन्नामरूपाभ्यामेव व्याक्रियतेत्यस्यार्थमाह अविक्रियेति अविकारिणि
ब्रह्मणि वर्तमाना सानेकधा भूतभौतिकप्रपञ्चरूपेण बहुधा विकारं परिणामं प्राप्नोति
मायाब्रह्मणि वर्तमाना [illegible] कृति प्रक्रियते: न

जगतो ज्ञानं भवतीत्येवं न्यायवर्गं तु शंकानदतमायातं कुमयपत्तस्वरूपं दर्शयति सच्चिदि
ति ब्रह्मणः सच्चिदानंदरूपत्वे किं प्रमाणमित्याशंक्य तापनीयादिश्रुतयः प्रमाणमि
त्यभिप्रायेणाह तापनीय इति उत्तरस्मिंस्तापनीये आथर्वणिके सा वृद्धैर्वेदं सर्वं सच्चि
दानंदमात्रमित्यादिप्रदेशेषु ब्रह्मणः सच्चिदानंदरूपत्वमुक्तमित्यर्थः आदिशब्देनानं
दवल्ल्यादिश्रुत्यंतराणि दर्शयति सद्रूपमिति आरुणिश्वेतकेतुसंवादे छांदोग्यश्रुतौ स

सच्चित्सुखात्मकं ब्रह्म नामरूपात्मकं जगत् तापनीये श्रुतं ब्रह्म सच्चिदानंदलं।
तथा हि सद्रूपमारुण्यां प्रज्ञानं ब्रह्म बह्वृचाः सनत्कुमारश्चानंदमेवमन्यत्र ग
म्यतां ६३।

देव सौम्येदमग्र आसीदित्यादिना सद्रूपं ब्रह्म निरूपितं तथा बह्वृ
चाः ऋग्वेदाध्यायिन ऐतरेयोपनिषदि प्रज्ञानं प्रतिष्ठा प्रज्ञानं ब्रह्मेति प्रज्ञानरूप
त्वं ब्रह्मणो दर्शयति एवं सप्तमाध्याये छांदोग्यश्रुतौ सनत्कुमारो भगवान्नारदायोपदेशं ना
रदाख्याय स्वशिष्याय भूमा त्वेव विजिज्ञासितव्य इत्युपक्रम्य यो वै भूमा तत्सुखमिति
भूमसंज्ञस्य ब्रह्मण आनंदरूपत्वमुक्तवानित्यर्थः उक्तन्यायमन्यत्राप्यतिदि

तदेवोपपादयति अवकाशादिनिष्टं वेत्यादिना श्लोकमनुवदति शून्यमिति अंगीकृत्य परिहरति
तस्मात् अस्त्विति शाखाग्नः शून्यमस्तु नाम तत्तु अवकाशाभावविशेषणाम्याःस्याविशेषत्वे।
न प्रतीयमानं किंचिद्दृश्यत्वमुपगतत्वामित्याह तादृगिति हि शब्दो लोकप्रसिद्धद्योतन
नार्थः अवकाशेव प्रकाशमाने किं भाति तदित्याशंक्य विशेषाभावेन प्रतीयमानस्य शून्यस्य रूपमनुप
लब्धमित्याह तादृक्त्वादिति तस्य स्फुरत्वेनूपलब्धमाहत्वौदासीन्येनेति उदासीन्याविषयत्वात्।

अवकाशे विस्मृतेऽथ तत्र किं भाति तद्वद शून्यमेवेति चेदस्तु नाम तादृग्विभाति हि
७१ तादृक्त्वादेव तत्त्वस्य औदासीन्येन तत्सुखं वे आनुकूल्यप्रातिकूल्यहीनं यत्तन्निजं सु
खं ७२ आनुकूल्ये हर्षधीः स्यात् प्रातिकूल्ये तु दुःखधीः द्वयाभावे निजानन्दो निजदुःखं
त्वसत्क्वचित् ७३ निजानन्दे स्थिरे हर्षशोकयोर्व्यत्ययः क्षणात् मनसः क्षणिकत्वेन त
योर्मानसतेष्यतां ७४ ॥ स्फुरत्वेनूपलब्धमित्यर्थः ७१ नन्वनुकूलत्ववर्हि तस्य कथं।
सुखत्वेनूपलब्धमित्याशंक्याह आनुकूल्येति तदेवोपपादयति आनुकूल्यइति ननु निजा
नंदवन्निजदुःखमपि किं न स्यादित्याशंक्याह दुःखं निजरूपस्य सुखाभावात्मैवामित्याह निज
दुःखमिति ७३ ननु निजानन्दस्य सदानन्दत्वात् सर्वदा हर्षप्रसंगात् न शोक इत्याशंक्याह

इदानीं मायाख्योपाधिकस्य ब्रह्मणः प्रथमं कार्यमाह आद्य इति तस्य कारणादागतं रूपत्रयमाह
सोऽस्तीति सच्चिदानंदरूपत्वमर्थः तस्यासाधारणं रूपमाह अवकाश इति तस्य पूर्वस्माद्रूपत्र
याद्वैलक्षण्यमाह तन्मिथ्येति सदादिरूपत्रयवत्तत्त्वमित्यर्थः ६० तस्य चतुर्थरूपस्य मिथ्या
त्वे हेतुमाह न व्यक्तेरिति ननूत्पत्तिविनाशाभ्यां मध्ये प्रतीयमानस्यावकाशस्य कथमसत्यत्वमि =

आद्यो विकार आकाशः सोऽस्ति भात्यपि च प्रियः अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्र
यं ६० न व्यक्तेः पूर्वमस्त्येव न पश्चाच्च विनाशतः आदावन्ते च यन्नास्ति वर्तमानेपि तत्तथा
६१ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येवेत्याह कृष्णोऽर्जुनं।
प्रति ६२ मृद्वत्सच्चिदानंदा अनुगच्छन्ति सर्वदा निराकाशे सदादीनामनुभूतिर्निजा
त्मनि ६३॥

त्याशंक्याह आदाविति ६१ उक्तार्थे श्रीकृष्णवाक्यं प्रमाणयति अव्य।
क्तादीनीति सदादिरूपत्रयस्याकाशे सत्त्वे किं प्रमाणमित्याशंक्यानुभूतिरेव प्रमाणमि।
त्याह मृद्वदिति दृष्टान्तप्रदर्शनार्थः घटादिषु यथा कालत्रयेऽपि मृदनुवर्तते तथा सदा
दिरूपत्रयं सर्वदानुगतमित्यर्थः नन्वाकाशविलये सदादिरूपत्रयं कथमनुभूतमित्याशं।

पंचदशी टी० २८

ततः किमित्यत आह सच्चिदानंदेति ८० ब्रह्मज्ञानदार्ढ्यस्याद्वैतावज्ञापर्यवसन्नत्वात् स्व
वपनादिवत् द्वैतावज्ञापि कर्तव्येत्याह यावदिति ८१ उभयाभ्यासस्य फलमाह त

।

सच्चिदानंदरूपेऽस्मिन्पूर्णे ब्रह्मणि वीक्षिते स्वयमेवावजानाति नामरूपे शनैः
शनैः ८० यावद्यावदवज्ञा स्यात्तावत्तावदवेक्षणं यावद्यावत्तद्वीक्षेत तावत्तावदु
भे त्यजेत् ८१ तदभ्यासेन विद्यायां सुस्थितायामयं पुमान् जीवन्नेव भवेन्मुक्तो
वपुरस्तु यथा तथा ८२ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं
च तदभ्यासं विदुर्बुधाः ८३ ॥

दभ्यासेनेति इदानीं ब्रह्माभ्यासस्य स्वरूपमाह तच्चिंतनमिति ८३ ॥

॥ ॥ ॥ ॥ ॥ ॥

दृष्टान्तेसिद्धमर्थं दार्ष्टान्तिके योजयति आकाशेति एवंनिरात्मत्वप्रकारेणेत्यर्थः
सत्ताभानेन तु भवतात्यभ्युपगम्यते अतो नोपपादनीयमित्यर्थः आकाशे प्रतिपादित
मर्थं वाय्वादिशरीरान्तेष्वभ्युपगन्तव्यमित्याह वाय्वादीति २५ तत्र वाय्वादीनामसा

आकाशेप्येवमानंदः सत्ताभानेन तु संमतः वाय्वादिदेहपर्यंतेष्वस्त्वेवं विभाव्यतां
२५ गतिस्पर्शौ वायुरूपं वह्नेर्दाहप्रकाशने जलस्य द्रवता भूमेः काठिन्यं चेति निश्च-
यः २६ असाधारणआकाशगुणध्वनिवत्पृथगपि एवं विभाव्य मनसा तत्तद्रूपं पृथक्-
चिंतम् २७ अनेकदा विभिन्नेषु नामरूपेषु चैकदा तिष्ठन्ति सच्चिदानंदे नाविसंवा-
दो न कस्यचित् २८ निस्तत्त्वे नामरूपे द्वे जन्मनाशयुते च ते बुद्ध्या ब्रह्मणि वीक्ष-
स्व समुद्रे बुद्बुदादिवत् २९ ॥

धारणधर्मान्दर्शयति गतिस्पर्शाविति द्वाभ्यां २६ २७ फलितमाह अनेकधेति तर्हि
दृश्यमानयोर्नामरूपयोः का गतिरित्याशंक्य कल्पितत्वमेव गतिरित्याह निस्तत्त्वे

पं॰ द॰
अ॰
२५

तिकन्यायेन स्पष्टयति ईदृश इति अप्रयत्नमानायाः ब्रह्मनिष्ठायाः मायाया जगद्धेतुत्वे दृष्टां
तमाह शयान इति मायया ब्रह्मण्यन्यदार्थान् कल्पयति खानिलेति ननु पांचभौतिक
त्वेन साम्येपि केषांचित् चेतनत्वं केषांचिज्जडत्वं कुत इत्याशंक्याह प्राणिधीष्विति प्राणि
शरीरेषु अन्तःकरणेषु चैतन्यप्रतिबिम्बात् चेतनत्वमितरत्र तदभावाज्जडत्वमित्यर्थः नन

ईदृशो महिमा दृष्टो निद्राशक्तेर्यदा तदा मायाशक्तेरचिंत्योयं महिमेति किमद्भुतं
शयाने पुरुषे निद्रा स्वप्नं बहुविधं सृजेत् ब्रह्मण्येवं निर्विकारे विकारान्कल्पयत्य
सौ ६० खानिलाग्निजलोर्व्यण्डलोकप्राणिशिलादिकाः विकाराः प्राणिधीष्वंतश्चि
च्छायाप्रतिबिंबिता ६१ चेतनाचेतनेष्वेषु सच्चिदानंदलक्षणं समानं ब्रह्म भिद्येते ना
मरूपे पृथक्पृथक् ६२ ब्रह्मण्येते नामरूपे पटे चित्रमिव स्थिते उपेक्ष्य नामरू
पे द्वे सच्चिदानंदधीर्भवेत् ६३ ॥ चेतनाचेतनविभागादिरूपं ब्रह्मकृतमेव किं न

स्यादित्याशंक्य ब्रह्मणः सर्वोपादानत्वेन समत्वान्मैवमित्याह चेतनेति ब्रह्मणोपि
तज्जमायायाश्च हेतुमाह ब्रह्मणीति ब्रह्मणि सर्वकल्पनासाधारणत्वान्न वैयर्थ्यमित्य
र्थः तत्कथमवगम्यत इत्याशंक्य मायाकल्पितनामरूपत्यागोपेक्षाने ब्रह्मावगमस्यात इत्य

नन्वनादिकालमारभ्य प्रतिभासमानस्य द्वैतस्य कदाचित्केन तज्ज्ञानाभ्यासेन कथं निवृ
त्तिरित्याशंकायां देशकालनैरंतर्यसत्कारसेवितेनाभ्यासेन निवर्तनपर्यन्ताह वासनेति
नु ब्रह्मण एकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्याशंकायामाह सादृश्योपप।

वासनानेककालीना दीर्घकालं निरंतरं । साभ्यस्तानेभ्यसमाने सर्वथैव निवर्तते
मृच्छक्तिवद्ब्रह्मशक्तिरनेकानन्तान्सृजेत् यद्वा जीवगतानिद्रास्वप्नस्यात्र निद
र्शनं ८५ निद्राशक्तिर्यथा जीवे दुर्घटस्वप्नकारिणी ब्रह्मण्येषा तथा माया सृ
ष्टिस्थित्यंतकारिणी ८६ स्वप्ने वियद्गतिं पश्येत् स्वमूर्द्धच्छेदनं तथा मुहूर्ते वत्सरौ
घं च मृतपुत्रादिकं पुनः ८७ इदं युक्तमिदं नेति व्यवस्था तत्र दुर्लभा यथा यथे
क्षेत यद्यत्तत्तद्युक्तं भवेत्तथा ८८ ॥

एतदुक्त्वाह मृच्छक्तिवदिति सृजन्ती नानानि कार्याणीत्यर्थः न मे नेच्छक्तेः सत्यत्वादने
कहेतुत्वात् हि पक्षे सत्यत्वात् सत्यमाह यद्वेति ८५ दृष्टान्तं विशदयति।

पं॰द॰
अ॰
२६

32

ननु ज्ञानिनो व्यवहारात्प्रभृत्यामेपि या शि नं प्रपञ्चे नेत्याशंक्याद्वैतव्यवहारं त्यामपि न तस्मादज्ञा
निनां कार्याद्वृत्तिस्वदृष्टान्तं प्रवदतीति तु इदं केयुरादिप्रवद्धत्वपि अप्र यो स्थिता यो न शिला यथा न चलति त
थैव तद्वैस्वस्वरं त्यामपि न त्यजतीसर्वतीत्यर्थः नन्वेवं ब्रह्मणि नामरूपे ज्ञानिना जगतः कथमव
भासनमित्याशंक्य निश्छिद्रदर्पणे सावकाशं वदनं यथा भानं तद्वदित्याह निश्छिद्रइति न
नु अद्वैतरूपे ब्रह्मणि कथं जगतो भानमित्याशंक्यास सच्चिदानन्दप्रतीतिपूर्वः सर्वमेव जगत्प्रतीतिरि

प्रवृत्त्यापि नीरेयः स्थिरा यो न शिला यथा नामरूपान्यथात्वेपि कूटस्थं ब्रह्म नान्यथा १० निश्छिद्रे दर्पणे भाति वस्तुगर्भं बृहद्वियत् सच्चिद्घने तथा नानाजगद्गर्भमिदं वियत् ११ अदृष्ट्वा दर्पणं नैव तदन्तस्थेक्षणं तथा अमत्वा सच्चिदानन्दं नामरूपमतिः कुतः १२ प्रथमं सच्चिदानन्दे भासमानेऽथ तावता बुद्धिं नियम्य नैवोर्ध्वं धारयेन्नामरूपयोः १३ एवं च निर्जगद्ब्रह्म सच्चिदानन्दलक्षणम् अद्वैतानन्द एतस्मिन्विश्राम्यन्तु जनाश्चिरं १४ ब्रह्मानन्दाभिधे ग्रन्थे तृतीयोऽध्याय ईरितः अद्वैतानन्द एव स्याज्जगन्मिथ्यात्वचिन्तया १५

इति श्रीब्रह्मानन्दे अद्वैतानन्दः समाप्तः १३ ॥ सदृष्टान्तमाह अदृष्ट्वेति ननु नामरूपयोरपि
भासमानत्वात्कथं निर्विषयब्रह्मप्रतीतिरित्याशंक्यानन्दबुद्ध्युपायमाह प्रथममिति एवमिति
सच्चिदानन्दब्रह्मणि कल्पितनामरूपात्मके प्रपञ्चे सच्चिदानन्दमात्रे तु ध्यानग्रहीत्वा नामरूपयो
र्बुद्धिं न धारयेत् एवं सति निर्जगद्ब्रह्म सच्चिदानन्दलक्षणं भवतीत्यर्थः उदाहृतमर्थमुपसंहरन्नु
पसंहरति ब्रह्मानन्दाभिधइति इति श्रीब्रह्मानन्दे अद्वैतानन्दो नाम त्रयोदशोऽध्यायः समाप्तः ॥

ॐ श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते ध्यानदीपस्य व्या-
ख्या संक्षेपतो मया १ इह तावद्वेदान्तशास्त्रे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टय-
संपन्नस्य सम्यक्श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वंपदार्थविवेचनपूर्वकं
महावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं तत्र श्रवणा-
द्यनिष्पत्तिकस्यापि बुद्धिमान्द्यादिदोषेण चित्तविक्षेपेण वाक्यार्थविषयापरोक्षप्रतीत्यनु-

संवादिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापि मुच्यते ॥ उत्त-
रे तापनीयेऽतः श्रुतोपास्तिरनेकधा ॥ १ ॥

त्पत्तौ सत्यां तदुत्पादनद्वारा मोक्षफलकोपासनानि निर्दिदर्शयिषुराचार्यो नानावसरस्थितं
ब्रह्मतत्त्वोपासनेनापि मोक्षो भवतीति प्रतिजानीते संवादीति यथा संवादिभ्रमेणापि
तस्याभिमतार्थलाभो भवत्येवं ब्रह्मतत्त्वोपासनयाप्यभिलषितब्रह्मभावलक्षणो मोक्षो
भवतीत्यर्थः तत्र किं प्रमाणमित्यत आह उत्तर इति यत उपासनयापि मोक्षोऽस्त्यत
तापनीयप्रश्नोपनिषदादौ [illegible] ॥ १ ॥

पं. टू.
न.
२

34

भवत्येवं वार्त्तिकार्थः प्रकृते किमायातं इत्यत आह दीपप्रभेयोमेति यद्दीपप्रभायां मणि
भ्रान्तिर्यस्य विसंवादिभ्रमः तिष्ठतो विरुद्धिर्मणौ लाभलक्षणार्थक्रियाविरहितत्वा
न्मणौ तद्वत् मणिप्रभायां मणौ लाभलक्षणार्थक्रियावत्वात् संवादिभ्रमः इत्युक्त
त्यर्थः ६ एवं प्रत्यक्षविषयं संवादिभ्रमं दर्शयित्वानुमानविषयेपि तं दर्शयति
बाष्पमिति कश्चिन्महदेशस्थितं बाष्पं धूमत्वेन निश्चित्य तत्सम्बन्धदेशं पंचदेशेऽग्नि

दीपप्रभामणौ भ्रान्तिर्विसंवादिभ्रमस्सन् मणिप्रभामणिभ्रान्तिःसंवादिभ्रमउच्य
ते ६ बाष्पं धूमतया बुद्ध्वा तज्ज्ञानादनुमानतः वह्निर्यदृच्छया लब्धः स संवादिभ्र
मो मतः ७ गोदावर्युदकं गंगोदकं मत्वा विशुद्धये संप्रोक्षणं यदृच्छया ज्ञातिः स संवादिभ्र
मो मतः ८

मानं धूमवत्वादित्यनुमाय यद्वा तेन तद्देशे गत्वा पर्यग्निस्तत्रोपल
भ्यते. तदा बाष्पविषयं धूमज्ञानं संवादिभ्रमो मतः आगमविषयेपि तं दर्शयति गो
दावरीति गोदावर्युदकस्यापि विशुद्धहेतुत्वमागमसिद्धमतस्तस्मात् शुद्धिः
शुद्धिरित्यस्य बाध्यपि गोदावर्युदके या गंगोदकबुद्धिः सा भ्रान्तिरेव ८ ॥ १ ॥

इदानीं बहुभिर्ग्रन्थैः रूपयन्नादिसंवादिभ्रमं बुद्धिमोक्षकार्योपसंनिपादयति अया
पयति विहितादविहिताद्वा यस्मात् यथावस्तुविज्ञानादीप्सितमपि लब्धिफल
काकतालीयतो दैवगत्या लभ्यते सोऽयं संवादिभ्रम इत्यर्थः १२ ननु ब्रह्मोपास
नस्य यथावस्तुविषयत्वाभावात् कथं सम्यग्ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य सं
वादिभ्रमवदेवेत्याह स्वयमिति १३ ननु ब्रह्मतत्त्वोपासनं क्रियते ज्ञाना

अन्यथा वस्तुविज्ञानात् फलं लभ्यत ईप्सितम् काकतालीयतः सोऽयं संवादिभ्र
म उच्यते १२ स्वयं भ्रमोऽपि संवादी यथा सम्यक्फलप्रदः ब्रह्मतत्त्वोपासना
पि तथा मुक्तिफलप्रदा १३ वेदान्तेभ्यो ब्रह्मतत्त्वमखण्डैकरसात्मकं परोक्ष
मवगत्यैतदहमस्मीत्युपासते १४ ॥ नन्वाद्ये उपासनावैयर्थ्यं मोक्षसाधनस्य
ज्ञानस्यैव विद्यमानत्वात् द्वितीये विषयापरिज्ञानादुपासनमेव न संभवतीत्यत आ
ह वेदान्तेभ्य इति अयमभिप्रायः ब्रह्मात्मैकत्वापरोक्षज्ञानस्य मोक्षसाधनस्याजनकत्वे
नैतावतोपासनावैयर्थ्यं श्रवणानन्तरं यावत्तत्त्वसाक्षात्कारमुपासनाविधेयत्वात्

पं.द.
४

ननु सच्चिदानंदवाक्यमुल्लेखितेनो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षते
त्याशंक्यापरोक्षत्वप्रयोजकधर्मरूपकोल्लेखाभावादित्याह सच्चिदानंदेति सत्यं
ज्ञानमनंतं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनः सदेवेदं सर्वं सदसदिति वि
शेष्य संवप्रकाशान्ते चेत्यादिशास्त्रात् सच्चिदानंदरूपस्य ब्रह्मणो भानेपि प्रत्यंच।

36

सच्चिदानंदरूपस्य शास्त्राज्ज्ञानेप्यनुल्लिखन् प्रत्यंचमादितीनतद्ब्रह्म साक्षा
न्नवीक्षते ।८ शास्त्रोक्तेनैव मार्गेण सच्चिदानंदनिर्णयात् परोक्षमपि तज्ज्ञानं
तत्त्वज्ञानं न तु भ्रमः ॥४१॥ साक्षिणमनुल्लिख्य लक्ष्यब्रह्मणः प्रत्यगात्मरूप
त्वमज्ञानान्न तु ब्रह्मसाक्षान्नवीक्षते नैव पश्यति ।८ कथं तर्हि तथाविधब्रह्म
गोचरस्य ज्ञानस्य तत्त्वमित्याशंक्य तु मप्रमाणजन्यत्वादित्याह शास्त्रेति त
ज्ज्ञानं परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानंदरूपनिश्चायक
त्वात् सम्यग्ज्ञानमेव नैव भ्रमस्वरूपः ॥४१॥

४

ननु सत्यज्ञानादिवाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्यगात्मत्वमपि तस्यावगतमेव ततः शास्त्रजन्यस्यापि ज्ञानस्य प्रत्यक्षवन्मुक्तिहेतुत्वाद्रूपमोक्षत्वमेवेत्याशंक्याह ब्रह्मेति यद्यपि वेदान्तेषु महावाक्यैर्ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतन्मात्रस्वरूपत्वमनवगम्यते वाक्यार्थानन्तपदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्यमतः केवलाद्वाक्यात्परोक्षज्ञानमेवोत्पद्यत इत्यर्थः १ ननु स

ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितं महावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः २ देहाद्यात्मत्वविभ्रान्तौ जाग्रत्यां न हठात्पुमान् ब्रह्मात्मत्वेन विज्ञातुं क्षमते मन्दधीत्वतः २१ ॥

स्यापरोक्षज्ञानस्य प्रमाणवस्तुपरतंत्रत्वात्प्रमाणस्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावाद्रूपस्य वस्तुनश्च ब्रह्मात्मैक्यस्य सदा विद्यमानत्वात्कुतो विचारमन्तरेणापरोक्षत्वमित्याशंक्याह देहादीति ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधेनोदितैर्देहादिष्वात्मत्वभ्रमस्याविचारनिवर्त्यस्य सद्भावात्तन्निवृत्तयेऽपेक्षत इत्यर्थः ॥

पं·द·
टी·

ननु तर्हीदानींतनैरेव ग्रंथकर्तृभिर्वेदवाक्यविचारः कृतः किं पुनरुक्त्याशंक्याह बुद्धिः।
परितोषायैव क्रियते नानुष्ठानसिद्धय इत्याह वेदेति २१ ननु ब्रह्मोपासनवद्ब्रह्मसा।
क्षात्कारस्यापि गुरूपदेशमात्रादेव सिद्धिः किं न स्यादित्याशंक्याह ब्रह्मेति शास्त्रोपदेश
मात्रेणोपासनानुष्ठानोपयोगि परोक्षज्ञानमुत्पद्यते अपरोक्षज्ञानं तु विचारमंतरे

वेदवाक्यानि निर्णेतुमिच्छन्मीमांसतां जनः आप्तोपदेशमात्रेण ह्यनुष्ठानं भवे
प्राग्रहणादित्याह अहमिति ननु दृश्यत्वात्मित्यर्थं स्वरूपभानं तदा किं वाप्यन्तीति उत्त

परोक्षज्ञानकालेपि विषयस्य प्रकाशता । अस्ति ब्रह्म स्वप्रकाशमस्तीत्येवं विवेचनात् ५०
अहं ब्रह्मेत्यनुल्लिखद्ब्रह्मास्तीत्येवमुल्लिखत् । परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणा
त् ५१ ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवं । न चैवं प्रबलं मानं पश्यामोऽतो न बाध्य
ते ५२ व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि । भ्रान्तिः स्याद्व्यक्त्यनुल्लेखात्सामान्योल्लेख
दर्शनात् ५३

अहमनुल्लेखादित्यत्राप्यपरोक्षेणाग्रहणाद्योग्यस्यापरोक्षेणाग्रहणात् यद्वा
प्राग्रहणादिति चतुर्दशिके प्रथमप्रत्याह एतन्भ्रान्तमिति ५१ हेतुं विवृणोति ब्र
ह्म नास्तीति ५२ [illegible] व्यक्त्यनुल्लेखमात्रेणेति स्वर्गादेरप्येवमाका
रेणाग्रहणाभावात् किन्तु स्वर्गोऽस्तीत्येवं सामान्याकारेणैव प्रतीतेः स्वर्गादिधीरपि भ्रम

पं. द.
सू.
९.

विचारसहकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं सदृष्टान्तमाह । दशमस्येति । त
थास्मीति निर्णीतो दशमः कश्चित्प्रश्नेऽकृते तेन स्वत्वमेवेति परिहाराभिहितेत्याक्र
नासहनेनात्मन्नेव गणयित्वाहं दशमोऽस्मीति स्वमेव दशमं स्मरेदित्यर्थः ५५ अस्य दश
मोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न विपर्ययादिन्नूपतेत्याह दशमो

स्मी

मू. दशमः कश्चिदिति प्रश्ने त्वमेवेति निराकृते गणयित्वा स्वेन सह स्वमेव दशमं स्मरे
त् ५५ दशमोऽस्मीति वाक्योत्था न धीरस्य विहन्यते आदिमध्यावसानेषु न नवत्व

स्मीति अस्य दशमस्य तमेव दशमोऽस्मीति वाक्यात् परिगणनविचारसहितादुत्पन्ना
हं दशमोऽस्मीति बुद्धिर्न विहन्यते न केनापि ज्ञानेन बाध्यते परिगणनक्रियायां नव
त्वानामादिमध्यावसानेषु परिगणनेऽपि अहं दशमो न वेति संशयस्तु न भवेदन्नसा
क्षात्तदृष्टापरोक्षरूपेत्यर्थः ५६ ॥ ॥ ॥ ॥

कौन्तेयाद्यवगमे शाब्दिकानामाह असत्त्वांशमिति ५६ अपरोक्षत्वेन ब्रह्मणो
ऽप्रविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतद्दृष्टान्तप्रदर्शनेनोपपादयति दशमइति
दशमोऽस्तीत्याप्तवाक्यजन्यपरोक्षज्ञानं न भ्रान्तं यथा ब्रह्मास्तीतिवाक्यजन्यज्ञानम-
पि तद्वन्न भ्रान्तं स्यादज्ञानकृतमसत्त्वावरणांशस्य समत्वादितिभावः ५७ ननु वा

असत्त्वांशो निवृत्तोऽत्र परोक्षज्ञानतस्तथा । अभानांशनिवृत्तिः स्यादपरोक्षधिया
कृता ५६ दशमोऽस्तीत्यविभ्रान्तं परोक्षज्ञानमीक्ष्यते ब्रह्मास्तीत्यपि तद्वत्स्यादज्ञा
नावरणं समं ५७ आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते व्यक्तिरुल्लिख्य
ते यद्वद्दशमस्त्वमसीत्यतः ५८ ॥

क्यात्परोक्षज्ञानमुत्पद्यते चेत् अपरो
क्षज्ञानं कुतो जायते इत्याशंक्य विचारसहिताद्वाक्यादेवेत्याह आत्मेति प्रथमा
त्मा ब्रह्मेति महावाक्यार्थे सम्यग्विचारेण पूर्वमस्तीति परोक्षतया अवगतस्य
ब्रह्मणः प्रत्यगभिन्नत्वेन व्यक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्य

पं.द.
स.
१२

नन्वेवं प्रथमतः केवलवाक्यात्परोक्षज्ञानमत्यल्पं तेन ज्ञानं हि विचारसहितादपरोक्षज्ञानं तु मि-
त्येतत्कुतोऽवगम्यत इत्याशंक्य तैत्तिरीयकादिश्रुत्यर्थपर्यालोचनयेत्याह जन्मादीनि
भृगुर्नामैकः कश्चिदृषिपुत्रो यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्य-
भिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति इति वाक्ये श्रुतेन जगज्जन्मादिकारणतालक्षण

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा पादेशेण गृहीतार्थविचाराद्धि किमेतत न ६३
यद्यपि तत्त्वमसीत्यब्रवीत्कं नोचे भृगोः पिता तथाप्यन्नप्राणमिति विचार्य स्थूलमुक्तवान्
६४

णोऽन्नमयकारणं ब्रह्मपरोक्षतयावगम्यान्नमयादिपंचकोशविचारात्किं प्रत्यगा-
त्मनो रूपं ब्रह्मेति दृष्टवानित्यर्थः ६३ नन्वस्मिन्प्रकरणे नैव ब्रह्मासीत्येवमाद्युपदेशकवा-
क्याभावात्कथमस्य गोचरात्मतत्त्वसाक्षात्कार इत्याशंक्यान्नमयाद्यात्माकारदेहविचारयोगप
स्थूलदर्शनादित्याह यद्यपीति ६४ ॥

कृतोऽयमाद्यत्वेन शास्त्रिणाकोऽलोपामाह अमलेत्यादि ६६ अमलो ललेन गृह्णायोम्य विठ्ठयेप
शुतत्त्वानंमेमानभवतीत्येतदृष्ट्या तत्प्रदर्शनेनापिद्रढयति दृष्टमहे एतत्स्वैकाला
निकेयोजयति स्वदेवेनादिवाकोऽनेनेति द्वाभ्यामहं च सोऽयमद्मस्वासीदेकमेवाद्विती
यमित्यादिवाकोऽनेन ब्रह्मसद्भावप्रथमनिश्चित्य तत्स्वसीच्चरूपेणप्रवस्थादिप्रालोचयपरिलोच

स्वदेवेनादिवाकोऽनेन ब्रह्मसत्तं परोऽतनः गृहीतानन्तमस्यादिवाकाग्रकिं स्वतुलितेन
६१ आदिमध्यावसानेषुलक्ष्यब्रह्मसत्तयैरिव नैवव्यभिचरेत्तस्मात्तदापरोक्षेत्वप्रनिष्ठितं ६२

तयाप्रत्यग्रूपत्वेनसंभाव्यतत्त्वमसीदिवाकोऽनाद्वितीयब्रह्मरूपमात्मानमहंब्रह्मास्मी।
तिभावात्कुर्यात् ६१ अत इयमात्मनो ब्रह्मत्वबुद्धिः पंचानां कोशानामादिमध्याव।
सानेष्वात्मनोव्यवहारेऽपि नैवान्यथा भवति अतोऽस्या बुद्धेः स्वपरोक्षज्ञानत्वस्थि
तमित्यर्थः ६२ ॥

पं. द.
प्र.
५५

एवं तैत्तिरीयश्रुतिपर्यालोचनया भृगोः एवोक्तज्ञानपूर्वकविचारजन्यत्वं साक्षात्कारं दर्श-
यित्वा छांदोग्यश्रुतिपर्यालोचनयापि तद्दर्शयति पारोक्ष्येणेति इंद्रो य आत्मापहतपाप्मा
विजरो विमृत्युर्विशोक इत्यादिवाक्यप्रतिपादितेन स्वलक्षणेनात्मानं परोक्षतयावगत्य विचारा-
च्छरीरत्रयं निराकरणेन तत्त्वसाक्षात्कारणाय गुरुं ब्रह्माणं चतुर्वारमुपासन्न इति छांदो-
ग्योपनिषद्युक्तमाख्यायिकया सूच्यते ६१ इदानीमैतरेयकश्रुतावपि तद्दर्शयति आत्मा वा इदमिति
आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदित्यनेन वाक्येन ब्रह्मणो लक्षणमभि-
पारोक्ष्येणाविष्कृत्य कोयमात्मेत्यादिलक्षणात् अपरोक्षीकर्तुमिच्छं चतुर्वारमुक्तं यथो ६
आत्मा क इदमित्यादौ परोक्षं ब्रह्म स्वादिति अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं ६२
था स ईक्षत लोकान्नु सृजा इत्युपक्रम्य तस्य आवसथास्त्रयः स्वप्नाः अयमावसथो यमावसथो
यमावसथ इत्यनेन परमात्मनि जगदध्यारोपणप्रकारमभिधाय स जातो भूतान्यभिव्यै-
ख्यात् किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एतमेव पुरुषं ब्रह्म तत-
मपश्यदिदमदर्शमितीदं प्रत्यगात्मनो ब्रह्मस्वरूपत्वमभिहितं पुनश्च पुरुषे ह वेत्यादिनात्म-
नस्त्रायनेवैराग्यजननाय गर्भवासादिदोषं प्रदर्श्य कोयमात्मेति वयमुपास्महे इत्यादिना
विचारेण तत्त्वंपदार्थपरिशोधनपुरःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शि-
तमित्यर्थः ६२ ॥

५५

112

नन्वन्नमयादिकोशेषु विचारितेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमि
त्याशंक्य प्रतीच एव ब्रह्मत्वात्पंचकोशविचारेणानंदात्मव्यक्तिः साक्षात्कारः आनंदाद्ध्येव ख
ल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंति इत्येवं ब्र
ह्मलक्षणमपि प्रतीच्येव योजितवानित्याह अन्नप्राणादिकोशेष्विति ६५ ननु ब्रह्मलक्ष
णस्यानंदात्मरूपेण प्रतीचि योजनेन तस्य ब्रह्मणः स्वलक्षणस्यानेन प्रतीचो भिन्नत्वादित्याशंक्या

अन्नप्राणादिकोशेषु सुविचार्य पुनः पुनः आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्षणमुच्यते ६५
सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्वलक्षणम् उक्त्वा गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितं ६६

नभेदः सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह सत्यं ज्ञानम
नंतमिति सत्यं ज्ञानमनंतं ब्रह्मणः स्वलक्षणं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद
निहितं गुहायां परमे व्योमन् इत्यनेन वाक्येन पंचकोशगुहाहितत्वेन तस्यैव प्रत्यग्रू
पत्वमभिहितमित्यर्थः ६६ ॥

एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्यार्थमाह मायोपाधिरिति पारोक्ष्यशबलः परो-
क्षत्वधर्मविशिष्ट इत्यर्थः एवं तटस्थलक्षणमभिधाय स्वरूपलक्षणमाह सत्याद्या-
त्मक इति सत्यमादिर्येषां ज्ञानादीनां ते सत्यादयः आत्मा स्वरूपं यस्य स तथा विधस्तत्प-
दाभिधस्तत्पदमभिधायकं यस्य स तत्पदाभिधः तत्पदवाच्य इत्यर्थः ७२ एवं पदार्था-

113

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः पारोक्ष्यशबलः सत्याद्यात्मक— स्त-
त्पदाभिधः ७२ प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता विरुध्येते यतस्तस्माल्लक्ष-
णा संप्रवर्तते ७३ ॥

वभिधाय वाक्यार्थावबोधनाय लक्षणावृत्तिराश्रयणीया इत्याह प्रत्यगिति प्रत्य-
क्परोक्षते सद्वितीयत्वेन सहिता पूर्णता इति मध्यमपदलोपी समासः सद्वितीयत्वपूर्ण-
ते चैकस्य वस्तुनो यतो विरुध्येते अतो लक्षणावृत्तिराश्रयणीयेत्यर्थः ७३ ॥

उक्तन्यायमितरासु श्रुतिष्वतिदिशति आवांतरेणेति सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ६७।
ननु महावाक्यविचारस्यापरोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य तद्विज्ञाना
चार्यैस्तथा प्रतिपादितत्वान्नैवमित्याह ब्रह्मापरोक्ष्येति आप्तवाक्याद्ब्रह्मापरोक्षत्व
ज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः ७० वाक्यवृत्त्यानुपपादनप्रकारं दर्शयति आलंबनतये

आवांतरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् सर्वत्रैव महावाक्यविचारेणापरोक्षधीः ६८ ब्रह्मापरोक्ष्यसिद्ध्यर्थं महावाक्यमितीरितं वाक्यवृत्तावतो ब्रह्मापरोक्ष्ये विमतिर्नहि ७० आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ७१ ॥

ति योऽन्तःकरणसंभिन्नबोधः अंतःकरणोपाधिकश्चिदात्मा अस्मत्प्रत्ययशब्दयोर्वर्त्तेते
तिज्ञानस्याहंशब्दस्य चालंबनतया विषयत्वेन भाति स तथाविधो बोधस्त्वंपदाभिध
स्त्वमिति पदमभिधायकं यस्य स त्वंपदाभिधः त्वंपदवाच्य इत्यर्थः ७२ ॥ ॥ ॥ ॥

पं· द·
अ·
४६

आत्मैकरसं वाक्यार्थं दर्शयति प्रत्यग्बोधो य इति यः प्रत्यग्बोधः सर्वांतरश्चिदात्मा आभा-
ति बुद्ध्यादिसाक्षित्वेन स्फुरति सोऽद्वयानंदलक्षणः द्वितीयरहितानंदरूपः परमात्मेत्यर्थः अ-
द्वयानंदरूपश्च तथाविधः परमात्मा प्रत्यग्बोधैकलक्षणश्चिदेकरसप्रत्यगात्मेत्यर्थः ४६
एवं मंडार्थबोधने किं स्यादित्यत आह इत्थमित्यादि त्वमर्थस्य प्रत्यगात्मनो ब्रह्मत्वं भ्रांतिसि-

प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ४६
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ४७
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ४८
एवं सति महावाक्यात्परोक्षज्ञानमीर्यते यैस्तेषां शास्त्रसिद्धांतविज्ञानशोभतेतरां

द्धं अब्रह्मरूपता तदर्थस्य ब्रह्मणश्च पारोक्ष्यं परोक्षज्ञानैकविषयत्वं च निवर्तेत ततोऽपि कि-
मिति पृच्छति यद्येवं किं ततः इति उत्तरमाह शृणु पूर्णानंदैकेति ४७ ननु समयवलेस-
म्यक्परोक्षज्ञानसाधनमागमलक्षणमतो वाक्यस्यापरोक्षज्ञानजनकत्वं कथमुच्यते इ-
त्याशंक्य सिद्धांतपरिज्ञानशून्योऽयमिति मनसि निधायोपहसति एवं सतीति एवं वदंतः सि।

सा च कीदृशीत्यत आह तत्त्वमस्यादिवाक्येष्विति भागलक्षणा भागत्यागलक्षणा भाग
त्यागलक्षणेत्यर्थः तत्र दृष्टान्तः सोऽयमिति सोऽयं देवदत्त इति वाक्यस्य यः सोऽयमिति पद
योर्यथा जहदजहल्लक्षणा वृत्तिराश्रिता नापरा न जहल्लक्षणा नाप्यजहल्लक्षणा तद्वद
त्रापीत्यर्थः ७४ ननु गामानयेत्यादिवाक्येषु लक्षणां विनापि वाक्यार्थबोधो दृश्य
ते तद्वदत्रापि किं न स्यादित्याशङ्क्याह संसर्गो वेति यथा लोके गामानयेत्यादिपदैः स्मा

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा सोऽयमित्यादिवाक्यस्थपदयोरिव नाप
रा संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखण्डैकरसत्वेन वाक्यार्थो विदुष
म्मतः ७५ ॥

रितानामाकांक्षासंनिध्यादिमतां गवादिपदार्थानामन्वयो वाक्यार्थत्वेन स्वीकृतः य
था वा नीलं महत्सुगन्ध्युत्पलमित्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थत्वं स्वीकृ
तं नैवमत्र महावाक्येषु संसर्गो विशिष्टो वान्यतरस्य वाक्यार्थत्वमभ्युपगम्यते किन्त्वख
ण्डैकरसत्वेनाखण्डस्वरूपमात्ररूपेण वाक्यार्थो विद्वद्भिरभ्युपेयतेऽतो लक्षणा
श्रयणीयेत्यर्थः ७५

पं॰ द॰ कू॰ ८

ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्यते इति शंक
ते अंतःकरणेति ८३ ब्रह्मणो निरुपाधिकत्वमसिद्धमिति परिहरति नैवमिति जीव
स्य ब्रह्मत्वोपपत्ताज्ञाने द्वयदर्शितस्य सोपाधिकवस्तुविषयत्वान्नहि विषयस्य ब्रह्मणोपि सोपा

अंतःकरणसंभिन्नबोधो जीवोपरोक्षतां अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः
८३ नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेहकैवल्यमुपाधिरनिवार
णात् ८४ अंतःकरणसाहित्यराहित्याभ्यां विशिष्यते उपाधिर्जीवभावस्य ब्रह्मता
याश्च नान्यथा ८५ ॥

धिकत्वं ज्ञानस्य सोपाधिकविषयत्वं च ज्ञेयस्य सोपाधिकत्वमंतरेणानुपपद्यते इति भा
वः तदेव कुतस्त्यत आह यावदिति ८४ ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं
वक्तव्यमित्याशंक्याह अंतःकरणेति जीवभावब्रह्मभावयोरंतःकरणसाहित्यराहि

ननु सिद्धांतस्तावत्तिष्ठतु वाक्यस्य परोक्षज्ञानजनकत्वं त्वनुमानसिद्धमिति शंकते आस्तामिति विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात् स्वर्गादिप्रतिपादकवाक्यवदित्यनुमानेन परोक्षज्ञानजनकत्वं सिद्धमित्यर्थः अनैकांतिकोयं हेतुरिति

आस्तां शास्त्रस्य सिद्धांतो युक्त्या वाक्यात्परोक्षधीः स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ८० स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ८१ बृहद्भिक्षुर्वनो मूलमपि नष्टमितीदृशं लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ८२ ॥

परिहरति नैवमिति दशमस्त्वमसीति वाक्ये वाक्यत्वे सत्यपरोक्षज्ञानजनकत्वस्योपलंभादिति भावः ८० किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगानपि न महावाक्यं परोक्षज्ञानजनकमित्यंगीकार्यमित्याह स्वतोऽपरोक्षेति ८१ उपपन्नमित्याशंक्याह बृहद्भिक्षुवनमिति ८२

पं. द.
प्र.
१८

ननु वेदान्तानामनन्यापेक्षया ब्रह्मबोधकत्वांगीकारेऽहंशब्दार्थस्य कूटस्थस्यापि त्यागप्रसंगा
दहं ब्रह्मास्मीति प्रमाणानधिकरणेन ज्ञानं नोदेतुमर्हतीति शंकते अहमर्थेति अहंश
ब्दार्थस्य सर्वस्यात्यक्तत्वान्नैवमिति परिहरति नैवमिति हि यस्मात्कारणाद्भागलक्षणया
जहदजहल्लक्षणया शास्त्राहंशब्दार्थैकदेशस्य जडांशस्य त्यागं ब्रूते: न कूटस्थस्यातोऽहं ब्र
ह्मास्मीति ज्ञानमुपपद्यत इत्यर्थः २८ अंशत्यागेन बोधनप्रकारमभिनीय दर्शयति अतः

अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः नैवमंशस्य हि त्यागो भागलक्षणयोदितः २८
अंतःकरणसंत्यागादवशिष्टे चिदात्मनि अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते २९
स्वप्रकाशोऽपि साक्ष्येष धीवृत्त्या व्याप्यतेऽन्यवत् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारि

करणेति ३० ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद्बुद्धिवृत्तिविषयत्वं न घटत इत्याशं
क्याह स्वप्रकाशोऽपीति अन्यवद्घटवदित्यर्थः स्वप्रकाशोऽहमित्येवं बुद्धिसंभवादिति भावः न
न्वेवमपसिद्धांत इत्याशंक्याह फलव्या चार्यैरपि वृत्तिव्याप्यत्वस्यांगीकृतत्वान्नापसिद्धांत इति परि
हरति फलेति फलं वृत्तिप्रतिबिंबितश्चिदाभासः तद्व्याप्यत्वमेवास्य प्रत्यगात्मनो निवारितं
स्वस्यैव स्फुरणरूपत्वादिति भावः ३० ॥

116

नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नाभावरूपस्य तद्विचित्वमित्याशंक्याव
वत्कार्यमनस्याययभेदहेतोरुपाधित्वेनस्वीकृतोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि
सत्वाद्भावत्वमेवोपाधितावमित्यभिप्रायेणापविह्नवति यथेति विधिर्भावरूपोंतःकरणसंबंधो
यथा तूपाधिः स्यात्तथा प्रतिषेधोभावरूपोंतःकरणवियोगो न किमुपाधिर्न स्यात्किं स्यादेवे
त्यर्थः तथापि भावाभावरूपत्वलक्षणमवांतरवैलक्षण्यं तत्तु प्रपंचेत्याशंक्यावांतरस्याकिंचि
त्करत्वेनानादरणीयत्वमित्यभिप्रायेणाह सुवर्णेति शृंखलप्रचारनिरोधकत्वांशेन

यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किं सुवर्णलोहभेदेन शृंखलत्वं न भिद्यते
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च वेदान्तानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ॥

नानुपपन्नं सुवर्णत्वलोहत्वादिवैलक्षण्यं ग्रहणानादरणीयत्वमिहेत्यर्थः ॥ ९५ विधेति वि
निषेधयोरपि ब्रह्मणो योपायत्वेन ब्रह्मोपाधित्वं दृष्टमपि तं विधिनिषेधयोरुभयोरपि ब्रह्म
बोधोपायत्वमाचार्यैर्निरूपितमिति दर्शयति अतद्व्यावृत्तिरूपेणेति तच्छब्देन ब्रह्माभि
धीयते अतच्छब्देनानात्मवस्तु तद्व्यावृत्तिरूपेण ब्रह्मणो नेति नेतीत्यादिना रूपाद्युपायस्तेन साक्षा

पं॰ द॰
घ॰
७५

ननु वृत्तिगतवृत्तीनां चिदाभासवैशिष्ट्यस्वभावात् तदादिष्विव ब्रह्मण्यपि फलव्याप्तिर्वक्त
व्येत्याशंक्याह स्थितोऽप्यसाविति यद्यपि घटाद्याकारवृत्तिवत् ब्रह्माकारवृत्तावपि चि
दाभासोऽस्ति तथापि नासौ ब्रह्मणो भेदेन भासते किंतु प्रचण्डातपमध्यवर्तिप्रदीपप्रभावत्त
दैकीभूतत्वात्तिरोहित इति अतो न स्फुरणलक्षणातिशयजनको ब्रह्मणीत्यर्थः २५४ ननु ब्र

स्थितोऽप्यसौ चिदाभासो ब्रह्मणैकीभवेत्परं नन्तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादि
वत् २५४ अप्रमेयमनादिं चेत्यत्र श्रुतेदमीरितं मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता

117

ह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिरस्तीति यदुक्तं तत्र किं प्रमाणमित्याशंक्यागमः प्र
माणमित्याह अप्रमेयमिति निर्विकल्पमनंतं च हेतुदृष्टान्तवर्जितं अप्रमेयमनादिं च य
ज्ज्ञात्वा मुच्यते बुध इत्युत्तरस्यामृतबिन्दूपनिषदाऽप्रमेयशब्देन फलव्याप्तिराहि
त्यमुक्तं मनसैवेदमाप्तव्यं नेह नानास्ति किंचनेति कठवल्ल्यां धीव्याप्यता श्रुतावृत्तिव्याप्य

पंचदशी टी॰ ध्या॰ ७५

आत्मनि फलव्याप्त्यभावं दर्शयितुमनात्मनो घटस्य फलेन च व्याप्तत्वं दर्शयति बुद्धितत्स्थे-
ति उभयव्याप्तेः प्रयोजनमाह तत्राज्ञानमिति तत्र तयोर्बुद्धिचिदाभासयोर्मध्ये धिया बुद्धि-
वृत्त्या प्रमाणभूतयाऽज्ञानं नश्यति ज्ञानाज्ञानयोर्विरोधात् आभासेन चिदाभासेन घटः
स्फुरेत् जडत्वेन स्वतः स्फुरणायोगादिति भावः ९१ इदानीमात्मनि तत्तौ वैलक्षण्यं दर्शयति

बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥९१
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते ॥९२ च
क्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा न दीपदर्शने किंतु चक्षुरेकमपेक्ष्यते ॥९३ ॥

ब्रह्मण्येति प्रत्यग्ब्रह्मणोरेकत्वस्याज्ञानेनावृतत्वात्तस्याज्ञानस्य निवृत्तये वाक्यजन्याहं
ब्रह्मास्मीति वृत्तिसमाकारार्थार्थं वृत्तिव्याप्तिरपेक्षिता स्वस्यैव स्फुरणरूपत्वात्तस्य स्फुरणाय चि-
दाभासो नापेक्ष्यते अत उपयुज्यमानोपि चिदाभासो नापेक्ष्यत इत्यर्थः ९२ उक्तमर्थं दृष्टान्तेन प्र-
दर्शनेन विशदयति चक्षुर्दीपाविति [illegible] घटादेर्दर्शने चक्षुर्दीपाभावव्यपेक्ष्ये

न दीपदर्शने तु तथा न किंतु चक्षु-
रेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञानना-
शायेति पूर्वेण संबंधः ९३ ॥

आचार्यैः केनवाक्येनाभिहितमित्याशंक्य तद्वाक्यं पठति अहंब्रह्मेति ९८ ननु वाक्य
प्रमाणजनितज्ञानस्यादार्ढ्ये किं कारणमित्याशंक्याह बाढमिति हि यस्मात्कारणात् श्रुत्यने
कता श्रुतीनां नानात्वमेको हेतुः अर्थस्याप्यद्वैकरसस्यालौकिकत्वेनासंभावितत्वमपरं च वि
परीतभावना च पुनः कर्तृत्वाभिमानरूपा तृतीया इत्येवंविधा दार्ढ्यस्य हेतवो बाढं संतीति स
र्वेषां विद्यंति अतोऽपरोक्षानुभवदार्ढ्याय श्रवणादिकं कर्तव्यमिति भावः ९९ एवं त्रि

अहंब्रह्मेतिवाक्यार्थबोधो यावन्न दृढीभवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादि
कं ९८ बाढं संति ह्यदार्ढ्यस्य हेतवः श्रुत्यनेकता असंभाव्यत्वमर्थस्य विपरीता च भा
वना ९९ शाखाभेदात्कामभेदाच्छ्रुतं कर्मान्यथान्यथा एवमत्रापि माशंकीत्यतः श्रव
णमाचरेत् १००

विधादार्ढ्यहेतूनुपन्यस्य श्रुतिनानात्वप्रयुक्तादार्ढ्यनिवृत्तये श्रवणावृत्तिः कर्तव्येत्या
ह शाखाभेदादिति यथा शाखाभेदात्कर्मभेदः श्रूयते बह्वृचैर्हौत्रं क्रियते यजुःशाखा
ध्वर्यवं साम्नौद्गीथमिति यथा वा कामभेदात् कारीर्या वृष्टिकामो यजेत् शतकृष्णलमा
युष्कामः इत्यादिकामभेदः श्रुतः एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशंकायां तन्निवार

आत्मानं चेद्विजानीयानीयादिति मंत्रेणापरोक्षज्ञानशोकनिवृत्त्याख्ये जीवगतमवस्था
द्वयमभिधीयत इत्युक्तं अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवस्येत्युक्तमा
त्मानं चेदिति श्रुतिरित्यनेन श्लोकेन तत्र कियतांशेनापरोक्षज्ञानमुच्यत इत्याकांक्षायामा
ह आत्मानमिति ब्रह्मात्मव्यक्तिं सत्यादिलक्षणब्रह्माभिन्नप्रत्यगात्मेति स्वरूपमुल्लिख्य
विषयीकृत्य यो बोधो जायते ब्रह्माहमस्मीति सोऽभिधीयते अनेन वाक्येनेत्यर्थः ॥६॥ ननु।

आत्मानं चेद्विजानीयादयमस्मीति वाक्यतः ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोऽभि
धीयते अस्त्वेषोऽपरोक्षोऽत्र महावाक्यात्तथाप्यसौ न दृढः श्रवणादीनामाचार्यैः पु
नरीरणात् ॥

नहि पूर्वोक्तरीत्या सकृद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशादि
त्यादौ विहितं श्रवणादिवर्तनमनुष्ठेयं स्यादित्याशंक्य ज्ञानदार्ढ्याय तदावर्तनानु
ष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह अस्त्वेष इति अत्र ब्रह्मात्मनि विषये महा
वाक्यस्य कृतविचारसहितादपरोक्षबोधो लभ्यत एवं तथापि नासौ दृढः अतः श्रव
णाद्यावर्तनीयं [illegible] मपि श्रवणाद्यभिधायिवर्तना २
नादित्यर्थः नानदार्ढ्या यत्नतदर्थ्यो लभ्यते ॥७॥

पं॰द॰
ध्या॰
२१

इदानीं विपरीतभावनां तन्निवृत्त्युपायं च दर्शयति बहुजन्मदृढाभ्यासादिति सार्द्धेन वि-
परीतभावनानिवृत्तिः कथं यदैकाग्र्यं ब्रह्मोक्तं तत्कुतो जायत इत्याशंक्याह तत्त्वोपदेशादि-
ति एतदैकाग्र्यं ब्रह्मोपदेशात्प्रागेव सगुणब्रह्मोपासनमाङ्गवत्तभवेदित्यर्थः ३५ नन्वेतत्कु-

बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि
३ विपरीता भावनेयमैकाग्र्यात्सा निवर्तते तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात्
४ उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिन्तिताः प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भव
तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधा ६ ॥

तोऽवगतमित्याशंक्योपासनाविचारस्य वेदान्तशास्त्रे कृतत्वादित्याह उपास्तय इति अत्रोपा-
सितकस्य कुतस्तज्जन्मेत्यत आह प्रागनभ्यासिन इति ब्रह्माभ्यासं कीदृशमित्याकांक्षायामा-
ह तच्चिन्तनमिति ६ ॥ ॥ ॥ ॥

२१

किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह वेदांतानामिति सर्वासामप्युपनिषदामुप
क्रमोपसंहारादिपर्यालोचनया ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यं यावं पर्यणमुद्दं पर्यवसा
पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः । एवंविधं श्रवणं कुत्र निरूपितमित्यत आ
ह समन्वयेति एतच्छ्रवणं समन्वयाध्याये सूत्रकृद्व्यासादिभिर्विनिश्चयः । अर्थसंभावना।

वेदांतानामशेषाणामादिमध्यावसानतः । ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भ
वेत् । समन्वयाध्याय एतत्सूत्रितं धीस्वास्थ्यकारिभिः तर्कैः संभावनार्थस्य द्वितीया
ध्याय ईरिता २ ॥

निवृत्तिहेतुर्माननं तु द्वितीयाध्याये निरूपितमित्याह धीस्वास्थ्येति प्रमेयगगतानुपप
त्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्तिशब्दाभिधेयैरर्थस्य संभावना संभावित
त्वानुसंधानं द्वितीयाध्याये निरूपितमित्यर्थः ॥ ॥

पं.द.
प्र.
२२

एवमेकाग्रप्रतिपादिकां श्रुतिमभिधाय स्मृतिमाह अनन्या इति ये जना अनन्या अहं ब्रह्मास्मी
ति ज्ञानेन मदभिन्नाः सन्तस्तं चैव मां चिन्तयन्तः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते तेषामहं यथ
वर्तन्ते नित्याभियुक्तानां सदा मच्चित्तानां तेषामहं तदात्मत्वेनानुसन्धीयमानो हि योगक्षेमम
लब्धलाभस्य च परिरक्षणं च यो योगक्षेमो वहामि सम्पादयामीत्यर्थः ८ उदाहृतयोः श्रुतिस्मृत्यो
स्तात्पर्यमाह एतेष्विति एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्रप्र

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं एते
श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः विधत्ते विपरीताया भावनायाः क्षयाय हि यद्यथा
वर्तते तत्तस्य तत्त्वं हित्वान्यथात्वधीः विपरीता भावना स्यात्पित्रादावरिधीर्यथा ९ ॥

तिपादयत इत्यर्थः ९ ननु देहाद्यात्मत्वबुद्धेर्जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमित्या
शंक्य तल्लक्षणयोगादिति दर्शयितुं तस्या लक्षणमाह यद्यथेति यद्वस्तु शुक्त्यादि यथा ये
न शुक्त्यादिरूपेण वर्तते तत्तस्य तत्त्वं शुक्त्यादिरूपत्वं परित्यज्यान्यथात्वम् अन्यत्वपरं जतादिरू
पत्वस्य धीर्ज्ञानं विपरीतभावना स्यात् अतस्मिंस्तद्बुद्धिरियावत् तामुदाहरति पित्रादाव

120

२२

एतदेकपरत्वं विशदयितुं श्रुतिमाह तमेव धीरो विज्ञायेति धीरो ब्रह्मचर्यादिसाधनसंप
न्नो ब्राह्मणो ब्रह्मवित् भिक्षुर्मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानं वेदान्तविज्ञायं शास्त्राचार्याभ्याम्।
बोधपर्यवसिततत्त्वज्ञानात्मप्रज्ञां प्रज्ञामेकत्वसाक्षात्कारसंततिरूपमेकाग्र्यं कुर्वीत संपादये
त् अनात्मगोचरं बहूंश्च शब्दान्नानुस्मरेत् ध्यानेनाभिधानमप्युपलक्ष्यते नाभिदध्याच्च।

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ॥२१॥

अनात्मगोचराञ्छब्दान् ध्यानेन वा इति विग्लपनानुपपत्तेः कुत इत्यत आह वाचो विग्लापनं हि तदिति हि
यस्मात्तदभिधानं अन्येन स्मरणमप्युपलक्ष्यते इति वाच मनसोऽप्युपलक्षणं विग्लापनं विश्रा
यनीति विग्लापनं श्रमहेतुः अयमभिप्रायः इतरशब्दानां संध्यानेन मनसः श्रमो भवति तदभिधा
नेन तु वाच इति

दृष्टफलकत्वात्तत्र नियमः कश्चिदस्तीत्याह अन्यथेति अन्यथा नियमं विनेत्यर्थः
नैवदेतमाह दृष्टार्थत्वेनेति भुक्तिवदिति दृष्टार्थभोजने नो नियमाः श्रुतिस्मृत्यो-
रुपलभ्यन्त इत्याशयेनाह भुञ्जानाविति तदेवोपपादयति भोक्तृभिः क्षुन्निवृत्त्यर्थं जपक-
र्तॄणामिव नियमेन न भुज्यते अपितु यथावत् योग्यं पश्यन्ति तथा भोजनं कुर्वन्ती-
त्यर्थः ॥ १४ ॥ एतदेव प्रपञ्चयति अश्नातीति अश्नाति वा न वेति अश्नाति वा न सौ कदाचिद्भुङ्क्ते

अन्यथेति विजानीहि दृष्टार्थत्वेन भुक्तिवत् भुञ्जते जपवत्केन न कश्चिन्नियन्तः
क्वचित् ॥ १४ ॥ अश्नाति वा न वाश्नाति भुङ्क्ते वा स्वेच्छयान्यथा येन केन प्रकारेण क्षुधा-
मपनिनीषति ॥ १५ ॥

न वाश्नातीति तस्मिन्नश्नाति त्वया विस्मारकत्वादि वेष्टव्यमत्र ।
अश्नात्येव कालं जयति अन्यथा वा तिष्ठन् यथागच्छन् शयानो वाथ यदृच्छया भुङ्क्ते एवं
येन केन प्रकारेण तात्कालिकीं क्षुधामपनेतुमिच्छति अयमभिसन्धिः दृष्टार्था
निवृत्तिलक्षणा दृष्टफलाय भोजनकार्यमेव न नियमात् परलोकहेतवः इति ॥
१५ ॥ ॥ १५ ॥

121

उक्तं तत्त्वं पृष्ठे नेयो जयति आत्मा देहादेरिति अथ आत्मा वस्तुतो देहादिति अथात्मा
वस्तुतो देहादिभिन्नः इदं जगच्च मिथ्या एवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहादि
रूपत्वबुद्धिः सत्यत्वबुद्धिः सत्यत्वबुद्धिश्च यामा विपरीतभावनाऽस्त्यर्थः ॥ पूर्वमेकाग्र
त्मानिवर्तनतऽनिश्चामान्येनोक्तमर्थं विशेषाकारेणाह तत्त्वभावनयेति आत्मदेहाद्य
न्तत्वजगत्सत्यत्वधीरूपा विपरीतभावना तत्त्वभावनया आत्मानो देहाद्यतिरिक्तत्व

आत्मा देहादिभिन्नोऽयं मिथ्या चेदं जगत्तयोः देहात्मत्वसत्यत्वधीर्विपर्ययभावना
॥ तत्त्वभावनया नश्येत्स्वात्मा देहातिरिक्तता आत्मनो भावयेत्तद्वन्मिथ्यात्वं जगतोऽनि
शं १२ किमत्र तत्जपवन्मंत्रैर्ध्यानवच्चात्मभेदधीः जगन्मिथ्यात्वधीश्चात्र भाव्यावश्यं
स्यादुतान्यथा १३

स्य जगतो मिथ्यात्वस्य च भावनया निरन्तरं ध्यानेन नश्येत् अत
आत्मनो देहाद्यतिरिक्तत्वं देहाद्यं जगतो मिथ्यात्वं च सदा भावयेदित्युक्तं १२ तत्र ज
पादावितर्नियमापेत्वा लिव नवेति शंकते किमत्रेति आत्मभेदधीरात्मनो देहा
दिभ्यो विभिन्नत्व[illegible]नाध्यानादिवत्कि

पे. ८.
स.
२४

ननु ध्यानस्य ध्येयचिन्तामात्रात्मकत्वात्तत्र को निर्वेधप्रयत्नाशंक्य ध्याने निर्वेधं दर्शयितुं
ध्यानस्वरूपं तावदाह स्थितिं प्रत्ययेति चित्तो हि हि: सर्वचिन्तास्थितिं प्रयत्नाद्देवतादि
स्थितिंगोचराणां प्रत्ययानां यत् स्थानं तत्प्रत्ययमविच्छिन्नतया वर्तमानत्वात् तद्ध्यानं तेन निर्वि
शेषतत्त्वविज्ञानीयप्रत्ययस्य तन्मयत्वात् तद्ध्यानमित्युच्यते एवं ध्यानस्वरूपं निरूप्य तत्रापि निर्
वेधं दर्शयति तत्रेति स्वदायकादिरूपलक्षणं सर्वगाद्रेकत्वलंभादावयन्त्रेयत्वात्

स्थितिं प्रत्ययसंतानस्य मन्यानि तिष्ठति स्थिरः ध्यानं तत्रापि निर्वेधो मनसश्चंचलात्मकः
१९ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं २०
अप्यचिंत्यपानात्म तन्तः स्वमेवेह तन्मनाद्यपि अभ्यासवश्यतानाम् यथा विषमस्थितानां निग्रहः २१

येयद्दृढं इति भावः १९ मनश्चांचल्यं दर्शयति गीतावाक्यं प्रमाणयति चंचलमिति प्रमाथि
प्रमथनशीलं प्रबलं इन्द्रियाणां आकुलत्वकारणं बलवत् स्वमर्थमनियाह्यमिति दृढं दृढ
सत्त्वमतिविषयेभ्यः लभ्यमानत्वात् इंद्रियग्रामः बाधितुं अशक्यः अतस्तस्य मनसो निग्रहो वायो
निग्रहवत्सुदुष्करं २० मनसो निग्रहे वचोवाक्यमपि प्रमाणयति अभ्यासे

२४
ति २१

122

कृष्यादीनां तत्त्वानुसंधानविघातित्वेन त्याज्यत्वे भोजनादेरपि तथात्वात्तदपि त्याज्य
मेवेत्याशंक्याह अनुसंदधतेति कृतं तं कुलमतमाह अत्यन्तेति विक्षेपाभावोऽपि कुतो
त्याह ग्रासमुपनतेति २५ ननु तदानीं विक्षेपाभावेऽपि विस्मृतिस्तदुक्तावात्मतत्त्वस्यार्थहानिः
स्यादित्याशंक्याह नतेति उत्पत्तेः सहैतदर्थस्य तत्त्वमाह किंत्विति विस्मरणासंभवि

अनुसंदधतैवात्र भोजनादेः प्रवर्तितुं शक्यते तत्र विक्षेपाभावादसुप्रवृत्तः स्फुटे
२५ तत्त्वविस्मृतिमात्रान्नानर्थः किंतु विपर्ययात् विपर्ययेन नाकालेऽस्ति कृटिति स्मरतः
क्वचित् २६ तत्त्वस्मृतेरवसरो नास्त्यभ्यासशालिनः प्रत्युताभ्यासघातित्वाद्वस्तुतत्त्व
मुपेक्ष्यते २७

पर्यवसानेऽपि स्यादित्याशंक्याह विपर्यये तु इति २६ ननु भोजनादिवत्
तस्येव तर्काद्यभ्यासवतस्तस्यापि तत्त्वस्मरणं किं न स्यादित्याशंक्याह तत्त्वस्मृतेरि
ति न केवलं तत्त्वानुसंधानावसराभाव एव किंतु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्या
सविरोधित्वात्तदानीं स्मरणमपि तत्त्वविशदं प्रत्युपेक्ष्यत इत्याह प्रत्युतेति २७ ॥ ॥

पं॰ द॰
स॰
२६

ननु तत्त्वविदः संसारासारतां जानतः कृतकृत्यत्वप्रवृत्तिः कथं न स्यादित्याशंक्य प्रारब्धस्यावश्यं
भाविफलत्वाद्भोगेन तत्त्वयाथात्म्यहानिरित्याह मिथ्यात्वेति २१ नेत्यानाचारोपि ग्रहः।
तिः स्यादित्याशंक्याह अतिप्रसंगो माशंक्य इति प्रारब्धवशादेवातिप्रसंगोपि स्यादि
त्याशंक्याङ्गीकरोति अस्त्विति २२ ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मण्यपगमो

मिथ्यात्ववासनादार्ढ्ये प्रारब्धक्षयकांक्षया अक्लेशेन नः प्रवर्तेन स्वस्वकर्मानुसा
रतः २१ अतिप्रसंगो माशंक्यः स्वकर्मवशवर्तिनां अस्तु वा केन शक्येत कर्म वारयि
तुं वद २२ ज्ञानिनोऽज्ञानिनश्चात्र समे प्रारब्धकर्मणि न क्लेशो ज्ञानिनो धैर्यान्मू
ढः क्लिश्यत्यधैर्यतः २३ मार्गे गन्त्रोर्द्वयोः श्रान्तौ समायामप्यदूरतां जानन्धैर्या
द्द्रुतं गच्छेदन्यस्तिष्ठति दीनधीः २४॥

कथं तयोः समाने तयोः कुतो वैलक्षण्यसिद्धिरित्याशंक्याह ज्ञानिन इति २३ न
त्र दृष्टान्तमाह ज्ञानिन इति, मार्गे गन्त्रोरिति २४॥ २६

124

पं. ८.
मू.
२८

ननु तत्त्वविदोऽसंसारनिमित्तकत्वापत्तेः तत्त्वज्ञानवैयर्थ्यापातादित्याशंक्याह नायं लो
क इति अयं लोको ज्ञानाधिकरणः किन्तु भिन्नो वैमनस्ततापात्मकः संसारस्तेन न भवति
किं त्वत्र संसारे विरक्ततायामसक्तिरहिततादात्म्यं तापताभावप्रकिमाह भ्रान्तिज्ञानेति हि य
स्मात्कारणात्संसारिकस्तापो भ्रान्तिज्ञाननिदानः भ्रान्तिज्ञानकारणकः स्मृता इति।

नायं लोकः प्रोक्तसंसारलाभः किंतु विरक्तता भ्रान्तिज्ञाननिदानो हि तापः संसारकः स्मृतः
४५ विवेकेन परिक्लिश्यन्नल्पभोगेन तृप्यति अन्यथानन्तभोगोऽपि नैव तृप्यति कर्हिचि
त् ४६ न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिव
र्द्धते ४७ ॥

वार्थे अयं तु विवेकज्ञानमूलत्वान्न तथाविधः इत्यर्थः ४५ अयं लोकः प्रोक्तोऽवगम्यत
इत्याशंक्याकामनिवर्तकत्वाद्विवेकमूलत्वादित्याह विवेकेनेति विवेकिनः इवाविवेकेना
पि भोगेन न तृप्तिः स्यात् अतो विवेकोऽप्रयोजक इत्याशंक्य भोगस्यानर्थमिदं तत्त्वाभा
वप्रतिपादिकां श्रुतिं न जातु काम इति ४७ ॥ ॥

२८

126

पं.द.
त.
२५

निगृहीतस्य मनसः स्वल्पेनापि भोगेन तृप्तिर्भवतीत्यत्र दृष्टान्तमाह बद्धशत्रुरि
ति ५० ननु प्रारब्धकर्मणः प्राबल्याद्भोगेष्विच्छा भवेदित्यत्र कर्मवशादिच्छा भवतु।
दीपकेन तदनुपपन्नम् इच्छादिविघातिनि विवेके जाग्रति सति इत्यत्र स्वभावादिति कि
श्रुते विवेक इति ५१ दोषदर्शनेन सम्यगिच्छाजन्म सम्भवति प्रारब्धस्य नानाप्रका

बद्धशत्रुर्महीपालो ग्राममात्रेण तुष्यति परैरबद्धो नाक्रान्तो न राष्ट्रं बहु मन्यते ५०
विवेके जाग्रति सति दोषदर्शनलक्षणे कथमारब्धकर्मापि भोगेच्छां जनयेत्।
क्षमते ५१ नैव दोषो यतोऽनेकविधं प्रारब्धमीक्ष्यते इच्छाऽनिच्छा परेच्छा च प्रारब्धं त्रिवि
धं स्मृतं ५२ अपथ्यसेविनश्चोरा राजदाररता अपि जानन्त एव स्वानर्थमिच्छन्त्यारब्धकर्म
तः ५३

रब्धादिति परिहरति नैव दोष इति नानाप्रकारत्वमेव दर्शयति इच्छानि
च्छेति इच्छाजनकमनिच्छया भोगप्रदं परेच्छया भोगप्रदं च त्रिविधमित्यर्थः ५२॥
इच्छाप्रारब्धं दर्शयति अपथ्यसेविन इति ५३ ॥

३८

विवेकमल्लस्य भोगस्य तन्निहेतत्वमनुभवसिद्धमित्याह परिज्ञायेति अयं भोगः एता
वानेव प्रयासमात्र इत्येवमनुभवपूर्वकं चेद्दुःखबुद्धिर्देहे प्रपञ्चेऽस्त्यर्थः ननु तस्या
हेतुर्भोगस्य विवेकाद्द्वयं न भोगानेव तत्कथं तत्तुच्छकरत्वमित्याशङ्काय हृदकारि विशेषपरिज्ञा
द्विपरीतकार्यकरत्वं लोके दृष्टमित्याह विज्ञायेति अयं चोरः अविज्ञातो नेनसह वर्त
मानस्य पुरुषस्य न विनाभवति किं तु मित्रं मामनो ऽस्त्यर्थः ५८ ननु कामना स्वसन्तान्स्य।

परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरताम् ५
८ मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु
मन्यते ५९

ननु कथं स्वल्पभोगेन तुष्टिः स्यादित्याशङ्क्याभिहितस्य मनसो निगृहीतस्या
तथात्वा इव तत्तुष्टिरित्याह मनस इति निगृहीतस्य योगाभ्यासेन वशीकृतस्य मनसो
ल्पकोऽपि स्वल्पोऽपि लीलाभोगः लीलानुभवो योऽस्ति स एव लब्धविस्तारं अशान्तं वाङ्मल्पन
मेव भोगं क्लिष्टत्वात्तापत्रयकृतात् बहु मन्यते अधिकत्वेन जानातीत्यर्थः ५९ ॥ ॥

प्रारब्धस्यापिहानार्थेनेनतस्यविहारासमर्थस्येश्वरस्यानीश्वरत्वप्रसंगइत्याशंक्याह
नचेश्वरत्वमिति कृतइत्यतआह यतएवप्रयत्नमिति यतः कारणाद्देहादेःखादीना
मवबंधभावितापिईश्वरेणैवनिर्मिताः तेनानीश्वरत्वप्रसंगइत्यर्थः ५७ पूर्वसूत्र
पेचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धंवक्तुमारभते प्रश्नोत्तराभ्यामिति अ

नचेश्वरत्वमीश्वरस्येष्टापनेनावगम्यते: अवबंधभावितापीच्छामीश्वरेणैवनिर्मिता ५७
प्रश्नोत्तराभ्यामेवैतत्कथ्यतेऽर्जुनकृष्णयोः अनिच्छापूर्वकंचास्तिप्रारब्धमितितच्छृ
णु ५८ अथकेनप्रयुक्तोयंपापंचरतिपूरुषः अनिच्छन्नपिवार्ष्णेयबलादिवनियो।
जितः ५९

निच्छापूर्वकेचप्रारब्धमस्तित्येतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेवज्ञापयतेऽनियोजनता
तद्वचनानांयाशिष्टमभिप्रायावेकरोति तच्छृणोति ५८ तत्रार्जुनस्यप्रश्नेतावद्दर्श
यति अथकेनेति हेवार्ष्णेयहेसिसवृष्णि अयंपूरुषः केनप्रयुक्तः प्रेरितःसन् अनि
च्छन्नपिइच्छामकुर्वन्नपिराज्ञावलान्नियोजितइवपापंचरतिआचरतीति ५९

पं. द.
स्रं.
३१

त्वदानीं परेच्छाप्रारब्धमप्यस्तीत्याह । नातिहृष्टन इति अनिष्टेनोपि न भवंति दुःखिनोपि न भवंति किंतु परदाशिषसंफलानां तत्स्नातीत्यर्थमेव स्यात् दुःखे भग्ना भवंति अत स्मात्त्वादीनामिह भोगहेतुभूतपरेच्छापूर्वकप्रारब्धमस्तिमित्यर्थः अत एव दोषदर्शनेस्य तदपि प्रारब्धस्यापरिहार्यत्वात् तस्येच्छाजनकत्वेनावश्यत्वं शङ्कोती

नातिहृष्टो न चोद्विग्नः परदाशिषसंफला स्यात् दुःखे भज्यतेऽप्येतत्तत्परेच्छाप्रवृत्तकर्मणि ॥ ६२ कथं तर्हि किमिच्छन्नित्येवमिच्छानिषिध्यते नेच्छानिषेधः किंतिच्छाबाधो भर्जितबीजवत् ६३ ॥

129

ति ६२ ननु तत्त्वविदोपीच्छाङ्गीकारे किमिच्छन्निति श्रुतिविरोध इति शंकते कथं त
र्हीति किमिच्छन्नित्यनेन वाक्येन कथमिच्छाभावो वर्णित इत्यर्थः ज्ञाने नेच्छाभावो
भिधीयते किंतु सत्यामपि तस्यां समर्थप्रवृत्तिजनकत्वं नास्तीति बोध्यत इति परिह
रति नेच्छानिषेध इति स्वरूपेण सत्यामपि तस्यां सामर्थ्यराहित्ये दृष्टांतमाह भर्जिते

३१

माविनश्यत्विति अयंभोगोमाविनश्यतु एवंतदुत्तरोत्तरंवर्द्धतांविघ्नाश्चैनंमाग्रसि वयंमाकुर्वंतुअस्मादेवभोगाद्दृढंयत्नाःकृतार्थाअस्मिन्नेवभूयोभवति नतत्सुख मननमित्यर्थः ६७ प्रसंगाद्दृश्यशब्दार्थोपायमाह यद्भावीति यद्भविनश्येत न्नभवेदेवभविता यद्येवंचेन्नतदन्यथानभवेदेवेत्येवंभूतपश्चिंताविषघ्नः इदंमेऽस्य:

माविनश्यतयंभोगोवर्द्धतामुत्तरोत्तरं माविघ्नाःप्रतिबन्धंतु यत्नोह्यस्य
स्मादितिभ्रमः ६७ यद्भाविनतद्भाविभावि चेन्नतदन्यथा इतिचिन्ता
विषघ्नोयंबोधोभ्रमनिवर्तकः ६८ ॥

कदाभविष्यति इदमनिष्टंकदानिवर्त्स्यति इत्येवमादिचिन्तैव विषमिव
स्वसंस्पर्शरूपस्यनाशहेतुत्वात्तद्विघ्नं इदंचिन्ताविषंहन्तीति चिन्ताविषघ्नः एवं
भूतोयोबोधःसोयंभ्रमनिवर्तकः एवोक्तस्यभ्रमस्यनिवर्तकइत्यर्थः ६८ ॥

130

संक्षेपेणोक्तमर्थं प्रपंचयति यथा भर्जितानि बीजानि स्वरूपेण विद्यमानान्यपि नांकुरादिकार्यकराणि भवंति तथा विद्वदिच्छा स्वरूपेण विद्यमानापि बाध्यमानपदार्थस्यासत्यत्वज्ञानेन बाधितत्वान्न व्यसनादिकार्यकृदित्यर्थः ६४ ननु तर्हि विदुष इच्छैव नांगीकर्तव्या फलाभावादित्याशंक्याफलाभावो विदुषो भोगलक्षणफलसद्भावादि

भर्जितानि तु बीजानि संत्यकार्यकराणि च विद्वदिच्छा तथेष्टव्यासत्वबोधान्न कार्यकृत् दग्धबीजमरोहेपि भक्षणायोपयुज्यते विद्वदिच्छाप्यल्पभोगं कुर्यान्न व्यसनं बहु ६५ भोगेन चरितार्थत्वात्प्रारब्धं कर्म हीयते भोक्तव्यसत्यताभ्रांत्या व्यसनं तत्र जायते ६६ ॥ निसदृष्टांतमाह दग्धबीजमिति दग्धं भर्जितमिति यावत् व्यसनं विपदादिरूपं बहु नेत्यर्थं व्यसनं विपदि भ्रंशे दोषे कामजकोपज इत्यभिधानात् ६५ ननु कर्मैव भोगहेतुः स कथं कर्मनाशं जनयेदित्याशंक्याह भोगेनेति प्रा[illegible]मित्यर्थः कुतो हि व्य

ननु विद्वदविदुषोरुभयोरपि भोगित्वाविशेषेण कस्य व्यसनमपरस्य तु तदभावे एतत्
कुत इत्याशंक्याविपरीतज्ञानसत्त्वाभ्यां तत्सिद्धिरित्याह स्वप्नेऽपि भोग इति बुद्धवान् ज्ञा-
नवानज्ञानी तत्पर्यायः भ्रान्तेः कथं व्यसनहेतुत्वमित्यत आह प्रारब्धकार्यस्येति ६९

स्वप्नेऽपि भोगे व्यसनं भ्रान्तो गच्छेन्न बुद्धवान् प्रारब्धकार्यसंकल्पाद् भ्रान्तस्य
व्यसनं बहु ६९ मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् भुंजानोऽपि न संक-
ल्पं कुरुते व्यसनं कुतः ७० स्वप्नेन्द्रजालसदृशमचिन्त्यरचनात्मकं दृष्टनष्टं
जगत्पश्यन्कथं तत्रानुरज्यति ७१ स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन्स्वजागरं
चिन्तयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ७२ ॥

विवेकिनस्तदभावं दर्शयति मायामयत्वमिति ७० ननु मायामयत्वबोधे सत्या-
पि भोगस्य तदानीं तन्नस्यत्वहेतुत्वात्कुतस्तदास्थोपसंहार इत्याशंक्याव बहुविधादो-
षदर्शनादित्याह स्वप्नेन्द्रजालेति ॥ ॥

एवं विभिन्नविषयत्वं प्रदर्शयन्प्रयोगमाह विद्यारब्धे इति विद्याप्रारब्धकर्मणी एव
स्पष्टं न विरुद्ध्येते विभिन्नविषयत्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः भोगस्य मि
थ्यात्वज्ञानं च भोगबाधकं न भवति इत्येतत्तु कुतः दृष्टमित्याशंक्याह जानद्भिरिति ऐन्द्र
जालो विनोदः इन्द्रजालसंबंधिचमत्कारविशेषो जानद्भिरप्यवलोक्यत इति प्रसिद्ध
मित्यर्थः १६ किंच विद्याप्रारब्धकर्मणोर्विरोधोऽस्तीति वदन्तं पृच्छति किं प्रारब्धकर्म

विद्यारब्धे विरुद्ध्येते न भिन्नविषयत्वतः जानद्भिरप्यैन्द्रजालो विनोदो दृश्य
ते खलु १६ जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि तदा विरोधि विद्याया भोग

विद्याविरोधीत्युच्यते उत विद्याप्रारब्धकर्मविरोधि मात्रान्न सत्यता ११ ॥

नीति नाद्य इत्याह जगत्सत्यत्वमिति प्रारब्धं कर्म जगतो भोग्यजातस्य सत्यत्वमबाध्य
त्वमापाद्य यदि भोजयेज्जीवस्य सुखदुःखे दद्यात्तदा विद्याविषयस्य मिथ्यात्वस्यापहा
राद्विद्याविरोधि स्यान्न त्वेतथा करोति किंतु भोगमेव प्रयच्छतीति अतो न विद्याविरोधि।

132

ननु विद्वदविदुषोरुभयोरपि भोगित्वाविशेषे कस्य व्यसनमपरस्य तु तन्नेत्येतत्
कृत इत्याशंक्याविपरीतज्ञानसत्त्वाभ्रान्तत्वसिद्धिरित्याह स्वप्नेऽपि भोग इति बुद्धवान् ज्ञा
त्वा न ज्ञानेनात्वर्थः भ्रान्तेः कथं व्यसनहेतुत्वमित्यत आह अशक्यार्थस्येति १६॥

स्वप्नेऽपि भोगे व्यसनं भ्रान्तो गच्छेन्न बुद्धवान् अशक्यार्थस्य संकल्पात् भ्रान्तस्य
व्यसनं बहु १६॥ मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् भुंजानोऽपि न संक
ल्पं कुरुते व्यसनं कुतः १७ स्वप्नेन्द्रजालसदृशमचिन्त्यरचनात्मकं दृष्टनष्टं
जगत्पश्यन् कथं तत्रानुरज्यति १८ स्वस्वप्नमपरोक्षेण दृष्ट्वा पश्यन्स्वजागरं
चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः १९॥

विवेकिनस्तदभावं दर्शयति मायामयत्वमिति १७ ननु मायामयत्वबोधे सत्य
पि भोगस्य तदानीं न नश्यत्वे हेतुत्वात्कुतस्त्यास्थोपसंहार इत्याशंक्य बहुविधादो
षदर्शनादित्याह स्वप्नेन्द्रजालेति ॥ ॥

एवं विभिन्नविषयत्वं प्रदर्श्य प्रयोगमाह । विद्यारब्धे इति विद्याप्रारब्धकर्मणी परस्परं न विरुद्ध्येते विभिन्नविषयत्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः भोगस्य मिथ्यात्वज्ञानेन भोगबाधकं न भवति इत्येतत्क्व दृष्टमित्याशंक्याह ज्ञानद्भिरिति ऐन्द्रजालो विनोद इन्द्रजालसंबन्धिचमत्कारविशेषो जानद्भिरप्यवलोक्यत इति प्रसिद्धमित्यर्थः ॥ १६ ॥ किं च विद्याप्रारब्धकर्मणोर्विरोधो नास्तीति वदन्तः प्रष्टव्याः किं प्रारब्धकर्म

विद्यारब्धे विरुद्ध्येते न भिन्नविषयत्वतः । जानद्भिरप्यैन्द्रजालविनोदो दृश्यते खलु ॥ १६ ॥ जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि । तदा विरोधि विद्याया भोगमात्रान्न सत्यता ॥ ११ ॥

विद्याविरोधीत्युच्यते उत विद्याप्रारब्धकर्मविरोधि नीति नाद्य इत्याह जगदिति प्रारब्धं कर्म जगतो भोगप्रदानस्य सत्यत्वमबाध्यत्वमापाद्य यदि भोजयेज्जीवस्य सुखदुःखे दद्यात्तदा विद्याविषयस्य मिथ्यात्वस्यापहाराद्विद्याविरोधि स्यान्न त्वेवं तथा करोति किं तु भोगमेव प्रयच्छतीति अतो न विद्याविरोधि ।

132

ननु प्रपंचगोचरस्यैव विषयसत्यत्वोपजीविनो भोगस्य च परस्परविरोधान्मिथ्यात्वज्ञा
नेसति कथं भोगसिद्धिरित्याशंक्य भोगस्य विषयसत्यत्वापेक्षाभावान्न विरोध इति
परिहरति इंद्रजालमिति इदं द्वैतं भोग्यजातमचिंत्यरचनत्वादिंद्रजालवन्मिथ्येति
फक्तानुसंधाया विस्मरतो विदुषः प्रारब्धभोगतः प्रारब्धकर्मफलयोः सुखदुःख।

इंद्रजालमिदं द्वैतमचिंत्यरचनत्वतः इत्यविस्मरतो हानिः का वा प्रारब्धभो
गतः १४ निर्बंधस्तत्त्वविद्याया इंद्रजालत्वसंस्मृतौ प्रारब्धस्याग्रहो भोगे जी
वस्य सुखदुःखयोः १५ ॥ योरनुभवेन मिथ्यात्वानुसंधानस्य का हानिः वाश
ब्दान्मिथ्यात्वानुसंधानेन वा भोगस्य का हानिः विभिन्नविषयत्वादिति भावः १५
विभिन्नविषयत्वमेव दर्शयति निर्बंध इति तत्त्वविद्याया जगन्मिथ्यात्वगोचरस्य ज्ञान
स्य इंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बंधनतः भोगापेक्षा प्रारब्धकर्मण

वे. द. सू. ८५

133

यत्र त्वस्य सर्वमात्मैवा... तत्केन कं पश्येदित्यादिश्रुतिर्द्रष्टृदर्शनदृश्याभावं गोचय
त्यतो वियोगोत्पद्यमानाज्जगद्विलापयेदेवपदं सति विदुषो भोगः कथं स्यादिति श्रुत
वर्थं भेनजशंकते श्लोकद्वयेन यत्रस्येति यत्र यस्या[illegible] वस्थायां केवलजगदस्य
विदुषः स्वात्मैवाभूदिदं सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव सम्पन्नं तत्र तस्याद्रष्टा
यां को द्रष्टा केन साधनेन स्वस्वरूपमेव भवति तत्र तस्यां दशायां को द्रष्टा केन साधनेन तेव
तुषा किं दृश्यं स्वरूपजातं पश्येद्देवं घ्राणेन्द्रियेण किं कस्मादिकं जिघ्रेत्किं वा कं के

यत्र त्वस्य जगत्स्वात्मा पश्येत्कस्तत्र केन किं । किं जिघ्रेत्किं वदेदिति श्रुतौ तु वा ।
वद्गोषितं तेन द्वैतमपनुत्य वियोदिति न चान्यथा । तथा च विदुषो भोगः क
थं स्यादिति चेच्छृणु ॥ ८२ ॥

न वा गिरिन्द्रियेण वा वदेद्देवमितरेन्द्रियव्यापाराभाव।
योतनायचाशाह इत्येवं प्रकारेण श्रुतौ वज्रवारमभिहितमित्यर्थः ८२ ततः किमि
त्यत आह तेन द्वैतमिति स्वात्मव्यापत्पयोरन्यतरापदमाविष्कृतं द्वीत्यस्मिन्स्तत्रैष
त्रतस्ये तुदाहृतायां श्रुतौ सुषुप्तिमोक्षयोरन्यतरविषयत्वेन व्याख्यातत्वान्न वियता।
जगदपह्नववत् [illegible] सुषुप्तिमोक्षयोः सम्पन्निम।

ननु मिथ्यापदार्थैर्भोगो भवतीत्यत्रापि दृष्टांतो नास्तीत्याशंक्याह अनृतेति ७८
नापिहितो यद्रूपमाह यदीति विद्या यदि जगद्भोगसाधनमपह्नुवीत नेदं जगदस्ति
ति निषेधज्ञानवत् प्रतीयमानस्य भोग्यस्य स्वरूपं विलापयेत् तदा प्रारब्धकर्मभो
गस्य स्यात् तु दुःखानुभवस्य साधनापहारेण प्रारब्धकर्मविहानिः स्यान्न च तथा।
करोति किं तु मिथ्यात्वमवबोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः ननु

अनृतेनाऽऽयते भोगः कल्पितैः स्वप्नवस्तुभिः जाग्रद्वस्तुभिरप्येवमसत्यैर्भो
गो इत्यतां ७८ यदि विद्याऽपह्नुवीत जगत्प्रारब्धघातिनी तदा स्यान्न तु मायात्व
बोधेन तदपह्नवः ७९ अनपह्नुत्य लोकास्तदिंद्रजालमिदं त्विति जानंत्येवा
जपन्तु त्वभोगमायात्वधीस्तथा ८० ॥ मिथ्यात्वबोधनादेव प्रपंचस्वरूपम्।
विविलापयेदित्याशंक्याह ननु मायात्वेति इंद्रजालादौ स्वरूपविलापनमंतरे
णापि मिथ्यात्वज्ञानदर्शनादिति भावः एतदेव प्रपंचयति अनुपह्नुत्येति लोकाज
ना इंद्रजालस्वरूपमपह्नुत्य इंद्रजालमिति ज्ञानं [illegible] एव यथा तथा
भोगं भोग्यमनपह्नुत्य [illegible] विलाप्य मायात्वधीः [illegible] मिथ्यात्वज्ञानं भवतीत्य र्थः

अतिप्रसंगपरिहारं शंकते आत्मतत्त्वमिति सुषुप्तौ द्वैतदर्शनाभावेपि आत्मगोचर
ज्ञानाभावान्न विद्यात्वं तस्य इत्यर्थः तर्हि प्राप्तप्राप्तिविवेकेन ज्ञानस्यैव विद्यात्वं न द्वैत
दर्शनाभावस्येत्याह तदात्वयेति ९६ ननु द्वैतादर्शनात्मज्ञानयोरुभयोर्मिलितयोरे
व विद्यात्वं नैकैकस्येति शंकते उभयमिति द्वैतविस्मृतेर्वा विविदिषांशत्वांगीकारेत्

आत्मतत्त्वं न जानाति सुप्तौ यदि तदा त्वया आत्मधीरेव विद्येति वाच्यं न द्वैतवि
स्मृतिः ९६ उभयं मिलितं विद्या यदि तर्हि घटादयः अर्धविद्याभाजिनः स्युः स
कलद्वैतविस्मृति ९७ मशकध्वनिमुख्यानां विक्षेपाणाञ्च सन्ततः नव विद्या
तथा न स्याद्घटादीनां यथा दृढा ९८ ॥

दृश्यापि द्वैतविद्यावत्त्वप्रसंग इति परिहरति
तर्हि घटादय इति अत्रोपपत्तिमाह सकलेति ९७ अस्मिन्नेव पक्षे समाधिमतां
पुरुषाणामपि न स्यादिति सोपहासमाह मशकध्वनीति घटादीनां यथा द्वैत
विस्मरणं दृढं तथा तव समाधौ द्वैतविस्मरणं न भवति ध्वन्यादीनामनेकेषां वि

अस्याः श्रुतेः स्वप्नादिविषयत्वानंगीकारे बाधकमाह अन्यथेति तत्रोपपत्तिमाह
द्वैतदृशामिति याज्ञवल्क्यादीनां यदि द्वैतं पश्येन्न हि तद्द्वैतज्ञानाभावान्नाचार्यो भवेत
अथ द्वैतं न पश्यन्ति तर्हि बोध्यशिष्याद्यनुपलम्भादाचार्यत्वाकशिष्यप्रतिबोधनाय
प्रवर्तेत अतो विद्यासंप्रदायोच्छेदप्रसङ्ग इति भावः ८४ ननु याज्ञवल्क्यादीनामाचा

स्वप्नविषयाम किंविषया वेति सा श्रुतिः उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्य
तिस्फुटं ८३ अन्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत द्वैतदृष्टावविद्वत्ता
द्वैतादृष्टौ न वा भवेत ८४ निर्विकल्पसमाधौ तद्द्वैतादर्शनं द्वैततः सेवापरो
क्षविद्या तिचेत्स्वप्नलक्षणा न किं ८५ ॥ यत्तद्दशायां विद्यमानस्याज्ञानस्या
विद्यात्वमस्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावान्निर्विकल्पक
समाधौ तद्द्वैतदर्शनाभावात्सैवापरोक्षविद्येति शं निर्विकल्पके तु द्वैतप्रतीतिरा
तिप्रसंगापादकत्वात्तैलाभितिपर्यन्तं स्वप्नलक्षणा न किमिति ८५ ॥

पं. हृ.
हृ.
९७

शास्त्रार्थस्येति नस्येवरागांगीकारपरं च शास्त्रं एवं सति तत्वविदो द्वेषरागाभावे सति
शास्त्रद्वयस्यार्थमर्थं व्यर्थं भवति अविरोधतः रागनिषेधपरस्य शास्त्रस्य द्वेषरागाभावे।
सति शास्त्रद्वये रागविषयत्वात् तद्भुपगमपरस्य शास्त्रस्य रागाभावे स्वविषयत्वादिति भा
वः ९२ एवं किमिच्छन्नित्यस्य श्रुत्याभिप्रायमुक्त्वा एकस्य कामायेत्यस्याभिप्रायमा

रागो लिंगमबोधस्य चित्तव्यायामभूमिषु कुतः शाद्वलता तस्य यस्याग्निः कोटरे त
रोः ९२ शास्त्रार्थस्य समाप्तत्वान्मुक्तिः स्यान्नावतारमात्रतः रागादयः सन्तु कामं न तद्भा
वोपराध्यते ९३ जगन्मिथ्यात्ववत्स्वात्मासंगत्वस्य समीक्षणात् कस्य कामायेति वचो
भोक्तृभावविवक्षया ९४

हृ जगन्मिथ्यात्वेति यथा जगन्मिथ्यात्वबोधेन बाह्य
वकाम्याभावविवक्षया किमिच्छन्नित्युक्तं एवमात्मनोऽसंगत्वबोधेन बास्तवभोक्तृ
भावविवक्षया कस्य कामायेति श्रुत्याभिहितमित्यर्थः ९४ ॥ ॥ ॥
राम राम राम

135

ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य विकारित्वेपि निरधिष्ठान
स्य तस्यैवास्तित्वमेव नास्तीति परिहरति विकारीति चिदाभासस्य विकारिबुद्ध्युपाध्यधीन
त्वात् स्वस्मिन्विकारित्वं संभवत्यपि तस्यारोपितस्वरूपत्वेनाधिष्ठानभूतकूटस्थं विहाय
स्वातंत्र्येणावस्थानासंभवात्केवलचिदाभासस्यापि भोक्तृत्वं न संभवतीति भावः ९८
तस्मात्तृतीयः पक्षः परिशिष्यत इत्याह ॥ उभयात्मक इति यत एकैकस्य भोक्तृत्वं न सं

विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि निरधिष्ठानविभ्रांतिः केवला न हि ति
ष्ठति ९८ उभयात्मक एवातो लोके भोक्ता निगद्यते तादृगात्मानमारभ्य कूट
स्थः शेषितः श्रुतौ ९९ ॥

भवति अत उभयात्मकः साधिष्ठानश्चिदाभास एव लोके
व्यवहारदशायां भोक्तेत्यभिधीयते परमार्थतस्तूभयात्मकत्वमेव नद्रष्टत इति भावः
नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्यैव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिस्थादि
कत्वस्यापि श्रवणादुभयात्मकं भोक्तृत्वरूपमिति पारमार्थिकमेव स्यान्न लोकव्यव
हारमात्रसिद्धमित्याशंक्य श्रुतेस्तत्र तात्पर्याभावान्नैवमित्याह तादृगिति तादृगात्मा

138

नन्वात्मनो भोक्तृत्वप्रतिषेधस्तत्प्रसक्तिपूर्वकोऽवकल्प्यः स्यात् न विद्यते प्रसंगस्तावदात्म
न इत्याशंकातस्य तस्यानुभवसिद्धत्वान्नैवमित्यभिप्रेत्य तदनुवादिकां श्रुतिमर्थतो
नुक्रामति पतिजायादीति न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादि आत्मन
स्तु कामाय सर्वं प्रियं भवतीत्यन्तेन वाक्यसंदर्भेण पतिजायादिकस्य प्रपञ्चस्यात्म
नो भोगसाधनत्वं प्रतिपाद्यते तस्मादात्मनो भोक्तृत्वप्रसक्तिर्विद्यत इत्यर्थः ५५ एवमात्मनो भो

पतिजायादिकं सर्वं तद्भोगायैव नेष्यते किं त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु
५५ किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः भोक्ता तत्र न कूटस्थोऽसंगत्वा
द्भोक्ततां भजेत ५६ सुखदुःखाभिमानाख्यो विकारो भोग उच्यते कूटस्थो वि
कारी चेत्येतन्न व्याहतं क ५७ ॥

क्तृत्वप्रदर्शनं तदपवादाय भोक्तारं विकल्प
यति किं कूटस्थ इति किं कूटस्थस्य भोक्तृत्वं चिदाभासस्य किं वोभयात्मकस्येति
विकल्पार्थः तत्र प्रथमं प्रत्याह तत्रेति ५८ असंगत्वमसक्तभोक्तृत्वमपसक्तं कोऽप
इत्याशंक्याह सुखेति सुखदुःखाभिमानलक्षणो विकारो भोगः स चासंगस्य कूटस्य

ननु कर्तृत्वाभोक्तृत्वमिथ्यात्वे प्राणिनां तस्मिन्नस्वत्वबुद्धिः कुतो जायत इत्याशंक्या-
ह कूटस्थेति स्वात्मा लोकप्रसिद्धो भोक्ता विवेकतः स्वस्य कूटस्थात् हि विवेकज्ञानाभा-
वेन कूटस्थनिष्ठसत्यत्वमात्मन्यध्यस्य तद्द्वारा तन्निष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा
भोगं कदाचिदपि न हातुमिच्छति २ ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्या-
त्मशेषत्वं भोग्यस्य कथं प्रतिपद्यत इत्याशंक्य न कूटस्थात्मशेषत्वं प्रतिपाद्यते किं

कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माविवेकतः । तात्त्विकीं भोक्तृतां मत्वा न कदा-
चिज्जिहासति २ भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति । एष लौकिकवृ-
त्तान्तः श्रुत्या सम्यगनूदितः ३ भोग्यानां भोक्तृशेषत्वाद्भोग्येष्वनुरज्यतां भोक्त-
र्यैव प्रधानेतोनुरागंतविधित्सति ४ ॥

तु लोकप्रसिद्धाभयात्मकभोक्तृत्वशेष-
त्वमेव श्रुत्यानूद्यत इत्याह भोक्तेति लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादि
भोगोपकरणमिच्छतीत्ययं लौकिकवृत्तान्तः श्रुत्या सम्यगनूदितः नार्थान्तरं प्रतिपा-
द्यत इत्यर्थः ३ अनुवादः किमर्थमित्याशंक्य भोक्तर्येव प्रेम्णो विधानायेत्याह भो-
ग्यानामिति भोग्यानां [illegible] भोगोपकरणानां [illegible]त्वाद्भोग्येष्वनुर

तत्र बृहदारण्यकगतार्थं तावत्संक्षिप्य प्रदर्शयति आत्मेति । जनकेन कतम आ-
त्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यो विबोधयन् योऽयं विज्ञानमयः प्राणेष्वित्यादिना
विज्ञानमयमुक्त्वा असंगो ह्ययं पुरुष इत्यसंगं कूटस्थं परिशेषितवानित्यर्थः २
एवं बृहदारण्यके असंगात्मपरिशेषप्रकारं प्रदर्श्य ऐतरेयादिश्रुत्यन्तरेष्वपि तद्दर्शय-

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् । विज्ञानमयमारभ्यासंगं तं पर्य-
शेषयत् २ कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः । उभयात्मकमारभ्य
कूटस्थः शिष्यते श्रुतौ १ ॥

ति कोऽयमिति कोऽयमात्मेति वयमुपास्महे
कतरः स आत्मेत्येवमादावात्मविचारेऽन्ततः करणोपाधिकमात्मानमारभ्य
प्रज्ञानमात्रात्मकः कूटस्थः परिशेषितः एवमन्यत्रापि द्रष्टव्यं एवं श्रुतिप-
र्यालोचनायामुभयात्मकस्याभोक्तुर्मिथ्यात्वे पारमार्थिकस्यासंगस्य कूटस्थ-
स्याभोक्तृत्वं सिद्धं १ ॥ ॥ ॥

पं.द्.
मू.
ध.

एवमात्मन्येव प्रेमोपसंहारे फलितं सदृष्टान्तमाह स्तकवंदनेति पामरः पृथग्जन
स्वर्गादिविषयेच्छुः प्रमत्तमत्तः सावधानो भवति एवं मुमुक्षुरप्यात्मनिविषयेणाप्र
मादं त्यक्त्वा ध्यानं करोतीति किं तत्स्वितं येव तिष्ठतीत्यर्थः १ सुवर्णध्यानाभावमेववङ्क
भिर्दृष्टान्तैः स्पष्टयति कष्टनाटकाति यथा विजिगीषुः प्रतिवादिजयकामस्तद्धेतो

स्तकवंदनवधूवस्त्रस्वर्णादिषु पामरः सुप्रमत्तो यथा तद्वन्न प्रमाद्यति मोक्षके
२ काष्ठनाटकनकादिमभ्यस्यति निरंतरं विजिगीषुर्यथा तद्वन्मुमुक्षुः सं
विचारयेत् ३ जययागोपासनादिकुरुते श्रद्धया यथा स्वर्गादिवाञ्छया तद्व
त्श्रद्धया तत्त्वे मुमुक्षुः कथा ४ ॥

केप्रयानतः पुरुषो निरंतरं काव्यादीनभ्य
स्यति एवं मुमुक्षुरपि सदा स्वात्मानं विचारयेत् ३ जयेति यथा वैदिकः स्वर्गाय
यीन् साधनानि जपादीनि श्रद्धातुरः सन् अनुतिष्ठति तथा मुमुक्षुर्मोक्षेच्छया स्वे
श्रौते आत्मनि विश्वासं कुर्यात् ४ ॥

138

ध.

भोगेषुप्रेमत्यागपुरःसरमात्मप्रेमकर्त्तुंत्वयायादृशंतत्तेनेश्वरप्रेमप्रार्थना।
पुरःसरंपुरातनवचनमुदाहरति याप्रीतिरिति अविवेकानामात्मज्ञानशून्यानां
विषयेष्वनपायिनीदृढायाप्रीतिरस्तिहेमाधवेलक्ष्मीपतेसाप्रीतिस्त्वामनुस्मर
तस्त्वांसदाचिन्तयतोमेहृदयान्मनसःसर्पत्वपगच्छतुमममनोविषयेष्वास
क्तिंपरित्यज्यत्वय्येवसदातिष्ठत्वित्यर्थः यद्वाऽविवेकानांविषयेषुदृढाया या।

याप्रीतिरविवेकानांविषयेष्वनपायिनी त्वामनुस्मरतःसामेहृदयान्माप
सर्पतु ५ इतिन्यायेनसर्वस्माद्भोगपञ्जाद्विरक्तधीः उपसंहृत्यतांप्रीतिंभोक्त
र्येवंबुभुत्सते ६॥

दृशीप्रीतिरस्तिसातादृशीविषयेषुविद्यमानाप्रीतिमा
नुस्मरतोमेहृदयान्मापसर्पतुमामापगच्छतुसदास्थितिरित्यर्थः ५ भवत्वेवंप्रा
र्थनेऽस्तुनोकिमायातमित्यतआह इतीति इत्यनेनप्रकारेणन्यायेनसर्वस्मा
द्भोगपञ्जातपतितस्त्रागादिलक्षणाद्विरक्तधीः विरक्ताधीर्यस्यासौविरक्तधीः
पुरुषस्तांभोगसाधनप्रीतिंभोक्तर्युपसंहृत्यतमात्मानंबुभुत्सतेवो

पं.दं.
स्व.
ध्य.

अन्वयव्यतिरेकौ दर्शयति यत्रेति जाग्रदादिषु मध्ये यत्र यस्मिन्स्थाने जाग्रति स्वप्ने सुषुप्तौ वा यत्स्थूलसूक्ष्मानंदभुक्तिविविधभोग्यं द्रष्ट्रा साक्षिणा दृश्यते तद्दृश्यं तत्रैव तस्यामेवावस्थायां तिष्ठति न तु तदवस्थांतरे तदवस्थासु अवस्थायां नास्तीत्यवस्थात्रयानुगततया वर्तत इत्यनुभवः सर्वसंमतः हि प्रसिद्धमेतदित्यर्थः ॥ १२ ॥ न केवलमनुभवः किंत्वागमोऽपीत्यभिप्रायेण स्वप्ने तत्र किंचिद्दृश्यत्यनन्वाग

यत्र यद्दृश्यते द्रष्ट्रा जाग्रत्स्वप्नसुषुप्तिषु तत्रैव तन्नेतरत्रेत्यनुभूतिर्हि संमता ॥
१२ स्वप्ने तत्रैव तत्तेन किंचिन्नानन्वागतो भवेत्। दृष्ट्वैव पुण्यपापं च तत्सर्वं श्रुतिषु
डिंडिमः २४

तस्तेन भवत्यसंगो ह्ययं पुरुषः स वा एतस्मिन्संप्रसादे रत्वा दृष्ट्वैव पुण्यं च पापं पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादिवाक्यद्वयमर्थतः पठति स्वप्नेति स्वप्नात्मा तत्र तस्यामवस्थायां यत्किंचिद्भोग्यमीक्षते पश्यति। तेन दृष्टेन नानन्वागतो भवेदनुस्यूतो न भवेत्। किंतु स्वयमेवावस्थांतरं गच्छतीत्यर्थः पुण्यं पापं च कृतं तत्सर्वं पापं तत्कृतं दृष्ट्वैव रत्वैवानादायेत्यर्थः

139

चित्तैकाग्र्यमिति योगी योगाभ्यासवान् तिमार्गे स्वर्गे लाभे कृच्छ्रामहायासेन चित्तै
काग्र्यं यथा संपादयेत् तद्वदयमप्यात्मानं सदा विविक्तं देहादिभ्यो विविच्य ज्ञानी या
दित्यर्थः ॥ ननु एवमेतेषां सदाभ्यासेन किं फलमित्यत आह कौशलानीति यथा
तेषां काव्याद्यभ्यासपाटवेन तत्कर्मणि निश्चितकौशलानि विवर्द्धन्ते एवमस्यापि मुमु
क्षोरभ्यासाद्विवेको देहादिभ्य आत्मनो भेदज्ञानं विशदायते स्पष्टं भवति ॥ वि

कौशलानि विवर्द्धन्ते तेषामभ्यासमादरात् । यथा तद्वद्विवेकोऽस्याप्यभ्यासाद्वि
शदायते ॥ चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् अतिमायप्रयत्नेनैवं
विविक्तात्मसुकृत्यया ॥ विविक्तभोक्तृतत्त्वज्ञानं देहादिषु संगतान्वय
व्यतिरेकाभ्यासादिति परमोपरमीयते ॥ ॥ वेकवैशद्यस्य फलमाह विविक्त

तेति अन्वयव्यतिरेकाभ्यां भोक्तृत्वं भोक्तुः पारमार्थिकस्वरूपं विविक्तभोगेभ्यो
जडजातेभ्यो भेदेन ज्ञानं लभते यथा शुद्धं ज्ञानं व्यापकमुक्ताशीवस्य

पं. टृ.
स्व.
धर

एवंविवेकेनात्मतत्त्वे सम्यङ्निश्चिते सति भोक्तृत्वं कस्येत्यत आह एवमिति वि॰ ज्ञान मयशाह्निनाभिधीयमानचिदाभासस्यैव विकारित्वाद्भोक्तृत्वमित्यर्थः ॥ ननु चिदा भासस्य भोक्तृत्वाङ्गीकारे कस्य कामायेति वचो भोक्तृभावविवक्षयेति पूर्वोक्तं व्याह न्येतेत्याशङ्क्य तस्यैव वचनस्यापारमार्थिकभोक्तृभावपरत्वमभिप्रेत्य भोक्तुश्चिदा भासस्य मिथ्यात्वं साधयति मायकोयमिति अयं चिदाभासो मायिकोऽसत्यात्मकः

एवंविवेचिते तत्त्वे विज्ञानमयशाह्निनः चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यते ॥ मायकोयं चिदाभासः श्रुतेरनुभवादपि इन्द्रजालं जगत्प्रोक्तं तदन्तः पात्ययं यतः ॥

श्रुतेः जीवेशावाभासेन करोतीति श्रुतेः अनुभवादपि दृष्टादिविलयमसत्यत्वं स्वतेनानुभूयमानत्वादपीत्यर्थः तदेवोपपादयति इन्द्र जालमिति इन्द्रजालवन्मिथ्याभूतं जगत्सर्वं तन्मध्यपातिमिथ्यात्वं तदन्तर्भूयत इति हृदिति शेषः यस्माज्जगदन्तःपातीति अन्वयातो योजना ॥ ॥ ॥ ॥ ॥

140

भोक्तृत्वविवेचनपराणि सूत्राणि दर्शयति जाग्रदित्यादिना यत्स्वप्रज्ञानानंद
लक्षणं ब्रह्मसाक्षिरूपेण तिष्ठतं तज्जाग्रदादिप्रपंचं प्रकाशते प्रकाशयति तद्ब्रह्माहम
स्मीति ननु शिवविद्याभासात्मकमस्मीति ज्ञात्वा सुप्तस्तु भवाभ्यां निश्चितसर्वप्रतिबंधैः प्रा
मानत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते १५ जाग्रदादिद्वयस्य साक्षिरूपत्वात्मा

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते
१५ एकरूपत्वात्मंमंत्रो जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते
१५ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रो
अहं सदाशिवः १

मंतव्यः एवं विवेकज्ञानेन स्थानत्रयव्यतीतस्यावस्थात्रया
द्विविक्तस्यात्मनः पुनर्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरसंप्राप्तिर्नास्ती
त्यर्थः १६ त्रिषु धामसु त्रिषु अवस्थानेषु यद्भोग्यं स्थूलसूक्ष्मविविक्तानंदरूपं भोक्ता वि
श्वतैजसप्राज्ञरूपो यश्च भोगः तत्तदनुभवरूपश्च निर्विघ्नं विद्यते तेभ्यः स्थानादिभ्यो विलक्ष
णो यः साक्षी [illegible] सदाशिवो [illegible] सर्वदा शोभमानः प

इदानीं ज्ञानानन्तरं रागादिक्षयो भोक्तृत्वाभावे कैमुतिकन्यायसिद्ध इत्याह यदेति स्वस्या
पीति अयं चिदाभासः स्वस्यापि भोक्तृत्वं मन्तव्यं भोक्तेति ज्ञानेन निर्दोषेति विलक्षणेन यदा
न तदा एतत्स्वगतं भोक्तृत्वं रागादिरूपं रोगं आरोपयेदिति निवृत्ता कथा कैमुत्या केवलका
पीत्यर्थः २२ उक्तमर्थं श्रुत्यारूढं करोति इत्यभिप्रेत्येति कस्य कामायेति श्रुतिरित्य

यदा स्वस्यापि भोक्तृत्वं मन्यते निर्द्वन्द्वस्तदा क्षीणा एव रागाद्यास्तदिति कैव कथा
वृथा २३ इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशङ्कया कस्य कामायेत्यतः शरीरा
नुज्वरो नहि २४ स्थूलसूक्ष्मकारणाख्यशरीरत्रितयं स्मृतं अवश्यं त्रिविधोऽस्त्ये
व तत्र तत्रोचितो ज्वरः २५ ॥

अर्थः कूटस्थस्य चिदाभासस्य पारमार्थिकभोक्तृत्वा
भावमभिप्रेत्याविशंकयाशंकारहितं भोक्तारमाक्षिपति निराकरोति भवत्वेवं
भोक्त्राक्षेपस्ततः किमित्यत आह अत इति तत्र स्थूलशरीरे ज्वरो व्याधिस्तावदाह धात
पित्तेति ज्वरो ज्वरणं संतापः २४ ननु विदः शरीरानुज्वराभावं दर्शयति शरीरा

ग्रस्य च तत एव विनाशित्वानुभवाद् विमृषात्वमित्याह विलय इति सुषुप्त्यादिवा
दिषुप्तावप्यस्य भवतमृषात्वं ततः किमित्यत आह एतादृशमिति यदा कूटस्थादि
विवेकेन सिद्धाभासोऽमाधिकोऽज्ञातः सदा स्वस्य भावं स्वतत्त्वमेतादृशं मृषात्मकं पु
नः पुनर्विविनक्ति कूटस्थाद्विविच्य जानाति २० ततोऽपि किमित्यत आह विवि।

विलयोऽप्यस्य सुषुप्त्यादौ साक्षिणा ह्यनुभूयते एतादृशं स्वस्वभावं विविनक्ति पु
नः पुनः २० विविच्य नाशं निश्चित्य पुनर्भोगं न वाञ्छति मुमूर्षुः शायितो भू
मौ विवाहं कोऽभिवाञ्छति २१ जिह्रेति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् छि
न्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते २२॥ स्वेति स्वविनाशित्वनिश्चयेन भो

गेच्छाभावे दृष्टान्तमाह मुमूर्षुरिति २१ किं च पूर्ववदहं भोक्तेति व्यवहर्तुमपि।
लज्जत इत्याह जिह्रेतीति नहि ज्ञानोत्पत्त्यनन्तरं प्रारब्धक्षयपर्यन्तं कथं व्यवहरतीत्य
त आह छिन्ननास इति ह्रीतो लज्जितः क्लिश्यन्नेव तानीमयिकमंहीयत इति क्लेश

एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह एते ज्वरा इति त्रिष्वपि श-
रीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः स्वाभा-
विकत्वं व्यतिरेकमुखेन द्रढयति वियोगे त्विति यतः कारणादेभिर्ज्वरैस्तेषां श-
रीराणां वियोगे तानि शरीराणि नाशमेतत एवैते न भवन्ति अतः स्वाभाविका इत्यः।

एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मता। वियोगे तु ज्वरैस्तानि शरीराण्येव
नासते २५ तन्तोर्वियुज्येत पटो वालेभ्यः कंबलो यथा मृदो घटस्तथा देहो ज्व-
रेभ्योऽपीति दृश्यतां २६ चिदाभासे स्वतः कोऽपि ज्वरो नास्ति यतश्चितः प्रकाशै-
कस्वभावत्वमेव दृष्टं न चेतरत् २७ चिदाभासेऽप्यसंभाव्या ज्वराः साक्षिणि का
कथा एवमप्येकतां मेने चिदाभासो ह्यविद्यया २८ ॥ टीः २६ तन्त्वदृष्टान्तमा-
ह तन्तोरिति २. इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुश्चिदाभा-
सेऽनावज्ज्वराभावं दर्शयति चिदाभास इति चिदाभासे स्वतः शरीरत्रयगतज्वरासं-
बन्धमन्तरेणानकोऽपि ज्वरो विद्यते कुत इत्यत आह यत इति चितः प्रकाशैक-

सूक्ष्मशरीरे ज्वरान् दर्शयति कामक्रोधादय इति कामादीनां शरीरादीनां चज्व
रत्वमुपपादयति दूषयंतीति दूषयंति हि धातुवैषम्यक्रमेण प्राप्ताः शरीरं ज्वरयंती
तो ज्वरसाम्यात् ज्वरा इत्युच्यंत इत्यर्थः २५ कारणशरीरगतो ज्वरः छाद्दोगस्तुना

तानि पित्तश्लेष्मजन्यान्याधयः कोटिशस्ततो दुर्गंधत्वकटूपत्वदाहभंगादय
स्तथा २६ कामक्रोधादयः शांतिदांत्यादिलिंगदेहगाः ज्वरा हृद्येपि वाधंते
प्राणापानक्रमात् २७ संसारं च नवेत्यात्मा विनष्टपूर्वकारणे आगामि
दुःखबीजं चेत्येतद्दृद्वेणदर्शितं २८ ॥ तुच्छ इत्याह संसारं चेति न हि केवल
यमेवं संप्रत्यात्मानं ज्ञानात्यहमस्मीति नो परं वेमाने भूतानि विनाशमेवापी
ता भवति मनादमसुभोगपपशपामीति वाके संसारज्ञानशून्यत्वमज्ञाने नष्टप्रा
यत्वपरंपरागामिदुःखबीजं वासनासंज्ञावंचेद्वेणशिष्योपगहोः प्रज्ञा
पतिः परतो निवेदितमित्यर्थः २८ ॥

एवमपि विवेकदशायां चिदाभासे भ्रांत्या जन्तुत्वं प्रदर्श्य विवेकदशायां तदभावं दर्शय
ति विविच्येति चिदाभासः कूटस्थं स्वात्मानं शरीरादींश्च विविच्य भेदेन ज्ञात्वा इदं
सर्वं मम वास्तवं रूपमिति मन्यते इत्यर्थः भ्रांतिं परित्यज्य स्वस्याभासरूपत्वं ज्ञा।
त्वेन स्वस्मिन्नप्यादरमकुर्वन् स्वरूपानिजं रूपं जन्मादिरहितं साक्षिणं सदा चिंत
यन् कस्मान्न शरीरमनु संज्वरेदिति ज्वरेच्छरीरमनु संज्वरेच्छरीरमनु संज्व

विविच्य भ्रांतिमुक्तित्वात्स्वमप्यगणयन्सदा चिन्तयन्साक्षिणं कस्माच्छरीरमनु
संज्वरेत् २६ यथा पथ्यावस्तु सर्पादिज्ञानं हेतुः पलायने रज्जुज्ञानेऽहिधीध्वस्तौ कृत
मप्यनुशोचति २७ ॥ देच्छरीरमनु स्वस्य स्वयं कस्मात्संज्वरेन्न संज्वरेदेवेत्य
र्थः २६ भ्रांतिज्ञानतत्त्वज्ञानयोर्जन्ये तदभावकारणत्वे दृष्टांतप्रदर्शनेन स्पष्टय
ति यथेति रज्ज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं भवति स्यादिश
ब्देन स्थाणौ कल्पितस्य चोरस्य ग्रहात् रज्ज्वादिज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि प
लायनमनुशोचति वृथा कृतमयेत्यनुतप्यत इत्यर्थः २७ ॥

यदर्थं चिदाभासे ज्वराभावं उपपादितवांस्तदिदानीं दर्शयति चिदाभास इति यदा
चिदाभासेऽपि ज्वरादिसंभाव्यते तदा नस्यादिति शंकते किमुक्तव्यमिति
भावः ननु तस्य ज्वरादिनित्यनुभवस्य का गतिरित्यत आह एवमिति २२ एक
तामेवेति संदेहेण क्रमेणैव प्रपंचयति स्वादिति मन्यतेति चिदाभासः स्वेन

स्वान्विमन्यत मथ्यस्य स्नेनोपेतेव धूस्थये तद्वदेवात्मनं स्वस्य स्वरूपमिति
मन्यते २३ एतस्मिन्भ्रान्तिकालेऽपि शरीरेषु ज्वरस्तथा स्वयमेव ज्वरामीति
मन्यते हि कुटुंबिवत् २४ पुत्रदारेषु तप्यत्सु तप्यामीति यथा पृथा म
न्यते पुरुषस्तद्वदाभासोऽप्यभिमन्यते २५ ॥

स्वदेहमिति शरीरत्रयस्यादिगतं
तत्स्यात्मथ्यस्यतत्सर्वं ज्वरत्वश्रुतौ स्वयं स्वस्य स्वरूपमिति मन्यत इत्यर्थः
२३ एतस्मिन्भ्रान्तिकाले किं भवतीत्यत आह एतस्मिन्निति स्वयं चिदाभा
सः स्वं भ्रांतिकाले [illegible] धीतत्त्वं दृष्टान्तमाह

पं. द.
स.
४६

शूद्राणीशरीरत्वाद्विवेचितस्य विद्याभासस्य पुनर्म्लेच्छैः सहतादात्म्यसंभावे दृष्टांतं
मा गृहीत इति ४१ न केवलं स्वापराधनिवृत्त्यै स्वाद्वर्णाश्रमवर्णः किंतु महत्त्वयो
जनसिद्ध्यर्थमपीति सिंहावलोकनन्यायेन सदृष्टांतमाह यौवराज्य इति राजा
नुकारी भवति राजवत्प्रजारंजनादिगुणवान्भवतीत्यर्थः ४२ ननु युवराजस्य

गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरेत्पुनः म्लेच्छैः संकीर्यते नैव तथाभासः
शरीरकैः ४१ यौवराज्ये स्थितो राजपुत्रः साम्राज्यवांछितः राजानुकारी भव
ति तथा साक्ष्यनुकार्यपि ४२ यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिः श्रुतां तदेक
चित्तः सन् ब्रह्म वेत्ति न चेतरत् ४३ ॥ राजानुसरणे साम्राज्यं फलं दृश्यते नो

वं साम्राज्यं नृपसरणे यतस्तदनुसरणे कृपाप्रवर्तते इत्याशंक्याह यो ब्रह्म वेदीति
स्पष्टो ह्येवं तत्परं ब्रह्म वेद ब्रह्मैव भवतीत्यस्यां ब्रह्मवित्कुले भवति तरति शो,
कं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तः मृतो भवति ब्रह्मभावादिरूपस्य फलस्य

४६

द्वां शान्तिके योजयति ४६ ननु पुनर्मर्त्योऽहमिति बुद्ध्युदये तेन तत्त्वज्ञानं बाध्यते इत्या
शंक्याह नैतावतेति कदाचिदहं मर्त्य इत्येवंविधज्ञानोदयमात्रेणापराधेन प्रमा
णजनितं तत्त्वज्ञानं न बाध्यते कुत इत्यत आह जीवन्मुक्तिव्रतमिति इदं मर्त्यैन
बुद्ध्यननुकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति किंतु वस्तुस्था
तत्त्वज्ञानेन भ्रान्तिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावो वर्तते अतः कदाचिन्मर्त्यैन

एवमारब्धभोगोऽपि शनैः शाम्यति नो हठात् भोगकाले कदाचित्तु म
र्त्योऽहमिति भासते ४७ नैतावतापराधेन तत्त्वज्ञानं विनश्यति जीवन्मुक्ति
व्रतं नेदं किंतु वस्तुस्थितिः स्मृता ४८ दशमोऽपि शिरस्ताड्य रुदन्बोधान्नरो
दिति शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा ४९

बुद्ध्युदयेऽपि पुनस्त
त्त्वज्ञानं न तेन नश्यत्येव वाच्यमिति भावः ४८ भवत्वरज्जुसर्पादिभ्रान्तेर्विपर्य
रीततत्त्वज्ञानान्निवृत्तावपि तत्कार्यं कम्पादि न निवृत्तिः प्रत्युत दृष्टान्ते दशमस्त्वमसीति
वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्या

ननु ब्रह्मज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव निवर्त्यते न: स्वनाशाय कथं प्र
वर्त्ततामित्याशङ्क्याह देवत्वेति यथा लोके देवत्वप्राप्तिकामाः मनुष्या भृग्वग्नि
प्रपातादौ गङ्गाप्रवेशादौ प्रवर्त्तन्ते एवं मालिन्यरूपेणावस्थानत्यागस्याधिकफलस्य
सिद्ध्यै न त्वात्मनाशाय चिदाभासता: यथा महत्त्वे ब्रह्मज्ञानेपि प्रवृत्तिश्चेदतन एवेत्यर्थः ५४
ननु तत्त्वज्ञानेन आभासत्वमेव गच्छति चेत्कथं तत्त्वविदां जीवत्वव्यवहार इत्याश
ङ्क्य देवत्वकामा ह्यग्न्यादौ प्रविशन्तीति यथा तथा मालिन्येनावशेषमात्मत्वविना
शं समाञ्छति ५४ यावत्स्वदेहपातं मनस्तत्तेन नैवमेव चरति यावदारब्धदेहं
स्यानाभासत्वविमोचनः ५५ रज्जुज्ञानेपि सर्पादेः शनैरेवोपशाम्यति ॥
नर्मदायकारणाद्वयाद्रज्जुः त्रिर्भावात्मवत् ५६ का प्रारब्धकर्मतत्पर्यन्तं त
दुपपत्तिं सदृष्टान्तमाह यावदिति यथाग्न्यादौ प्रविष्टः पुरुषो दाहादिना स्व
देहनाशपर्यन्तं नरत्वेन व्यवहारयोग्यत्वेनैवमेव तिष्ठति एवं प्रारब्धकर्मक्षय
पर्यन्तं चिदाभास [illegible] ५७ ननु [illegible] ज्ञानादिभ्योपा

पं० ८०
ल०
५८

146

प्रयोजनज्ञानशोकनिवृत्त्याख्यमिदमेवेमेवमस्य जीवो ब्रह्मात्मानं चेदिति श्रुतिरि।
त्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय
शरीरमनुसंज्वरेदित्यस्मिन्नेव प्रयोजनज्ञानशोकनिवृत्त्याख्यं जीवावस्थाद्वयमभि
हितं तत्पूर्वकं इदानीं तदभिधानन्तरं चिन्ताजीवस्य सप्तमीं रतिलक्षणामवस्थाम्।
तानुकीर्तनपूर्वकं वक्तुमारभते किमिच्छन्निति किं किमिच्छन्निच्छन्नाहं नाभि
हितो वः शोकः मोहः सन्तापनाग्रयसंदर्भोऽण्डदीरितः अभिहितः एषा ज्ञानम

किमिच्छन्निति वाक्योक्तः शोकमोहोऽदीरितः आभासमात्रावस्थैषा षष्ठीत्यन्निलतस
प्तमी ४२ सांकुशा विशयेरतन्निरियन्ते निर्निरंकुशा क्रान्तकुन्तप्राप्तपर्ण्ययसान्निमित्येव

हतिसलहविदेयमपरीतधीः अपरोक्षमतिः शोकमोहः रतन्निर्निरं रम्यति ४४
कुशा इत्यनेन श्लोकेन अभिहितासहसन्नासजीवावस्थासषष्ठीत्याह अभासेषु।
ति सप्तमीं व्याख्यायते उत्तिशोषः ४२ अपरोक्षज्ञानजन्या यास्तन्निर्निरंकुशत्वप्रति
योगिप्रदर्शनं तुः सप्रतिजानीते सांकुशेति विषयलाभजन्या यास्तन्निर्विषया तर
कामनया कुण्ठितत्वात्सांकुशत्वमस्यास्तत्स्वभावान्निरंकुशत्वं न दर्शयति कु

५८
ह

स्वर्गाद्यर्थं कर्मानुष्ठानप्रसङ्गो वैलक्षण्यमाह अनुतिष्ठन्निति ननु स्वार्थप्रवृत्त्यभावे परा
र्थप्रवृत्तिः किं न स्यादित्याशङ्क्याधिकाराभावान्नापि नास्तीत्याह आचरतामिति
५८ ननु स्वदेहनिर्वाहार्थं भिक्षाटनयागादिकं परलोकार्थं स्नानादिकं च भवतां क्रिय
माणमुपलभ्यते तैः तैः क्रियत इति मास्त्वित्याशङ्क्य तदपि स्वरूपेण नास्ति किं त्वन्यैरेव
कल्पितमित्याह निद्राभिभूतेति ६० अन्यकल्पनया पितायोऽस्तीत्याशङ्क्य तदभावे दृष्टा

अनुष्ठितं तत्कर्मणि परलोकार्थं स्वयं सर्वलोकात्मकः कस्मादनुतिष्ठामि
किं यथा ५८ आचरतां तेषां शास्त्राणि वेदानध्यापयन्तु वा येऽत्राधिकारिणो मताः।
नाधिकारोऽस्ति क्रियावतः ५९ निद्राभिभूतस्नानशौचे नेच्छामि न करोमि च द्रष्टा
रश्चेत्कल्पयन्ति किं मे स्यादन्यकल्पनात् ६० गुञ्जापुञ्जादिदह्येत नान्यारोपित
वह्निना नान्यारोपितसंसारधर्मानेवमहं भजे ६१ ॥ तमाह गुञ्जापुञ्जादीति ६१।
ननु फलान्तरेच्छाभावे कर्मानुष्ठानं माभूत् तत्त्वसाक्षात्काराय श्रवणादिकं कर्तव्यमेवे
त्याशङ्क्याज्ञानाद्यभावाच्छ्रवणादिकर्तव्यमपि नास्तीत्याह शृण्वन्त्विति अज्ञाततत्त्वा
स्त्वाश्चज्ञातब्रह्मात्मकत्वलक्षणं तत्त्वं येषां तथाभूताः श्रवणं कुर्वन्तु तत्त्वमित्यर्थः।

ध्यानस्याकर्तृत्वे विक्षेपपरिहाराय समाधिकर्तव्य इत्याशंक्य विक्षेपसमाधा-
नयोर्मनोधर्मत्वान्न विक्षेपनिवारकोऽपि सम्यक् समाधिकार्य इत्याह विक्षेप इति ९७
ननु समाधिफलमनुभवः संपादनीय इत्याशंक्यात्मस्वरूपत्वान्न संपाद्य इ-
त्याह नित्यानुभवेति उपपादितं कृतकृत्यत्वं निगमयति कृतकृत्यमिति ९८ एवं

विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्या-
द्विकारिणः ९७ नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक् कृतं कृत्यं प्रापणी-
यं प्राप्तमित्येव निश्चयः ९८ व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा म-
माकर्तुरलेपस्य यथारब्धं प्रवर्त्ततां ९९ अथवा कृतकृत्योऽपि लोकानुग्रह-
काम्यया शास्त्रीयेणैव मार्गेण वर्तेऽहं का मम क्षतिः १००॥

सर्वत्र कर्तृत्वानभ्यु-
पगमे नियतवृत्तित्वमसङ्गतमित्याशंक्य प्रारब्धवशान्नियतवृत्तित्वमंगी-
करोति व्यवहार इति लौकिको भिक्षाटनादिः शास्त्रीयो जपसमाध्यादिरन्यथा-
पि प्रतिषिद्धस्त्र्यादिको व्यवहारः कर्तृत्वरहितस्य मम प्रारब्धकर्मानतिक्रम्य

मा भूत्तस्य वा मननेन विपर्ययनिरासार्थं निदिध्यासनं कर्तव्यमित्याशंक्य देहादावा
त्मबुद्धिलक्षणस्य विपर्ययस्याभावात्तदपि नापेक्ष्यमित्याह विपर्यस्त इति ६३ न
नु विपर्ययाभावेऽहं मनुष्य इति व्यवहारः कथं जायत इत्याशंक्य वासनावशाद्भवती
त्याह अहं मनुष्य इत्यादीति ६४ तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्धये ध्यानं संपादयामि

ण्वंत्वज्ञास्तत्त्वमेते जानन्कस्माच्छृणोम्यहं मनुतां संशयापन्ना न मन्येह
मसंशयः ६२ विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये देहात्मत्वविपर्या
सं न कदाचिद्भजाम्यहं ६३ अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चि
राभ्यस्तवासनातोऽवकल्पते ६४ प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते
कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ६५ विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानम
स्तु ते बाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ६६ ॥

त्याशंक्य प्रारब्धक्षय
मन्तरेण तस्य निवृत्तिर्नास्तीत्याह प्रारब्धेति ६५ ननु प्रारब्धनिमित्तकस्य व्यवहार
स्य विरलत्वाय ध्यानं कर्तव्यमेवेत्याशंक्य व्यवहारस्याबाधकत्वदर्शनान्न विहन्न

पं·टी· अ· पर

ज्ञानिनामिच्छानन्तुष्टाप्रशिष्यकाभिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीय
ते अतो निर्विषयकल्पहकारिणा : परिहसनीयत्वमित्यर्थः ७७ कर्मानुष्ठानप्रयो
जनस्यान्यत्वाज्ज्ञानिनोऽप्युपयोगाभावात् इति शंकते प्रवृत्तिरिति उपयोगाभावो निहन्ता।
तपि सुमानन्दत्तिप्रविहरति निवृत्तिरिति निवृत्तेर्बोधहेतुत्वाद्बोधे उपयोगाभावस्तु
शंकते बोधहेतुरिति नहि प्रवृत्तिरपि बोधसमाहेतुत्वादुपयोगवतीत्याह बुभुक्षा

देहवाग्बुद्धयस्तत्काम्याज्ज्ञानिनान्यन्तबुद्धितः कर्मी प्रवर्त्यत्वामिज्ञानिनो हीयते त्र
किम् ७७ प्रवर्तनोपयुक्ता चेन्निवृत्तिः कोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां
तथेतरा ७८ बुद्धश्चेन्न बुभुत्सेत नान्योऽसौ बुद्धतेऽपुनः अबाधादनुवर्तेत बोधो न
त्वन्यसाधनात् ७९

यामिति ७८ ननु बुद्धस्य बुभुत्साभावात् प्रवृत्तिरनुपयोगी
त्यमिति पुनः शंकते बुद्धश्चेदिति नहि स्वबुद्धस्य पुनर्बोधाभावः तद्वन्निवृत्तिरपि बु
द्धं प्रत्यनुपयोगिनीत्याह नान्यसाविति सकृज्ज्ञानस्य बोधस्य स्थिरत्वाय निवृत्तिः।
रपि त्वन्तरस्याप्यस्थिरत्वकार्यकाभावमप्येतन्नेतु निनसाधनत्वं बमित्याह अबाधा
दिति बाधकप्रमाणान्तर [illegible] बाधाभावादनुवृत्तिः साद्व

149

शास्त्रीयप्रवृत्तिमार्गे प्रवर्त्तनांगीकारे तदुक्तं भिध्यानमयोक्तः विवादः स्यादेवेत्याशंक्या ह देवार्चनेत्यादिना श्लोकद्वयेन नारभ्य वेदाम्नायमस्तकं वेदान्तशास्त्रं ॥ २१ ॥ फ लितमाह एवमिति २३ विभिन्नविषयत्वमेव स्पष्टयति वपुरिति २४ स्वस्वविषयो ज्ञा निकर्मिणोः कलहं कुर्वाते तो विहृवादः परिहसनीयाविन्याह एवंचेति २५ कुतर्य

देवार्चनस्नानशौचभिक्षादौ वर्त्ततां वपुः तारं जपतु वाक् तद्वत् पठत्वाम्नायमस्तकं २१ विष्णुर्ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयतां साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये २२ एवं च कलहः कुत्र संभवेत्कर्मिणो मम विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् २३ वपुर्वाक्धीषु निर्बंधः कर्मिणो न तु साक्षिणि ज्ञानिनः साक्षिलेपत्वे निर्बंधो नेतरत्र हि २४ एवं चान्योन्यवृत्तान्तानभिज्ञौ बधिरान्धवत् विविदेतां वृ। हि मन्तो हसन्त्येव विलोकयन्तो २५ यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित्। ब्रह्मत्वं हि तां तत्र कर्मिणः किं विहीयते २६ ॥ विद्यास्तवमित्याशंक्यानिर्विषय कलहकारित्वादित्याह यं कर्मीत्यादिना कर्मीयं साक्षिणं कर्मानुष्ठानापयो गि देहतावपुष्ट्यानीति कर्मणामात्मानं न विजानाति तत्तत्त्वविदा तत्स्वस्वब्रह्मत्वेनेहे कर्मि

पे० ५
स०
५२

दर्शितं केचिदाज्ञयति निंदितस्तुति विद्वान्मैत्रैर्निंदितः स्तूयमानो वा स्वयं न निंदितिं तेनो
लिकिं तेषामज्ञानां यथा वोपजायते याचेत ५१ एवमाचरणानिमित्तमाह
येनायमिति अयमज्ञानी अचारस्मिन् लो विद्याये न यावदज्ञानेन तेनाचरण
न दुष्यते तेन स्वर्गं गच्छति तदाचरणं तेन कर्तव्यमेव न हि ह देवकार्यान्तरमवि
भ्रष्टं त्वं तेन लस्याह अज्ञप्रबोधार्थमिति यजत्वाहि दत्तं न विद्वः अज्ञलोके प्रवृत्तः ।
निंदितः स्तूयमानो वा विद्वान्मैत्रैर्न निंदति तस्मोति किं तु तेषां स्वाय यथा वोपयत्त ।
याचेत ५१ येनायं न दत्तेनाचरणं तेन कार्यमेव तत्र अज्ञप्रबोधार्थे न वान्यतः का
र्यमत्रान्न हि दुः ५२ कृतं कृत्यं तथा तत्रः शास्त्रवाक्यानयानुतः त्यक्त्वैवस्व
मतस्त्वामन्यते सोनितरा ५३ ॥ यथा दत्तकर्तव्यैर्वा स्यात् स्वदनुस्मरणेन
लवोपुनः कर्तव्यमित्यर्थः ५२ एतच्छिष्यमाणं प्रशस्तार्थमाह कृतं कृत्यं तथेति
अस्मो विद्वान् पूर्वोक्तप्रकारेण कृतं कृत्यं तत्कृतं तज्जानेयनासौ कृतं कृत्यं
स्वभाव स्वज्ञानतयात्रस्मात् वक्ष्यमाणप्रकारेण शास्त्रवाक्यतया शास्त्रवाक्ययेन
तः शास्त्रवाक्यैः स्वस्वभाव स्वज्ञानतयात्मस्वमन्तसानितरामेव मन्यते ५३

५३

3-नं-५२४
151

पं॰ द॰
श्लो॰
२

ध्यासकृतिः

ॐ. पं. द.
टी. १

ॐ श्रीगणेशाय नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ कोशपंचविवेकस्य क्रियते व्याख्या व्याः
समासतः १ तैत्तिरीयोपनिषत्प्रसिद्धो य आत्मा तत्तत्पंचकोशविवेकात्प्रकाशते तस्मात्
मानस्याचार्यस्तत्र श्रोतृप्रवृत्तिसिद्धये संबंधप्रयोजनमभिधेयं च सूचयन्नेव ग्रन्थकौशलं प्रदर्शयति ।

गुहाहितं ब्रह्म यत्तत्पंचकोशविवेकतः बोद्धुं श
क्यं ततः कोशपंचकं प्रविविच्यते १ ॥ ॥

इति गुहाहितमिति यो वेद निहितं गुहायां परमे व्योमन्निति श्रुत्या गुहानिहितत्वे
नोक्तं यत्तद्ब्रह्मास्ति गुहा बुद्धिरित्यन्नमयादिकोशपंचकविवेकेन ज्ञातुं शक्यते १
ततः ... कोशानां पंचकं प्रकर्षेणात्मनः सकाशाद्विभज्य प्रदर्श्यते ... विविच्य

देहान्तरस्थस्यैव भाव्यस्य इन्द्रियदेहाद्यपकाराभावादप्रयोजकत्वमित्यत्र देहान्तरस्याशङ्कामकृताभ्यागमकृतवि।
प्रणाशाख्यबाधकसद्भावादिन्द्रियादेर्नित्यत्वं इत्यत आह ए[illegible]न्मनीति एतद्देहरूपस्यात्मनः पूर्वस्मि
न् जन्मन्यसत्त्वात् देहजन्मदेहनाशयोरात्मभेदप्रसङ्गान्मनोऽप्यङ्गीक्रियमाणत्वादकृताभ्यागमः
मनसोऽपि तत्र जन्माभावेन जन्मान्यस्य देहरूपकस्यात्मनोऽसत्त्वाद्भावादिहोत्पत्तिनैयत्यात्प्रागपरा
पर्ययोः फलभोक्त्रभावेन भोगासमवाय्यधिकरणत्वेनापि प्रसङ्गेनाप्यकृतविप्रणाशः एवं कृत।

पूर्वजन्मन्यसत्त्वेन तज्जन्मसंपादकत्वं भाविजन्मन्यसत्कर्म न भुञ्जीत हन्त चित्तं ॥ श्लो०
देहत्वं लयकृच्छ्रलाभाय प्रवर्तकः शास्त्रः प्राणमयोमयो नाम्नवात्मचैतन्यवर्जनात् ५

नाशाकृताभ्यागमरूपबाधकसद्भावादात्मनः कार्यत्वं नाङ्गीकर्तव्यमिति भावः ॥ एवम
न्नमयकोशस्यानात्मत्वं प्रदर्श्य प्राणमयकोशस्य रूपेण तदनात्मत्वं च दर्शयति एवं इति योजना।
गुर्देहरूपाणः पादादिमस्तकपर्यन्तव्यापकः सन्त्वलयप्रयत्नकृच्छ्रलाभानरूपेण साक्षात्प्रयत्नकृच्छ्रलाभा
णाच वचनादीनामिन्द्रियाणां प्रवर्तकः प्रेरकोऽप्रवर्तितेऽस्ति वायुप्राणमयः स्थूलत्वाच्च साक्षात्ना
नाभवति तत्तद्देहमाह चैतन्येति विवादास्पदीभूतः प्राणमयमात्मन भवति जडत्वात् घटादि

ननु केयं गुहा यस्यां निहितं ब्रह्म कोशपंचकविविक्तेनाऽनुभूयत इत्याशंक्य तां गुहामाह ।
नन्विदं तिमन्थमाह देहादिति देहोऽन्नमयात्मात्मा प्राणमयोऽभ्यन्तरः प्राणः प्राणमयात्मनः
मनोमयः अभ्यन्तरः अन्तरस्ततो मनोमयात् विज्ञानः विज्ञानमयोऽभ्यन्तरः अन्तर इत्यनुषज्य
ते तेनो विज्ञानमयादानन्दमयः सोऽपि पूर्ववदन्तर इत्यर्थः सेयं अन्नमयाद्यानन्दमया
नानापदपा गुहा गुहाहेतो व्यवस्थ्यर्थः १ इदानीं अन्नमयस्य स्वरूपं तदनात्मत्वं च दर्शयति

देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः । ततः कर्ता ततो भोक्ता गुहा सेयं परंपरा २ पितृभु
क्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्द्धते । देहोऽन्नमयो नात्मा प्राक् चोर्ध्वं तदभावतः ३ ॥

पितृभुक्तेति पितृभ्यां भुक्तान्नजात्पितृभुक्तान्नजात् वीर्याच्छोणिताद्दिरूपात् जायमानं यद्वीर्यम
स्मिन्नस्माद्वीर्याज्जातो देहो जातः यश्च जनन्याऽन्नरसेनाद्यन्नेनैव वर्द्धते स देहोऽन्नमयोऽन्नस्य
विकारः स आत्मा न भवति कुत इत्यत आह प्रागिति जन्मनः प्राक् मरणादूर्ध्वं च तदभावः त
स्य देहस्याभावादित्यर्थः विवादाध्यासितो देह आत्मा न भवति कार्यत्वात् घटादिवत्
इति भावः ३ ॥

पं॰ द॰
टी॰
३

ननु मनोबुद्ध्योरन्तःकरणत्वाविशेषान्मनोमयविज्ञानमयरूपेण कोशद्वयकल्पनानुपपन्नेत्या
शङ्क्य कर्तृत्वकरणत्वाभ्यां भेदसद्भावात् तद्रूपवन्मनोमयादिभेदइत्याह कर्तृत्वेति अन्तरिंद्रि
यम् अन्तःकरणं कर्तृत्वकरणत्वाभ्याम् आकाररूपेण अ... रूपेण विक्रियेत परिणमतइत्यर्थः
एते विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भवतः एते च परस्परम् अन्तर्बहिर्भावेन वर्तेते ततः

154

कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिंद्रियं विज्ञानमनसी चांतर्बहिस्त्वेते परस्परं ८ काचिदं
तर्मुखा वृत्तिरानंदप्रतिबिंबभाक् पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ९ ॥ ॥ ॥

कोशद्वयत्वम् उपपद्यतइत्यर्थः ८ इदानीं भोक्तृशब्दवाच्यस्यानंदमयस्यानात्मत्वं दर्शयितुं त
स्य स्वरूपमाह काचिदिति पुण्यभोगे पुण्यकर्मफलानुभवकाले काचिद्वृत्तिरन्तर्मु
खा सती आनंदप्रतिबिंबभाक् आत्मस्वरूपस्यानंदस्य प्रतिबिंबं भजते सैव भोगशान्तौ पुण्यकर्म
फलभोगोपरमे सति निद्रारूपेण लीयते विलीना भवति सा वृत्तिरानन्दमय इत्यभिप्रायः ९

३

इदानीं मनोमयस्यानात्मत्वप्रदर्शनपूर्वकं तस्याऽऽत्मत्वं निराह अहंताममेति देहे अहंताममेदं भावो।
गेहादौ ममतां मयीतामभिमानं च यः करोत्यसौ मनोमय आत्मा न भवति कुतस्तत्राह
कामादिदिति हेतुगर्भितं विशेषणं कामक्रोधादिवृत्तिमत्त्वेनानियतस्वभावत्वादित्यर्थः मनो
मय आत्मा न भवति विकारित्वादिति भावः ६ अनन्तरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य

अहंताममतां देहे गेहादौ च करोति यः कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमय ६
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगाः चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभा ७

वपुःप्रदर्शितत्वदनात्मत्वं दर्शयति लीनेति या चिच्छायोपेतधीश्चिदाभाससहिता बुद्धिः सुषु
प्तिकाले लीना सती बोधे जागरणकाले आनखाग्रगा नखाग्रपर्यन्तं व्याप्ता सती वपुः
शरीरं व्याप्नुयात् संव्याप्य वर्तते सा विज्ञानमयशब्दभाक् विज्ञानमयशब्देनोच्यमाना नासावा
त्मा न भवति विलयादिमत्त्वात् घटादिवदित्यर्थः ७ ॥ ॥

पं॰ द॰
रू॰
४

परिहरति वामिति अत्र निद्राशब्देन निद्रानंदो लक्ष्यते निद्रादयो देहान्ताउपलभ्यन्ते ऽनेनाना
नुभूयन्त इति यदुक्तं तत्संपुकथं तद्दृशितद्भिन्नस्यात्मनो भोक्तारत्वमतस्त्वाह तथापीति
अन्यस्यानुपलभ्यमानत्वेऽपि यद्देतेषामानंदमयादीनामुपलभ्यमानता भवतीत्यतो नभा
वकथनमाशंक्यतः इत्यर्थः १२ ननु केनापीऽन्यस्या.... गदिविषयत्वसंतृप्तलभ्यत्वेन चोप
लभ्यत्वे ऽतो नास्तीत्याशंक्याह स्वयमिति आनंदमयादीनां सातिशयाऽनुभूतत्वादेवान

वाऽथ निद्रादयः सर्वेऽनुभूयन्तेनेन चेन्नरः तथाप्येतेऽनुभूयन्ते येन तं को निवारयेत् ॥ १२
स्वयमेवानुभूतित्वाद्धि यत्तेनानुभाव्यते ज्ञातृज्ञानान्तराभावादज्ञेयो न त्वसत्तया ॥ १३

155

भाव्यत्वेनास्तीति ननु अनुभवरूपेण्यनुभाव्यत्वं कुतो न स्यादित्याशंक्याह ज्ञात्विति ज्ञा
ता च ज्ञानं च ज्ञातृज्ञाने ज्ञातृज्ञानान्तरयोरभावस्तस्मादज्ञेयः ज्ञानविषयो न भवतीति
ज्ञात्राद्यभावाद्वा न ज्ञायते स्वस्यैवासत्वाद्वा किमत्र विनिगमने कारणमित्यत आह नवि
ति निद्रानंदादिसातिशयनानामात्वस्यैवमेवानिराकृतत्वादिति भावः १३ ॥

४

तस्यनात्मत्वमाह कदाचित्कत्वइति आनंदमयोपिकदाचित्कत्वादात्मानस्यात्स्यादि
पदार्थवदित्यर्थः ननु विषमानानामानंदमयादीनां सर्वेषामात्मत्वनिरासेनैरात्म्यप्रस।
ङ्गेनेत्याशंक्याह बिंबेति बुद्ध्यादेःप्रतिबिंबतयावाच्यत्वंसर्वरूपादिष्वनुवाचस्यानंदमयस्य
बिंबस्तुतःकारणस्वैतोयस्यानंदेःसेवात्माभवतिऊतत्स्मतत्याह सवदेति नित्यत्वादि

कदाचित्कत्वेनात्मास्यादानंदमयत्वं बिंबस्तेयस्यानंदस्यात्मासौसर्वदास्थिते ।९।
ननेदंमयकस्यानिद्रानंदानवस्तु मात्मस्वात्मत्वमन्यस्तु नकश्चिदन्यस्यते ।१०।

त्यर्थः विवादाध्यासितस्यानंदस्यात्माभवितुमर्हतीति नित्यत्वाद्यस्यात्मानभवतिनासोनि
त्योयथाहहादिगगनादेरुत्पत्तिमत्वेनाःनित्यत्वादानेकांतिकत्वनिभावः नोदयति
नात्येति अन्नमयप्राणमनोविज्ञानानंदमयाख्यानांकोशाणांमध्ये हेतुभिरात्मत्वेनचटते वेन्माकादिष्वा
न्यस्यात्मानुपलभमानत्वाद्वैवमभवतीत्यर्थः ॥ ॥ ॥

पं॰ द॰
३
५

उक्तार्थे प्रमाणमाह स्वयमिति अनात्मवत्कः स्वयंज्योतिर्भवति यस्मात्सर्वस्मात्परतः
श्रुतिर्भातितमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिश्रुतेरत एवात्म
नः स्वप्रकाशत्वेनाप्रमेयत्वमित्यर्थः ५ येनेदं सर्वं विजानाति तं केन विजानीयाद्धि तादृशमात्म
ममेतं केन विजानीयादिति वाक्यमर्थतः पठति येनेदमिति [illegible] नत्वादिवैनत्वरूपत्वात्
नेदं सर्वं दृश्यजातं जानाति तं प्राणिनस्तत्सादिणमात्मानमन्यः केन साधनेन जानीयात्

स्वयंज्योतिर्भवत्येष पुरोऽस्माभासते विभाः तमेव भान्तमन्वेति तद्भासा भासते जगत् ६
येनेदं जानते सर्वं तत्केनान्येन जानताम् विज्ञातारं केन विद्याच्छक्तं वेद्ये तु साधनम् ७

ज्ञानतावगतिः प्रश्नः सा अस्यैव वाक्यस्य तात्पर्यमाह विज्ञातारमिति दृश्यजातस्य वि
ज्ञातारं केन दृश्येन करणेन विद्याज्जानीयात् न केनापि जानातीत्यर्थः ननु मनसा ज्ञास्यती
त्याशङ्क्याह शक्तमिति साधनं तु ज्ञानसाधनं मनो वेद्ये ज्ञातव्ये विषये शक्तं समर्थं
न तु ज्ञातरि यन्मनसा न मनुत इत्यादिश्रुतेस्तस्यापि ज्ञेयत्वे कर्मकर्तृत्वविरो।
धात्त्विति भावः ८

156

५

अनुभवरूपस्यात्मनोऽनुभाव्यताभावे दृष्टान्तमाह माधुर्यादीति आदिशब्देनौजःप्रसादयोर्ग्रहणं
तेन माधुर्यादयः स्वभावाः सहृदयैर्विशेषाद्वेद्या माधुर्यादिस्वभावा गुणादयः तेषामा-
त्मत्वसम्बन्धेऽपि तदर्थैरुपमाकादिभिः स्वगुणाभिव्यक्तिः स्वगुणाभिव्यञ्जकानां माधुर्यादीनां यथा तेषां निश्च-
यगुणाभिव्यक्ता तेषां तस्मिन्नात्मरूपे गुणादिस्वलक्षणानन्दरूपतामापेदाना तेषां माधुर्यादीनां गुणा-

माधुर्यादिस्वभावानामन्यत्रास्वगुणाभिव्यक्तिमापन्नानाम् तस्मिन्नन्दरूपतामापेदानां नोऽन्यथात्वमाद्यप-
के । ४ । अन्यत्वं नारदादिनैव व्यक्तिरूपतात्स्वभावता मा भूत्तथानुभाव्यत्वेनैवानात्मानन्दो-
ऽयं ते ॥

तदनुरोधेन रूपेणास्याकोऽनां माधुर्यादिकं केन विनिर्दिष्टं नित्यमादर्शनीयमिन्द्रियेन रूपेणावितो न
वधिपैतिकिंचान्यदर्थकं नास्ति गुणादीनां माधुर्यादिशब्दवत्त्वं तत्त्वेनात्मनीनमर्थः । ५ । सह-
दृष्टान्तफलितमाह अर्थकेति माधुर्यादिसमर्थकवत्त्वेन नाभावे विपक्षे गुणादीनां मा-
धुर्यादिस्वभावविनाशप्रयोगापत्तिरिति एवमात्मनोऽप्यनुभवविषयत्वं मा भूदनुभवरूपतात्मनः

ओं
श्रीदिविद

पं. ६.
८.
६

बोधो न बुध्यतेऽन्यस्मिन्किं — वक्ष्यमाणेनेति दृष्टान्तमाह जिज्ञासेति भेजिज्ञासितवान्नेवान्यत्र किं
भोग्यं यथा लज्जाथैकेवलं लज्जाजननायैव भवति न तु हितसत्ताज्ञापनाय जिज्ञासेव
नाभासमानं यथानेनैवं मया बोधो न बुध्यते इतः परं बोधः यत्र स्थितिः पिनाटघीलज्जादि
न्तनेवबोधो न विनात्र स्वावबोधात्सिद्धेरित्यर्थः २८ भवतेवं तव बोधस्य यत्नत्याथापि ग्रहणमिति

157

जिज्ञासेति निवेष्टुकिंलज्जाथैकेवलं यथा न बुध्यते मया बोधो बोधस्य इतनाटघी २८
यस्मिन्यस्मिन्न किंलोके बोधस्तत्तु पिबतो यद्बोधमात्रेण द्वैतेन्यं वधीद्रवति स्वयः २९

स्वावबोधे किमायातमित्याशङ्क्याह यस्मिन्निति लोके जगति यस्मिन् यद्दिलद।
रोविषयबोधो नान्यस्मिन्न तदुपेतः तेनास्य तदादि विषयस्य बोधस्तत्र ।
दृशो हन्तस्तनि यद्बोधमात्रेण तदादि द्विष्ठितं तवान्तस्तन्नयतस्फुरणमालितदेवद्वैतेन्यव
तृणानादिद्वैतस्थानि स्वयोऽवस्थावगतिरित्यर्थः २९ ॥ ॥

आत्मनः स्वप्रकाशत्वमेव दर्शयति सुवेदेति वेद्यं न च तस्यास्ति वेत्ता अन्यदेव तद्विदितादथो
अविदितादधीति वाक्ये ह्ययमभिप्रायस्तामिति मन्वानस्तद्व्याकरोति ह्ययमर्थश्चेतः पठितं सुवेदे
ति तस्मात्तमात्मापरोक्षं यतस्तं सर्ववेत्तिन तस्यात्मनो वेदिता ज्ञाताऽन्यो नास्तीति ह्ययमस्तद्रूपकं
विदिताविदिताभ्यां विदितेनाज्ञानेन ज्ञानेन विषयीकृतं अविदितमज्ञातमज्ञानेनावृतं
ताभ्यां पृथग्विलक्षणं बोधरूपत्वादेवेत्यर्थः न तु विदिताविदिताभ्यां निरस्तो बोधो नाऽज्ञस्य

सुवेदेति वेद्यं न तस्य वेत्तान्यस्तस्यास्ति वेदिता विदिताविदिताभ्यां तत्पृथग्बोधस्वरूपकं ॥१८॥
बोधेऽप्यनुभवो यस्य न कथंचन जायते तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिम् ॥१९॥

नन्वात्मस्वरूपं विदितविशेषणवेदनेऽपि बोधस्वरूपत्वात्तदनुभवाभावे विदितस्यार्थस्य
अनुभवाभावप्रसंगात् हेयानुभवोऽस्यस्वरूपमङ्गीकर्तव्यमित्याशंक्य परिहारमाह बोधेऽपीति यस्मा
द्यस्य बोधेऽपि विचाराद्विस्फुरणात्मकोऽप्यनुभवः साक्षात्कारः कथंचन कथमपि न जायते तं
लोष्टं नरसमानाकारं लोष्टवज्जडमनुभवशून्यं शास्त्रं कथं बोधयेत् न कथ
मपि बोधयेदित्यर्थः ॥१९॥ १९

पं.सू.
ल.
७

ननु स्वात्मतत्त्ववाधेवश्यनिवार्हीभविष्यतीत्याशंक्यतत्त्वाविधःकोपिनास्तीत्याह स्वात्म
तत्त्वमिति भ्रान्तिरूपंकार्यविद्यायान्यस्माद्यथायाःस्वस्याभावःकेनापिनाशीक्रियतइत्यर्थः
ऊतएवंनिश्चीयतइत्याशंक्याह अतइति यतःकस्यचिद्रोचतेऽतएवकृतिर्बाधस
तत्त्ववादिनोबाधकत्वे २४ केयंकृतिरित्याकाङ्क्षायामस्त्रद्वैतादिकाशङ्कनिमर्थः

स्यात्सर्वंनतुकस्यचिद्रोचतेविभ्रमंविना अतएवकृतिर्बाधकत्वे
बाधतत्त्ववादिन २४ असद्ब्रह्मेतिचेद्वेदस्वयमेवभवेदसत् ॥
अतोऽस्यमाभूद्धेयस्वंस्वसत्त्वंतदभ्युपेयतामात् २५ ॥ ॥

पठति असदिति यदिब्रह्मासदितिजानीयात्तर्हिस्वयमेवब्रह्मणोऽसत्त्वंस्यात्अन्यस
नुभवतस्तस्यैवब्रह्मस्वरूपत्वादित्यर्थः फलमाह अतोस्येति २५ ॥
॥ ॥

158

पं॰ द॰
त॰
८

159

नह्यहं स्फुरत्यमितिहि द्वितीयं पद्यं तत्फलप्रदर्शनव्याजेन परिहरति अवेद्य इति इंद्रियजन्य
ज्ञानविषयत्वाभावेऽप्यपरोक्षत्वात्स्वप्रकाश इत्यर्थः अत्रायं प्रयोगः आत्मा स्वप्रका
शः संवित्कर्मत्वमन्तरेणापरोक्षत्वात् संवेदनवदिति ननु विशेषणासिद्धो हेतुः आ
त्मनः संवित्कर्मत्वं कर्मकर्तृभावविरोधप्रसंगात् स्वस्वरूपेणाकर्तृत्वे विशिष्टरूपेण
कर्मत्वमित्यविरोध इति चेन्न गमनक्रियायामप्येकस्यैव स्वस्वरूपेणाकर्तृत्वे विशिष्ट।

अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययम् । सत्यं
ज्ञानमनंतं चेत्यस्तीह ब्रह्मलक्षणम् ॥ २८ ॥

रूपेणाकर्मत्वमित्यतिप्रसंगात् न च साधनविकलो दृष्टान्तः संवेदनस्य संवेद।
नान्तरापेक्षायामनवस्थानादिति ननु आत्मनः स्वप्रकाशत्वेन सिद्धत्वेऽपि ब्रह्मल
क्षणाभावान्न ब्रह्मत्वमिति इत्याशंक्यानन्तलक्षणान्तरं योजयति सत्यमिति स
त्यं ज्ञानमनंतं ब्रह्मेति श्रुत्या यद्ब्रह्मणो लक्षणमुक्तं तदिहात्मनि विद्यत इत्यर्थः
२८ ८
२८

ऽस्तीमात्मनः स्वप्रकाशत्वं च कुकामलस्येच्छाभावे कीदृक्स्वरूपमिति प्रश्नस्याशय
पयति कीदृशीति अयमभिप्रायः आत्मनं ईदृक्त्वादिना केनापि रूपेणावेशिष्टाङ्गीकार
लेनैव रूपेणावर्तिस्यात् दृन्तेङ्गीकारे ऽस्वत्वमिति सत्यमीदृक्त्वाद्यङ्गीकारेण येवं वेद्यतेनन्न
नाङ्गीकृत्येन इत्याह ईदृकेति उपलक्षणमेतन्नाटकत्वस्यापि उभयाभावमेवाह यद
नीतिदृशीति न हि प्रतिलामाणेत्रेणार्थसिद्धिरिनात्मशोकाईदृक्त्वाटकाशाहयोर्ययम

कीदृक्त्वं ही विनष्टं हे ईदृक्त्वं नास्ति नश्वरि । यद्वा नीदृगनाटकं नेतत्स्वरूपं विनिश्चित
२६ प्रदाणां विषयत्वीदृक्पदेत्वात् दृग्वाचे विषयीनात्वविषयः स्वतानात्स्वपरोक्षता

२८

मिदृश्यानत्वं दृवाच्यत्वमुपपादयति प्रमाणानामिति विषयीनात्वविषयः स्वता
त्मापरोक्षतेति आत्मनः प्रत्यक्षस्यैव ज्ञातादीदृक्शब्दवाच्यत्वं दृश्यपरोक्षस्यैवं यथा
दृश्यादृक्शब्दवाच्यत्वं दृशात्मनः स्वतोरिन्द्रियजन्यज्ञानविषयत्वाभावादीदृक्त्वस्यैव
परोक्षत्वाभावान्नाटकत्वमित्यर्थः

२८

पं द्व°
२
१

नन्वस्य नित्यत्वानन्तत्वयोरात्मनि सिद्धत्वेऽप्यानंत्यं न तदनेन ब्रह्मणोऽपि नित्यस्यासिद्धेरित्याशं-
क्याब्रह्मणो नानन्तत्वं साधयति नव्यापित्वादिति नित्यं विभुं सर्वगतं सुसूक्ष्मं आकाश-
वत्सर्वगतश्च नित्यः नित्यो नित्यानां चेतनश्चेतनानां इत्यादिसर्वश्रुतयमात्मा सर्वदेहेषु दृष्टो वेदे स्मृत्या
मित्यादिस्मृतिभिश्च व्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादनाद्ब्रह्मणो विविधमप्यानन्त्यं दे-
शकालवस्तुकृतपरिच्छेदराहित्यमभ्युपेतव्यमित्यर्थः नकेवलं श्रुतिः किंतु युक्तितो

नव्यापित्वाद्देशतो नो नित्यत्वान्नापि कालतः नवस्तुतोऽपि सर्वात्म्यादानन्त्यं ब्रह्मणि त्रि-
धा २५ देशकालान्यवस्तूनां कल्पितत्वाच्च मायया न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं
स्फुटं ततः २६

प्रीत्याह देशकालेति परिच्छेदहेतूनां देशकालान्यवस्तूनां मायया क-
ल्पितत्वाच्च गंधर्वनगरादिभिर्गगनस्येव न देशादिभिः कृतः पारमार्थिकपरिच्छेदो ब्रह्मणो
संभवति यतोऽतो ब्रह्मणआनंत्यं नाम तदेकमेव न द्वितीयमस्त्यस्मात्सर्वाद्वैतवस्तुसत्त्वे वाज्ञ्ह
वं न विचिकित्स्यमित्येवं सत्यमात्मैवत्र सिद्धो द्वितीयब्रह्मभवति प्रयमात्मा ब्रह्मेत्यादि।
भिरात्मनो ब्रह्मत्ववेदप्रतिपादनात् स्यान्नत्यसिद्धमिति तात्पर्यार्थम् २६ ॥

161

ननु जडस्य जगतो ब्रह्मण्यारोपितत्वेन ब्रह्मणः परिच्छेदकत्वाभावेऽपि चेतनयोर्जीवेश्वरयोः
भेदसंभवात्तत्कृतपरिच्छेदवत्त्वेनानंत्यं ब्रह्मणो न संगच्छत इत्याशंक्य तयोरप्यौपाधिकरूपत्वे
न परमार्थिकत्वाभावान्न तयोरपि वास्तवपरिच्छेदहेतुत्वमित्यभिप्रायेणाह सत्यमिति य
त्सत्यादिरूपं ब्रह्म तदेव वस्तु तदेव पारमार्थिकं तस्य ब्रह्मणो यल्लोकवेदसिद्धमीश्वरत्वं जीव
त्वं च तदुभयमप्युपाधिद्वयेन कल्पितं अतः कल्पितत्वादीश्वरत्वजीवत्वयोरपि तत्परिच्छे

सत्यं ज्ञानमनन्तं यद्ब्रह्म तद्वस्तु तस्य तत् । ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पितम् ॥ ३७
शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका । आनन्दमयमारभ्य गूढा सर्वेषु वस्तुषु ॥ ३८

दकत्वाभाव इति भावः ॥ ३७ ॥ किं तदुपाधिद्वयमित्याकांक्षायां तदुभयं क्रमेण दर्शयि
तुं तदादावीश्वरोपाधिभूतां शक्तिं निरूपयति शक्तिरिति ऐश्वरी ईश्वरोपाधितया ईश्वर
संबंधिनी काचित् सदसत्त्वादिभिः रूपैर्निर्वक्तुमशक्या सर्ववस्तुनियामिका सर्वेषा
मन्तर्यामिब्राह्मणोक्तानां पृथिव्यादीनां नियमेन स्ववस्तूनां नियामिका नियमकर्त्री श
क्तिरस्ति सा कुत्र वर्तिष्यतीति कुतो वा नोपलभ्यत इत्याशंक्याह आनंदमयादिष्वन्नमयांतेषु
सर्वेषु वस्तुषु गूढा वर्तते । अतो नोपलभ्यत इत्यर्थः ॥ ३८ ॥

पं॰ द॰ टी॰ १२

प्रमितत्वादिति श्रुतिभ्यः ततोपि किमित्यत आह ब्रह्मेति न जायते न म्रियते वा विप
श्चिदित्यादिश्रुतेः ब्रह्मणो ह्यावज्जन्म नास्ति अतएव विद्वानपि स्वात्मनस्तद्रूपत्वाव
गमान्नैव जायते न च पुनरावर्तते इति श्रुतेरिति ४३ ॥ इति श्रीमत्परमहं

163

य एवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयं ब्रह्मणो ना
स्ति जन्मातः पुनरेव न जायते ४३ इति श्रीको
शविवेकसंपूर्णम् ३

सपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदु
षा विरचिते पंचकोशविवेकव्याख्याने संपूर्णम् समाप्तम् ॥ तृतीयप्रकरणम्
॥ ३ ॥

१२

जीवत्वेन पश्यन्नज्ञानां कोशानां प्रत्येकमभिहितानां त्रिविधं जीवत्वमिदानीमाह कोशो
पाधिरिति कोशगतस्वोपाधिः कोशोपाधिः न हि विद्यायामयं सोचन्तायां क्रियमाणायां ब्रह्मैव
सम्पादितलक्षणमेव जीवनं जीवत्वव्यवहारविषयतामागच्छतीत्येकस्यैवं विरुद्धधर्मद्वय
योगित्वे पुत्रपौत्रकालापि दृष्टचरमित्याशङ्क्याह पितेति यथैकस्य देवदत्तस्यैकदैव पुत्रं प्रति
पिता भवति पौत्रं प्रति पितामहः एवं ब्रह्मण्यपि कोशोपाधिविवक्षायां जीवो भवति शुद्धप

प्रकोशोपाधिविवक्षायां याति ब्रह्मैव जीवितां पितापितामहश्चैकः पुत्रपौत्रयोः प्रति ४१
पुत्रादेरविवक्षायां न पिता न पितामहः तद्वद्ब्रह्मणो नापि जीवः शुद्धिकोशयोः विवक्षाया ४२

रपि विवक्षायामीश्वरभावः प्रत्यक्षः यस्तत्त्वं जीवत्वमीश्वरत्वं ब्रह्मत्वं नास्तीत्येतत्स्य द
र्शितमाह पुत्रादेरिति इदानीमनूज्ञानस्य फलमाह य एवमिति यः साधनचतुष्टयस
म्पन्नः प्रकारेण पञ्चकोशविवेकपूर्वकं स्वात्मानं प्रत्यगभिन्नं सत्यादिलक्षणं वेद साक्षा
त्जानाति एवमस्य यं ब्रह्म भवति तस्माद्वै नान्यस्मै ब्रह्म वेद ब्रह्मैव भवतीति श्रुतिर्वदति

केवटत्वतन्नत्वात् परिविशेषणानि संविदो हेतुः संविदः स्वेयत्वे कर्तृकर्मभावविरोधात् परवेद्यत्वेऽनव
स्थानात् अतः स्वप्रकाशत्वेन भासमानायाः संविदः सर्वावभासकत्वसंभवान्न जगदान्ध्यप्र
संग इति भावः ७ भवत्वेवं संविदो नित्यत्वं स्वप्रकाशत्वं च तत्र किं सिद्धमित्यत आह इयमिति अत्रा
यं प्रयोगः इयं संविदात्मा भवितुमर्हति नित्यत्वे सति स्वप्रकाशत्वात् यन्नैवं तन्नैवं यथा घट
इति न चात्मनः संविद्रूपत्वप्रसाधनेन तस्य तत्त्वमपि प्रसाधितं भवति नित्यत्वानित्यत्वा
भावात् नित्यत्वे सत्यन्यत्वेन स्यादित्यतो नित्यत्वमिति विशेषणं कृतं त्वात् इति भावः॥

इयमात्मा परानन्दः परप्रेमास्पदं यतः । मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ॥ ८ ॥

त्मन आनन्दरूपत्वं साधयति परेति आत्मा इयमनन्तरश्लोके परस्या संविद आनन्दरूपत्वानन्दो निरतिश
यस्तद्रूप इत्यर्थः ननु हेतुमाह परेति परेतो यस्मात्कारणात् परस्य निरुपाधिकत्वेन निरति
शयस्य प्रेम्णः स्नेहस्यास्पदं विषयस्तस्मात् अत्रेदमनुमानम् आत्मा परमानन्दरूपः परमप्रेमा
स्पदत्वात् यः परमानन्दरूपो न भवति नासौ परमप्रेमास्पदमपि यथा घटः न तथा चायं परप्रेमा
स्पदं न भवति तस्मात्परमानन्दरूपो न भवतीति न चात्मनि निरुपाधिकत्वमिति हेतुरसिद्ध इत्याशङ्क्य

५-२-५

पं. ८. प्र. ५

165

फलितमाह तेनेति तेन निरतिशयप्रेमास्पदत्वेनात्मनः परमानंदता निरतिशयसुखस्वरूप
त्वसिद्धेः ६ एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थमिति घटः स्फुरतीत्य
स्त्यादिना ज्ञानस्यानित्यत्वं प्रसाध्य तस्यैवेत्यमात्मास्यात्मत्वप्रसाधनेनात्मनः सच्चिद्रूपत्व
प्रसाधितं परमानंदइत्यादिना च परमानंदरूपत्वं समर्थितं तथात्मा महावाक्ये त्वंपदार्थः स
च्चिदानंदरूपः सिद्धः तत्र कालत्रयात्मनोऽनुवृत्तेर्वाक्यगतानामनुपनिषद्वाक्यानि निर्विषयत्वेनाप्रामा

अतस्तत्त्वमसीत्येन परमानंदतात्मनः ६ इत्थं सच्चित्परानंद आत्मा युक्त्या तथाविधम्
परं ब्रह्म तयोश्चैक्यं श्रुत्यंतेषूपदिश्यते ७ अभाने न परं प्रेम भाने न विषये स्पृहा ॥

एवं पूर्वग्रंथेऽन्याशंक्याह तथेति तथात्वात् प्रत्यग्विधाप्रकारो यस्मात् तथाविधं सच्चिदानंदरू
पं परं ब्रह्म तत्पदार्थस्तयोस्तत्त्वंपदार्थयोरैक्यं अखंडैकरसत्वं च श्रुत्यंतेषु वेदांतेषूपदि
श्यते प्रतिपाद्यत इति अतो न वेदांतानां निर्विषयत्वमित्यर्थः ७ आत्मनः परमानंदरूपत्वा
भावेऽपि स्वभावेनेति परमानंदरूपत्वं न भासते भासते वा अभाने अप्रतीते न परप्रेमा
निरतिशयः स्नेहो न स्यात् विषयसौंदर्यज्ञानजन्यत्वात् स्नेहस्य भाने प्रतीते तेन तु विषये स्पृ

वि२

एवंसंबंधनिमित्तकत्वेनान्यथासिद्धत्वात्प्रेमाख्यात्मन्यन्नभवसिद्धत्वान्मैवंमितिपरिहरति
मानभूवंमिति हियस्मात्कारणादात्मनिविद्यमानंभूवमहंमाभूवमितिनममास्त्वेक
दापिमाभूवत् किंतुभूयासमेवसदासन्तमेवममभूयादित्येवंविधप्रेमद्रष्टानेसर्वैरनुभू
यतऋतोन्यासिद्धिरित्यर्थः ८ माभूवत्वत्तुयासिद्धिः प्रेमाद्यात्वेप्रमाणाभावाद्धिप्रेमासि

नत्वेमात्मार्थमन्यच्च
नैवमन्यार्थमात्मनि ॥

द्धिर्दृतोदित्याशंक्याह नत्वेमेति अन्यच्चस्वातिरिक्तपुत्रादेर्यत्प्रेमतदात्मार्थंतेषामात्म
प्रियत्वनिमित्तकमेवनस्वाभाविकं एवमात्म निविद्यमानंप्रेमान्यार्थंनात्मनोऽन्यशे
षत्वनिमित्तकंनभवतिकिंत्वात्मनिमित्तकमेवातोनिरुपाधिकत्वात्परमंनिरतिश
यम् ॥ ॥ ॥ ॥

पे· द·
प्र·
७

कथंप्रकारो देवतिर्यगादिभेदेन विविधो भवतीत्यर्थः यथाम्बुजादिष्वेकैवमात्मा तु स्वात्मसमुद्भूतः शरीरत्रितयाद्वीरैः परब्रह्मैव जायते ऽन्यत्र तत्त्वशरीरत्रितयादिवैचित्र्यस्य जीवस्य परब्रह्मत्वेव दर्शितं तत्र तानि कानि त्रीणि शरीराणि तदुपाधिको वा जीवः किंरूपो भवतीत्याकांक्षायाम्। सर्वं क्रमेणाभ्युत्पादयति साकारेति सा अविद्याकारणशरीरं स्यात् स्थूलसूक्ष्मशरीरादि।

२·४

साकारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् १८

166

कारणं स्वप्रकृत्यवस्थाविशेषत्वात् कारणत्वमुपचारात् शीर्यतेऽनेन ज्ञानेन नश्यति चेति शरीरं स्यात् तत्र कारणशरीरेऽभिमानवान् तादात्म्याध्यासेनाहमित्यभिमानवान् जीवः प्राज्ञः प्रज्ञास्वविनाशिस्वरूपानुभवरूपायस्य स प्राज्ञः प्रज्ञ एव प्राज्ञः तन्नामकः स्यादित्यर्थः १८ ॥ ॥ ॥ ॥

७

इदानीं प्रतिबिंबहेतुमविद्यां प्रतिपादयितुं तन्मूलभूतां प्रकृतिं प्रस्तौति चिदानंदेति यच्चिदा-
नंदरूपं ब्रह्म तस्य प्रतिबिंबेन प्रतिच्छायया समन्विता युक्ता तमोरजःसत्त्वगुणा सत्त्वरजस्तमोगुणानां
साम्यावस्था प्रकृतिरित्युच्यते सा च द्विधा द्विप्रकारा भवति चकारादवांतरप्रकारांतरं सूचयति
॥१५॥ तद्द्वैविध्यमेव दर्शयति सत्त्वेति सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिर्गुणांतरेणाकलु-

चिदानंदमयब्रह्मप्रतिबिंबसमन्विता । तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ॥१५॥ सत्त्वशुद्ध्य-
विशुद्धिभ्यां मायाविद्ये च ते मते । मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥१६॥ अविद्यावश-
गस्त्वन्यस्तद्वैचित्र्यादनेकधा ॥

षीकृतता अविशुद्धिर्गुणांतरेण कलुषीकृतता ताभ्यां सत्त्वशुद्ध्य-
विशुद्धिभ्यां ते च द्विविधे मायाऽविद्ये मायेत्यविद्येति च मते संमते विशुद्धसत्त्वप्रधाना माया मलिन-
सत्त्वप्रधानाऽविद्येत्यर्थः एवं मायाविद्ययोर्भेदमुक्त्वा तदिदानीं दर्शयति मायेति मायायां बिंबो मा-
यायां प्रतिफलितश्चिदात्मा तां वशीकृत्य स्वाधीनीकृत्य वर्तमानः सर्वज्ञः सर्वज्ञत्वादिगुणक
ईश्वरः स्यात् अविद्यावशगोऽविद्यायां प्रतिबिंबत्वेनास्थितः तत्परतंत्रश्चिदात्मा त्वन्यो जीवः
स्यात् स च तद्वैचित्र्यात्तस्या अविद्याया उपाधिभूताया वैचित्र्याद्विचित्रतातस्तस्मादनेकधा भवे

प॰ ह॰
पु॰
८

करणानां प्रत्येकमसाधारणकार्यमभिधायमेवं साधारणकार्यमाह तैरंतःकरणानि तैः
सत्त्वांशैः सर्वैः संभूयवर्तमानैरंतःकरणं मनोबुद्ध्युपादानभूतं द्रव्यमनुपजायते इत्यनुषंगः
तस्यांतरभेदमवांतरमाह वृत्तीति तदंतःकरणं वृत्तिभेदेन परिणामभेदा
देन हि यादि प्रकारो भवति वृत्तिभेदमेव दर्शयति मनइति विमर्शरूपं विमर्शः संशयात्मिका
वृत्तिः सा स्वरूपं यस्याः सा निश्चयात्मिका वृत्तिर्बुद्धिः स्यात् २१ क्रमप्राप्तानां रजोंशानां प्रत्येक॰
स्यनतयानन्यतः स्यात् निश्चयात्मिका निश्चयोऽध्यवसायः स आत्मा स्वरूपमस्याः असाधारण

तैरंतःकरणं सर्वैर्वृत्तिभेदेन तद्द्विधा। मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका २१ रजो॰
गुणः प्रवृत्तिरूपः कर्मात्कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे २२
तैस्सर्वैः सहितैः प्राणो वृत्तिभेदात्स पंचधा ॥

कार्यांतरमाह रजोंशैरिति तेभ्यो विषयादीनामे
कपंचभि रजोंशै रजोभागैस्स्वोपादानभूतैः वाक्पाणिपादपायूपस्थाभिधानानि पंच नामका
नि कर्मेंद्रियाणि यानि क्रियाजनकानींद्रियाणि जज्ञिरे २२ रजोंशानामेकसाधारणकार्यमा
ह तैः सर्वैरिति सहितैः संभूयकारणतां गतैः प्राणो जायत इति शेषः तस्यांतरभेदमाह
वृत्तीति स प्राणो वृत्तिभेदात्प्राणापानादिव्यापारभेदात्पंचप्रकारो भवति ॥ ॥

मि॰

त्रुटितेयं॰

८

167

प्रा॰पं॰१

कर्मभ्यो निःसृतं शरीरं तद्व्याधिकं जीवं च मृत्पाद्यितं तत्कारणकार्यादिसृष्टिमाह नमः
प्रधानेति । तद्गुणायतेषां मात्रादीनां भोगायतनस्यावि : रूपसाकारमिद्ध्यैतन्नमः प्रधानप्रकृतेः
नमो गुणप्रधानायाः प्रकृतेः एवोक्ताया उपादानकारणभूतायाः सकाशादीश्वराज्ञयाऽऽश्मना
दिपात्रिगुणात्मकजगदुत्पत्तिरूपायाउत्पादेर्वं कर्मजेनेच्छारूपनिमित्तकारणभूतया ।
वियदादीनि स्थिरिकृतानि पंचभूतानि जज्ञिरे प्रादुर्भूतानि इत्यन्वयार्थः भूतसृष्टिमभि

नमः प्रधानप्रकृतेस्तद्गुणायेश्वराज्ञया वियत्पवनतेजोम्बुभुवो भूतानि जज्ञिरे १९ सत्वां
शैः पंचभिस्तेषां क्रमाद्धीन्द्रियपंचकम् श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते २० ॥

धायभौतिकसृष्टिमभिधानसां देशोक्तानेन्द्रियसृष्टिमाह सत्वांशैरिति तेषां वियदादीनां पं
चभिः सत्वांशैः सत्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं धीन्द्रियपंचकं धीन्द्रि
याणि ज्ञानेन्द्रियाणि तेषां पंचकं क्रमादुपजायते एकैकभूतसत्वांशादेकैकमिन्द्रियं जाय
ते इत्यर्थः २० ॥ ॥ ॥
॥ शि७

यौ तैजसहिरण्यगर्भयोर्व्यष्टित्वसमष्टित्वं च भवति तत्र एवं भेद इत्यर्थः २५ ईश्वरस्य समष्टिरूपत्वे
जीवानां च व्यष्टिरूपत्वे कारणमाह समष्टिरिति ईशः ईश्वरो हिरण्यगर्भः सर्वेषां लिंगशरीरोपा
धिकानां तैजसानां स्वात्मना तादात्म्यवेदनात् स्वात्मना तादात्म्येनैकत्वसंवेदनात् ज्ञानात् समष्टि
र्भवति ततः ईश्वरादन्ये जीवास्तु तदभावात् तस्य तादात्म्यवेदनस्याभावात् व्यष्टिसंज्ञया व्यष्टि
शब्देन कथ्यन्ते २६ एवं लिंगशरीरतदुपाधिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा स्थूलशरीराद्यु

समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात्। तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया २५
तद्भोगाय पुनर्भोग्यभोगायतनजन्मने। पञ्चीकरोति भगवान् प्रत्येकं वियदादिकम् २६

त्पत्तिसिद्धये पञ्चीकरणं निरूपयितुमाह तद्भोगेति भगवान् ऐश्वर्यादिसंपन्नः परमेश्वरः पुनः पु
नरपि तद्भोगाय तेषां जीवानां भोगायैव भोग्यभोगायतनजन्मने भोग्यस्यान्नपानादेर्भोगायतन
स्य जरायुजादिचतुर्विधशरीरजातस्य जन्मने उत्पत्तये वियदादिकम् आकाशादिभूतपञ्चक
प्रत्येकमेकैकं पञ्चीकरोति स्वपञ्चात्मकं पञ्चात्मकं सम्पद्यमानं करोतीत्यर्थः २६ ॥ ॥

दृतिभेदानेव दर्शयति प्राण इति तेषु नस्तेन्नभेदाः प्राणादिपञ्चवाच्या इत्यर्थः २२ पदद्वयं नाका
शादिशब्दानां तान्ताहंशिकक्कान्त दिदानीं दर्शयति बुद्धीति बुद्ध्युपस्थानानि कर्माणि व्यापारस्त
ज्ञानकानीन्द्रियाणि श्रोत्रादीनि बुद्धिकर्मेन्द्रियप्राणपञ्चकानि तैर्मनसा विमर्शात्मकेन धि
या निश्चयरूपया बुद्ध्या च सप्तदश सप्तदशभिः सप्तदशभिरवयवैः सूक्ष्मशरीरं भवति तस्यैव सं
ज्ञान्तरमाह लिङ्गमिति उक्तेनैव दानेनेत्यर्थः एवं सूक्ष्मशरीरमभिधाय तदभिमानप्रयुक्तं प्राज्ञे

प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः २३ बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया शरीरं
सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते २४ प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते हिरण्यगर्भतामी
शस्तयोर्व्यष्टिसमष्टिता २५ ॥

स   शरीरयोरवस्थान्तरं दर्शयति प्राज्ञ इति मलिनसत्त्वप्रधानाऽवि
द्योपाधिको जीवस्तत्र तैजस शब्दवाच्योऽन्तःकरणोपाधिर्लक्षितं लिङ्गशरीरे ... अभिमानेन ता
दृश्याभिमानेन तैजसत्वं तैजसनामकत्वं प्रपद्यते प्राप्नोति ईशो विशुद्धसत्त्वप्रधानमायोपाधि
कः परमेश्वरस्तत्र शरीरे अहमित्यभिमानेन हिरण्यगर्भतां हिरण्यगर्भत्वं प्रपद्यते ... तैजस
हिरण्यगर्भयोर्लिङ्गशरीराभिमाने सति तयोः परस्परभेदः किंनिबन्धन इत्यत आह तयोरिति ना

तेऽपि च भवन्तीत्याह हिरण्येति अस्मिन् स्थूलदेहे वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत् तत्रैव वर्त-
मानास्तैजसा विश्वा भवन्ति तेषामवान्तरभेदमाह देवेति इदानीं तेषां विश्वतैजसप्राज्ञानां जी-
वानां तत्त्वज्ञानरहितत्वेन संसारासक्तिप्रकारं स्पष्टं श्लोकद्वयेनाह तेपरेति ते देवादयः
पराग्दर्शिनो बाह्यानेव घटादीन् पश्यन्ति न तु प्रत्यगात्मानं पराञ्चि खानि व्यतृणत्स्वयंभूः
तस्मात्पराङ् पश्यति नान्तरात्मन् इति श्रुतेः तत्त्वतः किं कादयो देहव्यतिरिक्तमात्मानं जानन्ति

हिरण्यगर्भः स्थूलेऽस्मिन्देहे वैश्वानरो भवेत् २९ तैजसा विश्वतां याता देवतिर्यङ्नरादयः
ते पराग्दर्शिनः प्रत्यक्तत्त्वबोधविवर्जिताः ३० कुर्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते न
द्यां कीटा इवावर्तादावर्तान्तरमाशु ते ३१ व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम् ॥

तीत्याशङ्कायां यद्यप्यात्मानं ते जानन्ति तथापि स्थूलसिद्धं तत्त्वं न जानन्तीत्यभिप्रायेणोक्तमित्याह प्र-
त्यगिति अत एव भोगाय स्वलोकानुभवाय मनुष्यादिशरीराणाम् ...पिष्टपकर्म तत्तत्कुर्वते
चितानि कर्माणि कुर्वते ज्ञात्वैकवचनम् पुनश्च कर्म कर्तुं देवादिशरीरैस्तत्तत्फलं
भुञ्जते फलानुभवाभावेन तत्तत्सजातीयेच्छानुपपत्तेस्तत्सायत्नानुष्ठानानुपपत्तेः ३०

१०

169

कथमेकैकस्य पंचात्मकत्वमित्यत आह द्विधेति वियदादिकमेकैकं द्विधा विधाय तत्र ये ते गोत्राविनो
द्विधाभूताः विधायकृत्वा भागद्वयोपेतं कृत्वेत्यर्थः पुनस्तु पुनरपि प्रथमं भागं चतुर्धा भागं चतुष्ट-
योपेतं विधायेत्यनुषज्यते स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरेंशाश्चतुर्णां चतुर्णां भूता-
नां ये ये द्वितीयभागाः स्थूलस्तैस्तैः सह प्रथमभागानां चतुर्णां चतुर्णां एकैकस्य योज-
नाद्वियदादयः प्रत्येकं पंच पंचात्मका भवंति ॥२७॥ एवं पंचीकरणमभिधाय तेभ्यस्तैरुत्वा पंचका

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते ॥२७॥ तैरण्ड-
स्तत्र भुवनभोग्यभोगाश्रयोद्भवः ॥ ॥

र्यवर्गं दर्शयति तैरिति तैः पंचीकृतैर्भूतैरुत्पादि-
तकारणभूतैरंडो ब्रह्माण्ड उत्पद्यते तत्र ब्रह्माण्डे भुवनानि उपरिभागे वर्तमाना भूरादयः स-
प्त लोका अधस्तस्थाः स्थितान्यतलादीनि सप्त पातालानि तेषु च भुवनेषु तेषु तैः प्राणिभिर्भो-
क्तुं योग्यान्यन्नादीनि तत्र लोकोचितशरीराणि च तैरेव पंचीकृतैर्भूतैः शरीरस्य तान्युत्पाद्यन्ते एवं
स्थूलशरीराण्यभिधाय तेषु स्थूलशरीरेषु अभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य
वैश्वानरसंज्ञकत्वमेकैकस्थूलशरीरे च अभिमानवतां व्यष्टिरूपाणां तेजसोनां विश्वसंज्ञक

पं॰ द॰
प्र॰
११

त्वेनान्नादयः कोशास्तत्त्वाकोशत्वायेनानुपदिशति अन्नमिति अन्नप्राणो मनो बुद्धिरानंदश्चेत्येते पंच कोशाः बुद्धिर्विज्ञानं तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमाह तैरिति तैः कोशैरावृतः आच्छादितः आत्मा स्वरूपम् अतः विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जन्मादिरूपं संसारं व्रजेदिति स्पष्टं कोशो यथा कोशकारकृमेरावरकत्वेन कोशशब्देनैवमन्नादयोऽप्यानन्दान्तावरकत्वेनात्मनः कोशशब्देनात्र कोशशब्दप्रयोगेनेत्यर्थः ३१ तेषां कोशानां स्वरूपाणि क्रमेण प्रतिपादयति

अन्नं प्राणो मनो बुद्धिरानंदश्चेति पंच ते कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत् ३१ स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञिकः लिंगे तु राजसैः प्राणैः प्राणः कर्मेंद्रियैः सह ३२

स्यात्पंचीकृतेत्यादिर्नमोहादिहेतिभिरित्यंतेन सार्धश्लोकद्वयेन स्यादिति पंचीकृतेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नसंज्ञिकोऽन्नमयशब्दितः कोशः स्यात् प्राणस्तु प्राणमयः कोशः लिंगे लिंगशरीरे वर्तमानै राजसैः रजोगुणकार्यभूतैः प्राणैः प्राणादिभिर्वायुभिः पंचभिर्वागादिभिः कर्मेंद्रियैः सह दशभिः स्यात् ३२ ॥

170

एवं भ्रमन्तो जीवा नदीप्रवाहपतिताः कीटा यावन्नोद्धर्तारं नरमाश्रयन्ते तावन्निर्वृतिं
स्वां वृत्तिं न लभन्ते एवमात्मजन्मनोपि जन्मव्रजतः स्वां वृत्तिं नैव लभन्ते इति २१ एवं संसारमाप्ते
मभियायतनिरीक्षणपायदर्शयितृदृष्टान्तेन तावदाह सत्कर्मेति तेकीटाः सत्कर्मपरिपाकात्
पूर्वोपार्जितपुण्यकर्मपरिपाकात् कृपालुना केनचित् पुरुषविशेषेणोद्धृतान्नदी
प्रवाहादुद्धृताः स्थापिताः सन्तस्तीरतरुच्छायां प्राप्य स्वास्थ्यं यथा भवन्ति तथायं देही विश्राम्यति २२

सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः प्राप्य तीरतरुच्छायां विश्राम्यन्ति यथासुखम् २२
उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः पंचकोशविवेकेन लभन्ते निर्वृतिं पराम् ॥ २३

नदीतीरदृष्टान्तेसिद्धमर्थं दार्ष्टान्तिके योजयति उपदेशमिति एवमनेकेन प्रकारेण पूर्वोपार्जि
तपुण्यपरिपाकवशाद्देवात्तत्त्वदर्शिनः प्रत्यगभिन्नब्रह्मसाक्षात्कारवत आचार्यात् गुरोः स
काशादुपदेशं तत्त्वमस्यादिवाक्यार्थज्ञानसाधनं श्रवणादिलक्षणमवाप्य संप्राप्य पंचको
शविवेकेन अन्नमयादीनां पंचानां कोशानां विवेकेन वक्ष्यमाणविवेचनेन परां निर्वृतिं
मोक्षं स्वाभाविकं लभन्ते शान्ता भवन्ति २३ ॥ ॥

पं. द.
प्र.
१२

कथं तर्हि विविच्यात्मनो ब्रह्मत्वं भवतीत्याशंक्य कोशेभ्यो विवेकाद्भवतीत्याह अन्वयेति अन्वयव्यतिरे
काभ्यां वक्ष्यमाणलक्षणाभ्यां पंचकोशविवेकतः पंचानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्म
नो विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्करणेन स्वात्मानं पंचकोशेभ्य अन्नमयादिभ्य आत्मनः पृ
थक्करणेनात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य उद्धृत्यानिष्कृष्य विद्वान् स्वबुद्ध्या निश्चि
त्य परं ब्रह्म प्रष्टवीं कलत्रणं प्रपद्यते प्राप्नोति ब्रह्मैव भवतीत्यर्थः ३८ इदानीं विवक्षितेनान्वयव्यतिरे

अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः आत्मानं ततः उद्धृत्य परं ब्रह्म प्रपद्यते ३८ अभाने स्थूल
देहस्य स्वप्ने यद्भानमात्मनः सोन्वयो व्यतिरेकस्तद्भानेन्यानवभासनम् ३९॥

कोट दर्शयति अभानइति स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभानेऽप्रतीतौ सत्यां।
मात्मनः प्रतीचो यद्भानं स्वप्नसाक्षित्वेन परिस्फुरणमस्ति तस्यात्मनो अन्वयः तस्यामेव स्वप्नाव
स्थायां तद्भानेन तस्यात्मनः स्फुरणेन तत् अन्यानवभासनमन्यस्य स्थूलदेहस्यानवभासनमप्र
तीतिर्व्यतिरेकः स्थूलदेहस्येति शेषः आस्मिन् प्रकरणे अन्वयव्यतिरेकशब्दाभ्यामनुवृत्तिव्या।
वृत्ती उच्येते ३९ एवं स्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेह
स्यानात्मत्वावगमकौ तौ दर्शयति लिंगेति तद्वत्सुषुप्तावस्थायां लिंगाभाने लिंगस्य

१२

171

विमर्शात्मा संशयात्मकं यच्च भवेत्तत्कार्यं यन्मनउक्तं तत्सात्त्विकैः प्रत्येकं भूतसत्त्वकार्यभूतैः
तैर्धीन्द्रियैः श्रोत्रादिभिः पञ्चभिर्ज्ञानेन्द्रियैः साकं सहितं मनोमयः कोशः स्यादिति एवं बुद्धिस्व
रूपः निश्चयात्मिका धीस्तेषामेव सत्त्वकार्यत्वप्रतिपादितैस्तैः पूर्वोक्तैर्ज्ञानेन्द्रियैरेव साकं सहिता
सती विज्ञानमयो विज्ञानमयाख्यः कोशः स्यात् ॥ कारणे कारणशरीरभूतायामविद्यायां स
त्त्वं मलिनसत्त्वं प्रियादिवृत्तिभिः प्रियमोदप्रमोदाख्याभिरिष्टदर्शनलाभभोगजन्याभिः वृत्तिवि
शेषैः सहितमानन्दमयः आनन्दमयाख्यः कोशः स्यादिति तत्स्थूलशरीरादीनामन्नमयादिशब्द

सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः । तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ॥ का
रणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः । तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ॥ ३७ ॥

वाच्यत्वे सत्यपि कथमात्मनः अन्नमयत्वमुपक्रम्य तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्रा
णमयः अन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतावात्मनोऽन्नमयादिशब्दवाच्यत्वं कथमुच्यते इत्या
शङ्क्याह देहादीनामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वेनात्मनः आत्मनस्तेन तेन को
शेन तादात्म्याभिमानात् तत्तन्मयत्वं तत्तत्कोशमयः स्यात् इत्यवहारकालेऽन्नमयादिकोशत्वान्ना
दन्नमयादिशब्दवाच्यत्वम् न शब्दवाच्यात्मनः कोशेभ्यो विलक्षणत्वेनात्मनः ॥ ३७ ॥

नादित्याह तदादिति आत्मा ... ३३

लिंगस्याभानं २

त्मदेहस्याभानेऽप्रतीतो आत्मनो भानं तद्वस्थादित्वेनात्मनः स्फुरणमन्वयः स्यात्तज्ज्ञाने।
आत्मभानेऽलिंगदेहस्य व्यतिरेक उच्यते ॥४॥ ननु पंचकोशविवेकप्रपंचस्य लिंगदेह
विवेचनप्रकृतात् संगतत्वाभावात्प्राणमयादिकोशत्रितयस्य तदेवान्तर्भावात्प्रकृत
संगतमित्याह नहीति वेकादितिनस्य लिंगदेहस्य विवेकात् विवेचनात्प्राणमनोधि।

लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः व्यतिरेकस्तु तज्ज्ञाने लिंगस्याभानमुच्यते ॥४॥
नहि विवेकाद्धि विक्ताः स्युः कोशाः प्राणमनोधियः ते हि तत्र गुणावस्थाभेदमात्रात्पृथ
क्कृताः ॥५॥

प्राणमनोधियात्मकाः कोशा विविक्ता आत्मनः पृथक्कृताः स्युः कुत इत्यत
आह नहीति हि यस्मात्कारणात्ते प्राणमयादयस्त्रयः तत्र लिंगशरीरे गुणावस्थाभे
दमात्रात् गुणयोः सत्वरजसोरवस्थाभेदमात्रात् गुणप्रधानभावेनावस्थाविशेषाद्दे
व पृथक्कृता भेदेन निर्दिष्टाः ॥५॥ ॥

तत्त्वंपदवाच्यार्थमाह यदेति तदेव ब्रह्म यदा यस्यामवस्थायां मलिनसत्त्वामीषत् रजस्तमोमिश्रणे
न मलिनसत्त्वप्रधानाम् तत एव कामकर्मादिदूषितामविद्यामाश्रित्य वा व्याप्नोति तेनोपाधिना जीवी
करोति तदा त्वंपदेनोच्यते ४९ एवं तत्त्वंपदार्थमभिधाय वाक्यार्थमाह त्रितयीति त्रितयी
मपि त्रिप्रकारामुपाधिं तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधानत्वभेदेनोक्तां त्यक्त्वा प
रस्परविरोधिनीं नामाद्यंशं त्यक्त्वा अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते

यदा मलिनसत्त्वां तां कामकर्मादिदूषिताम्। आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते ४९ त्रित
यीमपि तां मुक्त्वा परस्परविरोधिनीम्। अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते ५० सोऽयमित्या
दिवाक्येषु विरोधात्तदिदंतयोः। त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा ५१ ॥ ॥

इत्युक्तं ५० ननु केवलं लक्षणा हि त्याज्यवाक्यार्थबोधने कुत्र दृष्टमित्याशङ्क्याह सोऽयमिति सोऽयं दे
वदत्त इत्यादिवाक्येषु तदिदंतयोः तद्देशकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधाद्देका
नुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकाश्रयो देवदत्तस्वरूपमेकमेव यथा लक्ष्यते एवं दृष्टा
न्तमभिधाय दार्ष्टान्तिकमाह मायेति एवं सोऽयं देवदत्त इत्यादिवाक्ये यथा देवदत्तस्वरूपमे
कमेव लक्ष्यते तद्वत् परजीवयोरुपाधी उपाधिभूते मायाविद्ये सर्वोक्ति विहाय अखण्डमेदर्थम्

ननु किं महावाक्येन लक्ष्यते सविकल्पकमुत निर्विकल्पकमिति विकल्प्य प्रथमपक्षे दोषमाह एवं वादी सविकल्पेति सविकल्पस्य विकल्पेन विपरीतत्वेन कल्पितेन नामजात्यादिरूपेण सह वर्तत इति सविकल्पं तस्य लक्ष्यत्वे वाक्येनानुबोध्यत्वे लक्ष्यस्याकार्यत्वेन तथा लक्ष्यस्यावस्तुतास्यानित्यत्वं स्यात् द्वितीयं दोषमाह निर्विकल्पेति निर्विकल्पस्य नामजात्यादिरहितस्य लक्ष्यत्वं लोके न क्वापि दृष्टं न च संभवीति उपपद्यमानमपि न संभवति तद्रूपतयैव न निर्विकल्पकत्वव्याघातादिति यावत् ॥ ५ ॥ सिद्धान्ती तात्पर्यं त्वा ... मिति वि

मायाविद्ये विहायैवमुपाधी परजीवयोः । अखण्डं सच्चिदानन्दं परं ब्रह्मैव लक्ष्यते ॥ ४५ ॥ स
विकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्यादवस्तुता । निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च संभवि ॥ ५ ॥
विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत् । आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः ॥ ५ ॥

कल्पपूर्वकं दोषमाह विकल्पेति स... विकल्पस्य वा निर्विकल्पस्य वा लक्ष्यत्वमिति यो विकल्पस्त्वया कृतः स किं निर्विकल्पस्य उत सविकल्पस्य भवेत् आद्ये प्रथमपक्षे व्याहतिर्व्याघातो व्याघात एव अन्यत्र द्वितीये अनवस्थात्माश्रयादयः तथाहि सविकल्पस्य विकल्पस्य तत्र विकल्पेन सह वर्तत इत्यत्र तत्तृतीयान्तविकल्पपदेन प्रथमान्तविकल्प

स३

पं·द·
प्र·
१६

इदानीं निदिध्यासनमाह ताभ्यामिति ताभ्यां श्रवणमननाभ्यां निर्विचिकित्सेऽर्थे निर्गताविचिकित्सा संशयो यस्मात् स एवं निर्विचिकित्सस्तस्मिन् ध्येयविषये स्थापितस्य धारणाविषये वर्त्तमानस्य चेतसो देशान्तरवैयग्र्यं तस्य धारणेति ध्यानं तु लिनीकत्वाद्यैकतानत्वमेकाकारप्रवाहस्त्व दे३ त्वमेतन्निदिध्यासनमुच्यते हि प्रसिद्धं योगशास्त्रे तत्र प्रत्ययैकतानता ध्यानं स एव निदिध्यासितस्य परिपाकदशान्तु समाधिमाह ध्यातृध्यानइति निदिध्यासनेन तावत् ध्यातृध्याने

ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत् एकतानत्वमेतद्धि निदिध्यासनमुच्यते ५४
ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम् निवातदीपवच्चित्तं समाधिरभिधीयते ॥ ५५

ध्येयं चेति चित्तं यदा चित्तमभ्यासवशेन ध्यातृध्याने ध्यातारं ध्यानं परित्यज्य ध्येयैकगोचरं ध्येयमेकमेव गोचरो विषयो यस्य तत्तथाविधं भवति तदा समाधिरित्युच्यते तत्र दृष्टान्तः निवातदीपवदिति वायुरहिते प्रदेशे वर्त्तमानो दीपो यथा निश्चलो भवति तद्वदित्यर्थः ॥ ५५ ॥ चे३

ॐॐॐ

175

भवत्येवमन्यत्र अप्रतःकृते किमायातमित्यत आह विकल्पेति विकल्पतदभावाभ्यां विकल्पेन वि
कल्पाभावेन चासंस्पृष्टात्मवस्तूनि संस्पर्शरहितेपरमात्म वस्तूनि विकल्पितत्वलक्षणत्वसं
बंधाद्याः तत्र विकल्पितत्वं नाम स्वविकल्पस्वाधीनविकल्पस्यैव निरुपकेन विषयीकृतत्व
लक्षणं लक्षणाद्यन्यात्म्याप्यते संबंधः संयोगादिः आदिपदेन द्रव्यादयो गृह्यन्ते तथा हि
बंधायोग तत्र द्रव्यं नाम गुणानामाश्रयो द्रव्यं समवायिकारणं द्रव्यमिति तार्किके लिखितं

विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तूनि विकल्पितत्वलक्षणसंबंधाद्यास्तु कल्पिताः ॥ ५२
शून्यवादिकैस्तद्दृष्टान्तसंस्थानस्य वर्णाभवेत् प्रत्यात्मभावितत्वान्तु संस्थानमनेनेतनत् ५३

कर्मव्यतिरिक्तत्वे सति जातिमाश्रयो गुणाः नित्यमेकमनेकवृत्ति सामान्यं अनिवृत्तिजा
तिः संयोगविभागयोरसमवायिकारणजातीयं कर्मेति लक्षितानि क्रिया एते सर्वे स्वरूपेक
ल्पिता एवेत्यर्थः ५२ एतावता ग्रंथसंदर्भेण किं सिद्धं भवतीत्याकांक्षायां फलितमाह इम
मिति इत्यं जगतो यदुपादानमित्यादिग्रंथसंदर्भेणाकृष्य प्रकरणावाक्येन तत्वमस्यादिवाक्ये
स्तदर्थानुसंधाने स्तो पाचावचानामर्थस्य जीवब्रह्मणोरेकत्वलक्षणस्यानुसंधानेऽवबो

इत्याशंक्य सर्वं गुरुणी श्रीगुरुणोक्तमनेन निरूपितत्वात्सर्वमित्याह यथेति यथादीपो निवातस्थो नेंग
ते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकधा नानाप्रकारेण भगवान् ज्ञानैश्वर्यादिसंपन्नः सममेव नि
र्विकल्पकसमाधिरूपमर्थमर्जुनाय शिष्याय निरूपितवान् अस्य समाधेरवांतरफलमाह अना। ५८ २
दीति अनादौ स्मिन्निह अस्मिन्संसारे संचिताः संपादिताः कर्मकोटयः कर्मणां गणा उपलक्ष

यथादीपो निवातस्थ इत्यादिभिरनेकधा भगवानिममेवार्थमर्जुनाय न्यरूपयत् ५८
अनादाविह संसारे संचिताः कर्मकोटयः अनेन विलयं यान्ति शुद्धो धर्मोऽभिवर्द्धते ५९

णानां कोटयः उपलक्षणं अपरिमितानि कर्माणीत्यर्थः अनेन समाधिना विलयं यान्ति विन
श्यन्ति हीयन्ते वास्य कर्माणि तस्मिन् दृष्टे परावरे इति श्रुतेः ज्ञानाग्निः सर्वकर्माणीति स्मृतेश्च शु
द्धो धर्मः सविलासाविद्यानिवर्तकतत्त्वसाक्षात्कार
साधनभूतो धर्मोऽभिवर्द्धते स्पष्ट
५९॥

176

८

ननु समाधेरुत्तीर्णानामनुपलब्धेर्ध्येयैकगोचरत्वमपि निश्चेतुं न शक्यते इत्याशंक्याह तन्निमज्जा
वस्थानुमानगम्यत्वान्मैवमित्याह उत्तीर्णानामिति आत्मगोचरा आत्मगोचरा विषयाणां सं
तानादनुपलब्धिस्तदानीं समाधिकाले ज्ञाना आपि व्युत्थितस्य समाधेर्व्युत्थितस्य समव्युत्थिता इत्यज्ञातस्म
रणादेनावर्तकाले समाधिर्हितोऽस्त्येवमित्यर्थः व्युत्पादनमीर्थ्यते पश्चात्स्मर्यते न तदनु
भूतमिति व्याप्तेर्लोकसिद्धत्वादित्यर्थः ॥ ननु तदानीं तदनुभवादकप्रयत्नाभावात्कथं तदनु
भूतमिति [illegible] इत्याशंक्य तात्कालिकप्रयत्नाभावेऽपि प्राथमिकादेव प्रयत्नाददृष्टादि सहकारि

मो९ तदनुपलब्धिस्तदानीमज्ञानात्मगोचराः स्मरणादन्यथेत्ये व्युत्थितस्य [illegible] समव्युत्थितानां ॥
उत्तीर्णानामनुवृत्तिः प्रयत्नात्प्रथमादपि अदृष्टसहकृदभ्याससंस्कारसचिवाद्भवेत् ॥ ५८ ॥

सहिताद्भवतीत्याह उत्तीर्णानामिति ध्येयैकगोचरेणांतरुत्तीर्णानामनुवृत्तिःप्रवाहरूपेणान्।
गतिः प्रथमादपि प्रयत्नात्समाधिपूर्वकालीनादपि अदृष्टमसकृत्सकर्माभ्यासाय:
पुण्यविशेष: कर्म असकृत्संयोगिन त्रिविधमितरेषामिति यानेनं जनितात्स्वविनत्वात् य
दभ्यासकृदभ्यासात्संस्कार: पुन: पुन: समाधेर्भ्यासेन जनितो भावनाख्य: संस्कारविशेषस्त
भ्याससहकारिकारणीभूतात्सहवर्तमानाद्भवतीनितय समाधि: ध्यानाचार्येन निरूपितोऽदृष्ट

पं॰ टू॰
प्र॰
९८

फलितमाह वाक्यमिति वाक्यं तत्त्वमस्यादिवाक्यं अप्रतिबद्धं सत् कर्मवासनाभ्यां प्रतिबन्धरहि-
तं सत् प्राक् परोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते करामलकवत् करस्थितामलकमिव
अपरोक्षं ज्ञानं प्रसूयते जनयति इदानीं परोक्षज्ञानस्य फ- ६।१२
लमाह परोक्षमिति देशिकपूर्वकं गुरुमुखाल्लब्धं शाब्दं तत्त्वमस्याद्यागमजन्यं परोक्षं ब्रह्मवि-

वाक्यमप्रतिबद्धं सत् प्राक् परोक्षावभासिते । करामलकवद् बोधमपरोक्षं प्रसूयते ॥ ६२
परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं । बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥ ६३
अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकं । संसारकारणाज्ञानतमसश्चण्डभास्करः ॥ ६४

172

ज्ञानं बुद्धिपूर्वकं ज्ञानपूर्वकं यथा भवति तथा कृतं कृत्स्नं समस्तं पापं वह्निवद् दहतीति इदानीं
अपरोक्षज्ञानफलमाह अपरोक्षेति शाब्दं देशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानम- १८
परोक्षस्यात्मनो विज्ञानं संशयविपर्ययरहितं ६।१३ ॥

तत्र किं प्रमाणमित्यत आह धर्मेति योगवित्तमाः अतिशयेन योगज्ञाः ब्रह्मसाक्षात्कार
वेत्तार इत्यर्थः इमं निर्विकल्पकसमाधिं धर्ममेघं प्राहुः स्पष्टमन्यत् उपपादयति वर्ष
न्तीति यतः कारणादेष समाधिः धर्मामृतधाराः धर्मलक्षणा अमृतधाराः सहस्रशो वर्ष
न्ति तत्क्षणमेकं कलशानस्यापीतिस्रः तेऽतो धर्ममेघं प्राहुरिति पूर्वेणान्वयः १० इदानीम्।

धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः वर्षन्त्येष यतो धर्मामृतधाराः सहस्रशः १०
अमुना वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये
११

मार्थः परमप्रयोजनमाह अमुनेति अमुना समाधिना वासनाजाले अहंकारममकार
कर्तृत्वाद्यभिमानहेतुभूते तेषां विरूढसंस्कारसमूहे निःशेषं यथा भवति तथा प्र
विलापिते विनाशिते पुण्यपापाख्ये कर्मसंचये समूलोन्मूलिते मूलसहितं यथा
भवति तथोन्मूलिते उद्धृते विनाशिते इति यावत् ११ ॥

ॐ
पं॰ द॰
प्र॰ टी॰
६५

यज्ञानेनतत्संसारकारणाज्ञाननाशः संसारकारणं यदज्ञानमलिनदेवतमलसर्वंदृशास्करः
मथात्तत्कालीनमहेशः वाशतमसंज्ञज्ञात्वा ज्ञानतमसोनिवर्तकमित्यर्थः प्रथमा
नुफलमाह इत्थमिति नरस्त्वमनेनप्रकारेणतत्त्वविवेकंतत्त्वपदार्थात्मिकंतत्त्वानास्य
विवेकं कोशपंचकादिवेचनविधायकृत्वातस्मिन्तत्त्वेविधिवत्कास्त्रोक्तप्रकारेणमनः समा

इत्थंतत्त्वविवेकंविधायविधिवन्मनः समाधाय विगलितसंसृतिबंधः प्राप्नोतिपरंपदं
नरोनचिरात् ६५ ॥ इतितत्त्वविवेकः संपूर्णःसमाप्तम् १ ॥ ॥

धायस्थिरीकृत्यविगलितसंसृतिबंधोऽप्रयत्नेनज्ञानेननिवृत्तिसंसारबंधःसन्परंपदंनिरतिशया
यानंदरूपंनचिरादविलंबेनाप्नोतिसत्यज्ञानानंदलक्षणंब्रह्मैवभवतीत्यर्थः ६५ ॥ इति
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणश्रीरामकृष्णाख्य
विरचिततत्त्वविवेकदीपिकासंपूर्णासमाप्तम् १ ॥ ॥ शिव ॥

178

पं॰ द॰
च॰
१

ॐनमःगणपतये नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ मयाद्वैतविवेकस्य क्रियते पद
योजना चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिपूरणायाभिलषितदेवतानतिनमस्कारलक्ष
णं मंगलमाचरन्ग्रंथस्यैतत्प्रकरणत्वाच्छास्त्रीयमेवानुबंधचतुष्टयं सिद्धवत्कृत्य ग्रंथारं
भं प्रतिजानीते ईश्वरेणेति कारणोपाधिकेनोत्तर्यामिणा जीवेन कार्योपाधिकेनाद्वै

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते विवेके
सति जीवेन हेयो बंधः स्फुटी भवेत् १॥ ॥

प्रत्यगिना च सृष्टमन्नादि तद्द्वैतं तद्विविच्यते विभज्य प्रदर्श्यते अस्य द्वैतविवेचनस्य का
कदृत्तमफलावाप्तिः प्रयोजनमित्याशंक्याह विवेक इति जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचने कृ
ते सति जीवेन सृष्टेऽकेन हेयः परित्याज्यः बंधः द्वैतं स्फुटी भवेत् स्पष्टं ज्ञातं के दे नाव
जीवेन हेयमिति निश्चय इत्यर्थः १॥ ॥

इत्युक्त्वा जगत्कारणत्वेनैतिरीयश्रुतिप्रतिपन्नमात्मानमित्यभिप्रेत्य तद्वाक्यमर्थतः पठति खेति
सत्यज्ञानमनन्तं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिना श्रु
त्यन्तरप्रसिद्धेन वाक्येन तद्वाहितेन प्रत्यगभिन्नाद्ब्रह्मण आकाशादिदेहपर्यंतं।
जगदुत्पन्नमित्यभिधायाथ पश्चादपि सोऽकामयत बहुस्यां प्रजायेयेति स तपस्तप्त्वा इ

खंवाय्वग्निजलोर्व्योषध्यन्नदेहाः क्रमादमी संभूता ब्रह्मणस्तस्मादेतस्मादात्मनोऽ
खिलाः ४ बहुस्यामहमेवातः प्रजायेयेति कामतः तपस्तप्त्वाऽसृजत्सर्वं जगदित्याह तित्ति
रिः ५

दं सर्वमसृजत यदिदं किंचेति वाक्येन तस्यैव ब्रह्मणो जगत्स्रष्टृत्वेन
स्रष्टृत्वं कपर्यालोचितेन जगत्स्रष्टृत्वेति निरीहत्वमर्थः छांदोग्योपनिषद्ब्राह्मणेऽपि च। २
जगत्स्रष्टृत्वं श्रुतमित्याह इदमग्र इति सदेव सोम्येदमग्र आसीदेकमेवा।
द्वितीयमिति ॥ ॥ ॥

ननु स्रष्टृत्वं जीवानामेव जगदेतन्नामादिनोच्चार्यन्तीश्वरः कथमीश्वरः स्रष्टृत्वमस्य।
नेत्याशंक्याह श्रुतिविरोधान्नेदं चोद्यमन्यादृशित्वमहं सोत्यभिप्रेत्याश्वेताश्वतरा
कर्तारं वदन्नुपनतः पठति मायां त्विति मायोपाधिकमीश्वरं प्रकृतमस्मान्मायी सृजते।
विश्वमेतदिति नश्यैवं स्वरूपजगतः स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयन्तीत्यर्थः ऽत

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् अस्मान्मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः २
आत्मा वा इदमेक एवाग्र ईक्षत लोकान्सृजा इति सकल्पनात्सृजल्लोकान्सनानिति च बह्वृचः ३

ऐतरेयोपनिषद्वाक्यमर्थेनानुक्रामति आत्मा वा इति आत्मा वा इदमेक एवाग्र आसीन्ना
न्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतेत्यनेन वाक्येना
द्वितीयस्य परमात्मन एव जगतः स्रष्टृत्वं बह्वृचः ऋक्शाखाध्या
यिन आहुरित्यर्थः ३ ॥

पं·द·
व·
३

जगदिति तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतासौनामायमिदंरूपइति
वाक्येनस्पष्टः पूर्वस्थनामरूपतेनाव्याकृतशब्दवाच्यमायोपाधिकाद्ब्रह्मणोनामरूप
स्पष्टीकरणलक्षणसृष्टिरुक्तातन्नामरूपयोर्विराडादिस्थूलकार्यरूपस्पष्टताचतदिदं
मप्यतर्हिनामरूपाभ्यामेवव्याक्रियतेसौनामायमिदंरूपमितिवाक्येनाभिहितात्तेविस

181

जगदव्याकृतंपूर्वमासीद्व्याक्रियताधुना रूपाभ्यांनामरूपाभ्यांविराडादिभूतेस्फुटे ८
विराण्मनुर्नरागावःखराश्वाजावयस्तथा पिपीलिकावधिद्वन्द्वमितिवाजसनेयिनः ९

गद्यमात्मैवेदमग्रआसीत्पुरुषविधइत्यादिनाएवमेवयदिदंकिंचमिथुनंतना।
माऽऽपिपीलिकाभ्यःसर्वमसृजतेत्येतेनदर्शिताद्वन्द्वस्पष्टंउदाहृताभिःश्रुतिभिर्द्वैतस्पष्टा
भिधानानंतरंब्रह्मणोजीवरूपेणतत्रप्रवेशोप्यभिहितः ९

॥ ॥

२

सद्रूपमहं ब्रह्मोपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिना तत्प्रवेदाणु
वेकं तेजोबन्नानां नामरूपव्याकरणमभिधाय तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवंति अंडजं
जरायुजमुद्भिज्जमित्यादिना ऽन्नमयादिशरीरनिर्माणं तत्र च साम्यमगाद्वर्णयंत्यथर्वस्तु को।
पनिषदपि तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते सरू

इदमग्रे सदेवासीद्बहु स्यां प्रजायेयेति तत्तेजोवन्नादीनि ससर्जेति च साम्यगाः ६
विस्फुलिंगा यथा वह्नेर्जायंतेऽक्षरतस्तथा विविधाश्चिज्जडाभावा इत्याथर्वणिकीः श्रु
तिः ७

पाः तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंतीत्यथर्वशाखा
वाक्याद्ब्रह्मणो जगदुत्पत्तिः श्रूयते इत्याह विस्फुलिंगा इति ७ ॥ ॥ ॥
ॐ ॐ हरिर्हरिः फ्रंकरायनमः ॥
ॐ ॥ ॥ ॥ ॥

स्याह कुतेति कुतः नयः जैवं जीवसंबधिरूपं तस्य मतिविक्रियत्वं ह्यणो विलक्षणो विकारिरूपमित्य
र्थे देहे देहजातेन जीवत्वेऽकृतेऽत्यन्तस्याह जीवत्वमिति प्राणादीनां स्वामी तेन प्रकारेण प्राण
धारणेन स्मा जैवं रूपं कृत्वा प्राविशदिति किं तदित्यपेक्षायामाह चेतनत्वमिति सोऽपि प्राणेन
लिंगदेहोदयस्तेनास्मिन् लिंगदेहे विद्यमाने स्थिरो भावस्तत्स्वभावे धोत्रयाणां स्म + देह
कल्पनापरम्परं तत्तेन समाप्तियस्तत्र कल्पितो लिंग + देहे जीवस्य देहेनोच्यत इत्यर्थः ननु

कृत्वा रूपं तत्तरैजैवं देहादिकाभिमानी स्वरः इति तावः स्तनयः प्राकृजीवत्वं प्राणधारणात् । चे
तनत्वं चयदर्थिष्ठाने लिंगदेहस्थयः उत्तः विकृत्याया लिंगदेहस्य तनसैयां जीवउच्यते ॥ मोह
शरीतमायायां तस्यानिमाणशक्तिवत् विद्यते मोहशक्तिस्तत्र जीवं मोहयत्यसौ १२ ॥

ईश्वरस्यैव जीवरूपेण प्रविष्टत्वेन स्मात्तत्वत्र उः लिदिविरुद्धधर्मत्वं कृतत इत्याशंकयाह मोहे
शरीति मायिनं तन्महेश्वरमिति स्वतन्त्रका महेश्वरसंबंधिनी या माया तिलितस्यानिमा
णशक्तिवत् जगत्सर्जन सामर्थ्यवन्मोह शक्तिस्तु मोहन सामर्थ्यमप्यस्तितदेन जडमो।
हात्मकमिति स्थितिं तनः किमित्यत आह तं जीवमिति प्रसौ मोहनशक्तित्वद्वैतं कं जी
वं मोहयति चिदानन्दादिस्वरूपज्ञानरहितं करोति तेनापि किमित्यत आह ॥ ॥ ॥

किमुक्तं भवतीतित्राह ईशकार्यमिति जगत्स्रष्टृत्वेनोक्तश्रीहर्यादिरूपमीशकार्यं तेन
जीवभोग्यत्वेन च द्वाभ्यां सुवहमित्यर्थः एकस्योभयसंबंधदृष्टांतमाह पितृजन्येति ई
शजीवयोर्जगत्स्रष्टृत्वे किं साधनमित्यत आह मायेति ननु ईश्वरस्य स्वबलात्स्वरूपातिरि
क्तो भोग्यताकारत्वाभावात् किं तु जीवेन सृज्यत इत्याशंक्याह ईशनिर्मितेति एकस्मिन्नेव

ईशकार्यं जीवभोग्यं जगद्द्वाभ्यां समन्वितम् पितृजन्या भर्तृभोग्या यथा योषित्तथेष्य
ताम् ८ मायावृत्त्यात्मको हीशः संकल्पः साधनं जने मनोवृत्त्यात्मको जीवसंकल्पो
भोगसाधनम् ९ ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते भोक्तृधीवृत्तिनानात्वा
न्नैकरूप्येण भाव्यते २० ॥

विषयेष्वेकविधो भोग उपलभ्यमानस्तत्प्रयोजकेभ्यो
गप्याकारभेदं गमयतीत्यर्थः २० ॥ ॥

पं.द.
च.
६

ननु योषिद्विषयाणि भार्यात्वस्नुषात्वादिज्ञानान्येव भिन्नान्युपलभ्यन्ते तेन न तु तद्विषयवपुर्योषितः स्व
रूपभेदो दृश्यते तेषु प्रतियोगिविधया योषिन्निष्ठत्वकल्पने गुरुत्वमिति शंकते नन्विति ज्ञानवै
लक्षण्यस्यैव प्रवैलक्षण्याविनाभजनात्वाज्ञेयाकारभेदोऽङ्गीकार्य इत्याशयेन परिहरति

184

ननु ज्ञानानि भिद्यन्तां नाकारस्तत्र भिद्यते योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः २४
मैवं मांसमयी योषित्काचिदन्या मनोमयी मांसमय्या अभेदेऽपि भिद्यते हि मनोमयी २५
भ्रान्तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयम् जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् २६

मैवमिति ननु भ्रान्त्यादिस्थले बाह्यविषयाभावात्तत्रास्तु मनोमयत्वं प्रमितिस्थले ६
तु न तदस्य प्रयत्नेन बाह्यवस्तुनः सत्त्वादिति शंकते भ्रान्तीति मानेन प्रत्यक्षादिप्रमाणेन मेय
स्य प्रमेयस्येत्यर्थः २६ ॥

ननु सति भोग्यभेदे भोगभेदः कल्प्येत स एव नास्तीत्याशङ्क्य दृश्यमानत्वान्नैवमित्याह हृ-
ष्यतीति एको मणिं लब्ध्वा हृष्यति अन्यस्तथाविधस्तल्लाभात्क्रुध्यति अत्र मणौ वि-
षयविरक्तस्तं मणिं पश्यन्नेव लाभालाभनिमित्तकौ हर्षक्रोधौ न प्राप्नोति इत्यर्थः के
ते भोगभेदोपरक्ता जीवसृष्टा आकारभेदा इत्यत आह प्रिय इति प्रियत्वाप्रियत्वोपेक्ष्य-

हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः। पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यते २१
प्रियोऽप्रिय उपेक्ष्यश्चेत्याकारा मणिगास्त्रयः। सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु २२
भार्या स्नुषा ननान्दा च याता मातेत्यनेकधा। प्रतियोगिधिया योषिद्भिद्यते न स्वरूपतः २३

त्वलक्षणास्त्रय आकारभेदा जीवैः सृष्टास्त्रिष्वपि साधारणमनुस्यूतं यन्मणिरूपं तदीश्वर-
निर्मितमित्यर्थः। उक्तं जीवसृष्टाकारभेदमुदाहरणान्तरेण स्पष्टयति भार्येति
ननान्दा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृश्वशुरादिलक्षणप्रतियोगि-
गोचरया बुद्ध्या न तु स्वरूपतो भिद्यत इत्यर्थः २३ ॥

प॰ ट॰ च॰

प्रतिबिम्बार्थं व्यक्तं दृष्टान्तरमाह व्यञ्जक इति यथा वा व्यञ्जकः प्रकाशकः आलोक आत्मघटादि
व्यङ्ग्यस्य प्रकाशकत्वं घटादेरेकाकारतामाकारतामियात् शास्त्रयादेवं तथेश्वरोपि सर्वार्थस्य व्यञ्ज
कत्वात् सकलपदार्थप्रकाशत्वात् तदाकारतां यस्याकारस्तथाकारोयस्य सोनेनैव प्रदर्श्य
ते प्रकर्षेणोपलभ्यतेऽयमर्थः इदानीं वार्त्तिककारवचनमाह मात्विति मातुः सा ।

185

व्यञ्जको वा यथालोको व्यङ्ग्यस्याकारतामियात् सर्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्य
ते २९ मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्य
ते ३०

पिष्टानन्तु हि स्यच्चिदाभासनरूपात् प्रमातुर्मानाभिनिष्पत्तिर्मानस्य सत्ताभासमानः करणं
हतिरूपस्याभिनिष्पत्तिर्भवतीति शेषः निष्पन्नं तत्त्वं तत्मान्मेयपदादिरूपः मेति
३० ॥ ॥
॥

पं० ह०
चं०
८.

नन्वन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातामित्यत आह सत्यपीति नोऽननुभवः
एतदुपलक्षणमन्येषामपि स्वमात्रेव तत्रस्त्यादिकाले बाह्यार्थेऽनुकूले योषिदादौ प्रतिकूले
व्याघ्रादौ च पारमार्थिके विषये सत्यपि स्वविद्यमानेऽपि च ध्यानेन स्वावष्टम्भात्तद्वृत्तेर्नसमाध्या

अस्त्यपि च बाह्यार्थे स्वमात्रैव ध्यानेन तु । समाधिस्तु निमज्जनं सत्यस्मिन्न
स्मिन्न बाध्यते २२ हरादेशाल्लब्धे जीवन्मुक्तता २२ ॥

दिग्भ्रान्तस्मिन्बाह्यार्थे सत्यपि पिण्डध्यानेन स्वावष्टम्भाद्विभागमवगत्य तद्दिशा वन्वयव्यति
रेकोऽनुसृत्यर्थः मनोमयप्रपञ्चस्य वृत्तेनान्वयव्यतिरेकाभ्यां न स्पृशति हरादे
शामिति सार्वयादेशान्तः प्राप्तेनैव जीवन्मुक्तः सत्वत्र संदेहे स्थितः ॥ तस्य ।

८

186

प्राप्नोति किं च तस्मान्न मेयाभिसंगतं प्रमेयेन संबद्धं तन्मेयाभं तन्मेयस्य आभासाभावस्य तन्मे-
याभत्वस्य भावस्तत्त्वं मेयसमानाकारत्वाप्रणष्टत्वे प्राप्नोतीत्यर्थः भवत्त्वेवं प्रकृते किं स्यादित
मित्याशङ्क्याह सत्त्वेवमिति ननु स्वरूपमयं स्वं च मनोमयं च द्वयं स्वांतेनैव मनसा ग्राह्यमिति मनस्तः।
कार्यात् ग्राहकांतराभावाच्च सिद्धिरेवेत्याशंक्य ग्राहकांतराभावोऽसिद्ध इत्यत आह स्व-
रूपमय इति यथा स्वरूपमयो मानमेयतया धीमयः साक्षिभास्य इत्यर्थः भवत्त्वेवं द्विविधं द्वैतं क

सत्येवं विषयौ द्वौ तावद्द्वैतौ स्वरूपमयधीमयौ स्वरूपमयो मानमेयः स्यात्साक्षिभास्यस्तु धीम-
यः ॥ अन्वयव्यतिरेकाभ्यां धीमयो जीवबन्धकृत् सत्यस्मिन्स्ताद्बन्धस्त्वेतस्मिन्नसति नश्यति।
॥ ३२

सद्द्वैतं द्वैतकस्य बाध्यमिति न तावत्तस्यापि कालं जीवबन्धहेतुत्वमित्यभिप्रेत्य
तस्यैव बन्धहेतुत्वं दर्शयति अन्वयेति अन्वयव्यतिरेकावेव दर्शयति सत्यस्मिन्निति अस्मि-
न्जीवबन्धहेतुमानसप्रपञ्चे सति विद्यमाने स्यात् बन्धः संसारः भवति असति तस्मिन्नश्यं
ति बन्ध इति वचनात् इत्यर्थः ३२ ॥ ॥ ॥

पं. हृ.
च.
५

नन्वलङ्घ्याकारसमर्पणाय बाह्यार्थोपेक्षणीयः पूर्वपूर्वमानसमर्पितसंस्कारस्यैवोत्तर
मानस्य प्रपंचहेतुत्वोपपत्तेरित्याशंक्य प्रौढवादेनाङ्गीकरोति वैयर्थ्यमिति न हि विज्ञा
नस्वरूपात् कार्यभेदस्यानुपपत्तेः बाह्यमिति विज्ञानवादिना बाह्यार्थमेवापलापितं वर्ण
नतस्तेनान्यथमेव भेदस्यार्थः प्रयोजनस्त्वन्यात्स्वप्रपञ्चमोपपत्तेरुक्तपदेनाशंक्याह

वैयर्थ्यमस्तु वा बाह्यं न बाधयितुमीश्महे प्रयोजनमपेक्षन्ते न मानानीति हि स्थितिः ३६
वैयर्थ्येन मानसहेतुत्वं न हि तोषयति नश्यामिते स्वप्नसंयोगमेवातः ब्रह्मज्ञानेन किं वद ३७

187

प्रयोजनमिति मानाधीनत्वात्प्रतिपत्तिर्हि न प्रयोजनाधीना मानसिद्धस्य प्रयोजनस्त्वन्यत्र मा
त्रैगुण्यत्वस्य लौकिके वा दिविवा नस्वप्नप्रमादिति भावः ननु मानस्य हेतुत्वस्यैव वैयर्थ्यहेतु
तत्वेन स्वप्नमनोनिरोधात्मकयोगेनैव निवृत्तिसंभवात् ब्रह्मज्ञानस्य वैयर्थ्यमिति शंकता
स्वप्नमाविरुद्धत्वेनेति शंकते वैयर्थ्येति ३७ ॥

पिता विप्रलंभकस्य मिथ्यावचनैः प्रवंचकस्य तनयस्योम् इत्युक्त्यैवं रूपेण वाक्येन सत्पुत्रे मत्तेनैक
त्वत्ता पिता प्रकर्षेण रोदनं करोतीति तस्मिन्नेव पुत्रे तत्रैव मत्तेऽपि तन्मते बाह्यार्थाभ्यामस्तुत्वा यास
न्यान्न रोदनं करोति फलितमाह अत इति शीमयस्येव जगतो बौद्धैः तत्त्वाङ्गीकारे बाह्यार्थो

विप्रलंभकवाक्येन मत्तेन मत्वा प्ररोदिति मत्तेऽपि तस्मिन् तात्पर्यमसत्त्वात् नरोदिति अतः सर्व
स्य जीवस्य स्वप्नवत् स्वानुभवजगत् ३५ विज्ञानवादो बाह्यार्थवैयर्थ्यं स्यादिति चेत् नहि तत्का
रमायात् अबाह्यस्यात् प्रतीततत्वतः ३६

यस्माद्याद्दयत्विंहि जातावानुः स्यादिति शंकते विज्ञानेति परिहरति नहीति यद्यपि मायत्वं
वस्वैव स्वप्नदृष्टत्वं तथापि तत्र हेतुत्वेन बाह्यार्थस्यापेक्षा तत्र विज्ञानवादप्रसंग इति भावः
३६ ॥ ॥ ॥ ॥

पं॰ह॰
व॰
९

नद्वैतस्ययावज्ज्ञानमद्वैतज्ञानप्रयोजकमपिनतत्रिकारणमेवेत्यभिनिविश्यमानंप्रत्या
ह प्रलयइति प्रलयेप्रलयावस्थायांनत्रिद्वैतोनस्यद्वैतस्यानिद्वैतोतस्याद्विरोधिद्वैता।
भावेप्यद्वैतज्ञानविरोधित्वेनभवदभिमतस्यानिवारणेसत्यपिशुश्रूषाद्यवतः शुश्रू
षणाद्यद्वैतरूपस्यज्ञानसाधनस्याभावादद्वैतोरद्वयंवस्तुवोद्धुंशक्यंनभवति अनन्तत्रि

188

प्रलयेनत्रिद्वैतोतशुश्रूषाद्यभावतः विरोधिद्वैताभावेपिनशक्यंवोद्धुमद्वयम् ध॰
साधकसाधकंचद्वैतमीश्वरनिर्मितम् अपनेतुमशक्यत्वात्ततद्विधानेकृतः
ध॰।

कारणम्प्रयोजकमितिभावः तथापिस्वनिद्वैतेकथमद्वैतज्ञानमित्याशंक्याह अबा।
धकमिति ईश्वरनिर्मितद्वैतमबाधकंनस्यचावज्ज्ञानेनैवाद्वैतज्ञानोत्पत्तेरुक्त
त्वात् साधकंच ध॰९ ॥
॥

योयोनकिंहेतोपसमस्तात्कालिकद्वयानेनआत्यंतिकोवेतिविकल्प्यआद्यमंगीकृत्यद्विती
यंदूषयतितात्कालिकेतिज्ञानादेवंसच्चानेनबंधध्वंसः ज्ञात्वाशिवंशांतिमत्यंतमेति या
दाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदादेवमविज्ञायदुःखस्यांतोभविष्यतीत्या

तात्कालिकेहितथांतवध्यागामिजन्मनिवृत्थः ब्रह्मज्ञानंविनानस्यादितिवेदांतडिंडि
मः २९ अनिवृत्तेपीशास्त्रेहेतन्नमध्यमस्यात्मनो दुःखाद्ब्रह्माहमित्येवोहशंकांवल्लेकथा
दिना ३०

दिश्यतिषत्प्रयत्नतिरेकाभ्यांब्रह्मज्ञानादेवबंधनिवृत्तिमभिधायतद्वतिभावः नतना
हाहेतन्निवृत्तिमंतरेणाद्वितीयब्रह्मज्ञानमेवनोदेत्याशंकातन्निवारणाभावेवितस्य
मिथ्यात्वज्ञानादेववारमाकथिकमतेतन्नेबाहुशंकामित्याह अनिवृत्तेपीति ३१

पं ८
च
॥

तर्हि आत्मन्येति तिवाकास्यकामानिचेति दयात्रावसरं किंचित्कामादीनामनागमोतिष्ठुर्वा
ह्रंकामाद्यवसरप्रदानस्यानिषिद्धत्वात्तत्परतेवनिवद्धमवतोमकाप्यनुपपत्ति स्वत्तवो

शास्त्राण्यधीत्यमेधावी अभ्यस्य च पुनःपुनः परमंब्रह्मविज्ञाय उल्कावत्तान्यथोत्सृजेत् ५४
ग्रंथमभ्यस्यमेधावी ज्ञानविज्ञानतत्परः पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः ५५
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ५६
तमेवैकं विजानीथ आत्मानमन्या वाचो विमुञ्चथ यच्छेद्वाङ्मनसी प्राज्ञस्तद्याद्याः श्रुतयः स्मृतयः ५७

199

योऽनन्तकालं तत्र यत्नप्रतिपादनपराः श्रुतीः स्मृतीश्च इति शास्त्राणीति तमेवैकं विजानीथेत्यु ॥
नेन तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुरिति श्रुतिरर्थतः पठिता ५

गृहस्थत्वादिरूपस्य तस्य त्वात्मस्थापनत्वादाकाशादिरूपं द्वैतमुत्साभिप्रायिनेतन्मनसाकारोचेति
हेतोस्तत्र द्वैतमात्मा ज्ञातृत्वः कारणेन हि प्रतद्रूपत्यर्थः इदानीं जीवत्वस्य द्वैतं विभज्यते जीवे
ति किं हि विधिमपि सद्वाहे यमेव यं भेद्याह उपाददीतेति स्वानेतस्याववोधनात् तत्तस्या
ववोधनत्वं यतमित्यर्थः किं तच्छास्त्रीयं द्वैतमित्याकांक्षायामाह आत्मेति प्रत्ययाऽऽत्मब्रह्मणो

जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा उपाददीत शास्त्रीयमा तत्त्वस्यावबोधनात् ४२
आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् बुद्धे तत्त्वे तस्य हेयमिति श्रुत्यनुशासनम् ४३

विचाराख्यं यच्छ्रवणादि किं तच्छास्त्रीयं मानसं जगदित्यर्थः तत्त्वात्तत्त्वस्यावबोधनादित्युक्तं ।
क्रमं तत्त्वपदार्थस्य सम्यग्ज्ञानोत्तरं कालं तत्त्वेऽवबोधे सति चिंतयेत् कृत्वा हि त्याज्यं कथमाह बुद्धे इति
तत्त्वशास्त्रीयद्वैतं तत्त्ववेत्तृब्रह्मात्मैकत्वलक्षणे बुद्धे सति तत्त्वं हेयं त्यजेदित्यर्थः ४३ ॥
॥ ॥ ॥

पं॰ च॰
९

वेधत्वेन प्रक्रमस्य वहस्य मुक्तता जीवन्मुक्तत्वं न हि नास्त्येवेत्यर्थः ननु जन्मादिसंसाराउ
त्रिस्यात्त्यांतिकक पुरुषार्थरूपया विदेहमुक्तो बालकिमनया आग्राया निजीवन्मुक्त्येति
शंकते जीवन्मुक्तिरिति ऐहिकभोगनिहानिभयाज्जीवन्मुक्तित्यागे आमुष्मिकभोग

वोयाहूर्थ्यं च तद्धेयं जीवन्मुक्तिप्रतिहृये कामादिक्लेशबंधेन प्रक्रमस्य तद्धि मुक्तता प॰
जीवन्मुक्तिरियं मा भूज्जन्माभावे तु देहच्युती नहि जन्मापि तेस्त्येव स्वर्गमात्राच्छलीभवा
न ५१ तथातिशयदोषेण स्वर्गो हेयो मतो यतः तद्दोषसाम्यात्कामादिः किं न हीय
ते ५२

190

निहृतिभयाद्धि देहमुक्तिरपि त्याज्या स्यादिति वेद्यापविहरति तद्धीति प्रतिवंद्यामोचनं
शंकते तथेति दोषप्रक्रोन स्वर्गादेस्त्याज्यत्वे सकलपुरुषार्थविघातकत्वेनातीवदो
षरूपस्य कामादेः सुतरां त्याज्यत्वमित्याह तद्दोषेति ५२ ॥ ॥

९

पं. ह.
च.
९३

कामक्रोधादिचित्तदोषैस्तत्त्वज्ञोप्यभिदितानीत सर्वलोकनिंदापि स्यादिति क्लेशाद्गुणमि
तिभावनर्द्दिं किं कर्तव्य मित्यत आह विहायेति सर्वान्कथं हेतत्वज्ञानं वा ते कामादि।
त्यागाश्चाक्तेनैतत्सर्वाण्यपि विहायादिसाम्यमाकांक्षीः किं तु कामादित्वं त्यागस्य कल्पम।
नादोषद्दानेन सर्वं जनैदेववत्पूज्योभवेदित्यर्थः तत्त्यागोपायमाह काम्यादीति

191

वोयास्त्रामनोदोषमाशान्नु क्लिश्यपस्यायुना अशेषलोकनिंदा चेत्यहोनेवोयवैभवं
५५ विहायाहादित्वल्पत्वेकामादीनतत्वविद्वां सर्वधीदोषस्त्यागाज्जनैः पूज्यस्त्वेदेवत
त् ५६

काम्याकाममनाविषयाः स्त्र्यादयस्त्रादे योयेषांहेष्यादीनां ते काम्यादयः तेषा
ये दोषा अनिष्टसाति शयत्वादयः तेषां दृष्टिरवलोकनमाये येषां लोकामयस्वरूप
विचारादीनां तेनतथोक्तानेषां कामादित्यागहेतत्वप्रमाणमाह ५६ ॥ ॥ ॥

१३

ननु वैराग्यादिसंपादनेनान्यस्यानर्थहेतोः कामादेस्त्यक्तत्वादैहिकभोगमात्रोपयोगिकामा
भ्युपगमे को दोष इत्याशंक्य तत्त्वमिति तत्त्वविन्निमित्तानानन्तविधिनिषेधफलस्य अतिक
म्य कामाद्यधीनतयावर्तमानस्य तत्त्वविदो यथेष्टाचरणं स्यादित्यर्थः अत्र को दोष इत्याशंक्यान
दनिष्टत्वप्रतिपादनपरत्वेनेश्वराचार्यवचनं तदाहुरिति ग्रुहाद्वैतेति ग्रुह्यमद्वैतमतत्त्व

सर्वेष्वपि कामादीनि शेषं न जह्यामि चेत् यथेष्टाचरणं तेन स्यात् कं प्राप्तानि लिंचिनः
पत्र ग्रहाद्वैतमतत्त्वस्य यथेष्टाचरणं यदि श्रुतौ तत्त्वदर्शनं चैव को भेदे शुचिभ्रत्वं ५४

स्यत्तुं पश्यथेम समृद्धाद्वैतमतत्त्वः तत्त्ववित् तस्य यथेष्टाचरणं यदि स्यात्तर्हि अशुचिभ
क्षणादिकमपि स्यात् तथा सति श्रुतौ तत्त्वदर्शनं चैव न कोपि विशेषः स्यादित्यर्थः एता
वता किमनिष्टमायातमित्याशंक्य सोपहासमुत्तरमाह वेयादिति तत्त्वज्ञानोद
याश्रान्याक् ५४ ॥ ॥ ॥

पं·द·
वं·
४४

नह्यस्य मनोराज्यस्य कः परिहार इत्यत आह प्रांतेनेत्यमिति सा विकृतः सिध्यतीत्यत आह
समंपादइति ननु छायायोगप्रक्रमस्यत्यास्तु ननु द्विजस्य कागतिरित्यत आह ब्रह्मते।
नेति ब्रह्मवगतेनत्व ब्रह्मात्मैकाल्लत्वाणायेन कामक्रोधादिव्रहिदोषरहितेनेतय।

एकांतेन मनोराज्यनिर्विकल्पसमाधिनः स संपादः क्रमात्सोपि सविकल्पसमाधि
ना ६ ब्रह्मत्वेनधीदोषशून्यैनैकान्तवासिना दीर्घप्रणवसंधायेनोराज्यं विजीयते ६१

192

एकांतवासिना विजनदेशनिवासशीलेन तरुरुषेणादीर्घं षड्ढादशादिमात्रोपेतप्रण
वमोंकारसंधायमनोराज्यं विजीयते निवार्यत इत्यर्थः ६१ ॥ ॥
॥ ॥

प्रसिद्धेति भवतस्ततः किमायातमित्यत आह तानीति ननु कामादीनामनर्थहेतुत्वात्त्या
ज्यत्वमस्तु मनोनिग्रहस्य त्वत्र यत्नाधिक्यं न योगिनोपीति इति शंकते त्याज्यत्वमिति साधनं मन

काम्यादिदोषदृष्ट्याद्यः कामादित्यागहेतवः प्रसिद्धा मोक्षशास्त्रेषु तदा तानविधाय तद्भव
६७ तत्त्वतामेव कामादिर्मनोनिग्रहेतुकानीति: अशेषदोषबीजत्वात्तत्त्वानिर्भागवतोगता
६८ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजाय
ते ६२

र्थहेतुत्वाभावे विपरीतरणनहेतुत्वात्त्याज्यत्वमेवेत्यभिप्रेत्य परिहरति ध्यायत इति परंपर
यानर्थहेतुत्वप्रदर्शनपरं भगवद्वाक्यं तदाहरति ध्यायत इति ६२ ॥ ॥ ॥

पं. द.
च.
५

स्वदेहस्यागत्वमनर्थविचारितं तथापि यः पश्यन्ग्रन्थिभ्यादिसंवादरहितश्चिरकालश्रुत्वापि
तेनैवं कृत्वा किं निश्चितमित्यत आह संत्यक्तेति सत्यकुर्वीतं तत्कामादिवासनात्मनः।
सत्त्वसौभावादृते नाधिकः पुरुषार्थो नास्तीति निश्चितमित्यर्थः एवं निष्ठितिकस्यचित्तस्यध्या-
नस्यकर्मणाविक्षेपमाति तत्त्वतीकोराणायः कर्मत्वप्रेरायामाह विक्षेपमस्ति भोगम्

संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ६४ विक्षिप्तोऽकदाचिद्धीकर्मणाभो-
गरहितः पुनः समाहितो वास्त्यानदेवाभ्यासवान् ६५ विक्षेपोपशमनास्यस्य।
ब्रह्मवित्तेनमन्यते ब्रह्मत्वमितिप्राक्कर्मेनयःपारदर्शिनः ६६

193

देहस्य प्रारब्धकर्मणा बहिः कदाचिद्विहितो लक्ष्ये चेत्तर्हि सा बहिरभ्यासरहितौ बहिरभ्यासरहितौ
तत्समाधेरेव पुनर्यदिसमाहितास्यादित्यर्थः स्वदृष्टाचित्तविक्षेपरहितत्वस्य ब्रह्मब्रह्मस्थितोपपत्ता-
विकमित्याह विक्षेप इति पारदर्शिनो वेदान्तपारगतस्यार्थः स्वत्राविवाशिष्टवाक्यमुदाहर

५
ति ६६

मनोराज्यविजये किं भवतीत्यत आह जिते त्विति यथा मूकः सकलवाग्व्यापाररहितो
तिष्ठति एवं मनोपि सर्वव्यापाररहितं भवति तिष्ठतीत्यर्थः अत्र ऐहिकमनोऽवस्थानस्य फल
प्राप्यं प्रमाणमाह एतत्पदमिति एतत्पदमियं दशेत्यर्थः वासिष्ठवाक्यश्लोकद्वयमत्र

जितेऽस्मिन्वृत्तिरूपं तं मनस्तिष्ठति मूकवत् । एतत्पदं वशिष्ठेन रामाय बहुधेरितम् ९२
दृष्टं नास्तीति बोधेन मनसो दृश्यमार्जनम् । सम्पन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ९३
विचारितं तु शास्त्रेण तत्त्वनिर्वाणदिङ्मिषः ९३

दृष्टं नास्तीति दृश्यमिति नेह नानास्ति किंचनेत्यादिश्रुत्या हि निखिलमायिकजगदस्था
वत्त्वानेन मनसः सकाशात् दृश्यनिवारणं संपन्नं यदि तर्हि निर्वृति प्राप्य मोहस्तत्वेन
उत्पन्नमिति जानीयादित्यर्थः ९३ ॥ ॥

श्री·
पं·द·
चं·
६९

दर्शनादर्शनेति यो ब्रह्म जानामि न जानामीति व्यवहारद्वयं परित्यज्य स्वस्वमहिम्नि चैतन्य
मात्ररूपेणावतिष्ठते स स्वयं ब्रह्मैव न ब्रह्मविदित्यर्थः सकलद्वैतविवेचनमुपसंहरति
जीवन्मुक्तिरिति अस्मात्क्रमप्रकाराज्जीवन्मुक्तेः परा काष्ठा निरतिशयपर्यवसानभूमिः।
जीवद्वैतस्य मनोमयप्रपंचस्य विवर्जनात्परित्यागाल्लभ्यते यस्मात्ततः कारणादिदं।

दर्शनादर्शने हित्वा स्वयं केवलरूपतः यस्तिष्ठति स तु ब्रह्मन् ब्रह्मैव ब्रह्मवित्स्वयं
६७ जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् लभ्यतेऽसावतोऽत्रेदमीशद्वैताद्वि
वेचितम् ६८ इति श्रीद्वैतविवेकप्रकरणं समाप्तम् ४ ॥

194

जीवद्वैतमीशद्वैतादीश्वरसृष्टद्वैताद्विवेचितं विविच्य प्रदर्शितमित्यर्थः ६८ इति शिव
श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृ ६९
ष्णाख्यविदुषा विसाद्वैतविवेकसमाप्तम् ॥ ४ ॥ ॥ ॥

पं. द.
टि.
१

ॐ श्रीगणेशायनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ भूतपंचविवेकस्यव्याख्यानंक्रियते
मया १ सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिश्रुत्यानिगद्यमानेःप्रत्यगात्मकारणस्वरूप
महिंयच्छ्रुतंतत्स्वावाङ्मनसगोचरत्वेनसुतोऽवगंतुमशक्यत्वात् तत्कार्यत्वेनतदुपा
धिभूतपंचकस्यविवेकद्वारातद्बोधनायपीठिकात्वेनभूतपंचकविवेकंप्रतिजानीते
१ सदद्वैतमिति तत्रतावदाकाशादीनांपंचानांभूतानांगुणानोभेदज्ञानायतद्गुणानाह श

सदद्वैतंश्रुतंयत्तत्पंचभूतविवेकतः बोद्धुंशक्यंततोभूतपंचकंप्रविविच्यते १ शब्दस्पर्शौ
रूपरसौगंधोभूतगुणाइमे एकद्वित्रिचतुःपंचगुणाव्योमादिषुक्रमात् २ प्रतिध्वनिर्वि
यच्छब्दोवायौवीसीतिशब्दनम् अनुष्णाशीतसंस्पर्शोवह्नौभुगुभुगुध्वनिः ३ ॥

सर्वे५ शेति तत्रतेषुगुणाःकिंसर्वेषामुतैकैकस्यैकगुणाइतिविमर्शायव्योमप्रभृतिषुकियत्प्रकारांतः
रमेलीत्यभिप्रायेणाह एकेति तदेवप्रकारांतरंविशदयति प्रतिध्वनिरिति आकाशेताव
तच्छब्दगुणःसचप्रतिध्वनिरूपःवायौशब्दस्पर्शौतत्रवायोःशब्दमनुकारेणदर्शयति बीसी
तिशब्दनमिति एवमन्यत्राप्यनुकरणशब्दान्द्रष्टव्यंतत्रस्पर्शमाह अनुष्णाशीतसंस्पर्श
इतिवह्नौशब्दस्पर्शरूपाणीतित्रयोगुणाःतेषुक्रमेणाभिधीयते वह्नौभुगुभुगुध्वनिः ३

एकएवऽ

विति१

श्रीभिर्वाज्यंते ३

पं० द०
हि०
२

कचित्करणानामंतरविषयग्राहकत्वं दर्शयति कदाचिदिति द्वाभ्यां कदाचित्करणस्यापिधाने
कृतिसति घ्राणादावा योजाठराग्नेर्वा विद्यमानत्वान्तरः श्राद्धः श्रूयते जलपाने ऽनुभवतश्चांतरस्य
घ्राणस्याभिव्यक्ता भवंति नेत्रनिमीलने कृते नेत्रांतरत्वमउपलभ्यते उद्गारे जाठररसगंधो हीन्द
द्रियेत इत्यनेन प्रकारेण त्वगादीनामंतरग्रहणमुक्तानामिति कर्णेऽरिष्टो श्रांतरस्य विषयस्य ग्रह
ग्रहणं इंद्रियकर्तृकमांतरविषयग्रहणं भवतीत्यर्थः एवं ज्ञानेंद्रियव्यापारानभिधाय । ९

कदाचिन्निहिते कर्णे श्रूयते श्राद्धश्चांतरः घ्राणाव योजाठराग्ने जलपाने ऽनुभवतो ८
व्यज्यतेस्यांतरः स्पर्शनमीलने चांतरतमः उद्गारे रसगंधौ चेत्यक्षाणामांतरग्रहः ९ एवं वचो
दानगमनविसर्गानंदकाः क्रियाः कृषिवाणिज्यसेवाद्याः पंचस्वंतर्भवंति हि १० नं

196

कर्मेंद्रियाणां स्वस्ववादिनं प्रतिनियतं सद्भावसमर्थनाय तल्लिंगभूतं व्यापारानाह एवे
श्व३ ति वचोदानगमनविसर्गानंदकाः इति द्वंद्वसमासः वचोदानगमनविसर्गा
नंदाख्याः पंचक्रियाः प्रसिद्धा इति शेषः ननु कृष्यादीनां क्रियांतराणामपि सत्वात्क २
थं पंचेत्युक्तमित्याशंक्याह कृषीति ॥ १० ॥ ॥ ॥

हृयन्तः तैस्तैर्गुणैर्विक्रियन्ते विकारं प्राप्नोतीत्यर्थः गुणोक्तस्य विक्रियमाणत्वमेव प्रपंचयति वैराग्येति
१४ ति वैराग्यादीनि कार्याणि विभज्य दर्शयति सात्विकैरिति एतान्यहि स्थूलादन्तःकरणादीनां सर्वेषां
स्वामित्वमाह अत्रेति अहमिति प्रत्ययवान् कर्ता भोक्ता प्रभृतिरित्यर्थः लोकस्य विकारप्रकारोपप्रभृतिरित्येवमुपदि
ष्टं ते १६ एवं जगतः स्थितिमभिधायेदानीं तस्य भौतिकत्वं तत्रोपायमाह स्पष्टेति स्पष्टशब्दादि
युक्तेषु स्पष्टैः शब्दस्पर्शादिगुणैः सहितेषु पृथिव्यादिषु भूतकार्यत्वं स्पष्टमेवावगम्यते नन्व

वैराग्यं क्षांतिरौदार्यमित्याद्याः सत्वसंभवाः कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः १४ आ
लस्यभ्रान्तितन्द्राद्या विकारास्तमसोत्थिताः सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः १५ ताम
सैर्नोभयं किंतु वृथायुःक्षपणं भवेत् अत्राहंप्रत्ययीकर्तेत्येवं लोकव्यवस्थितिः १६ स्पष्टशब्दादि
युक्तेषु भौतिकत्वमतिस्फुटम् अक्षादावपि तच्छास्त्रयुक्तिभ्यामवधार्यताम् १७ ॥ ॥ ॥

इंद्रियादिषु कथं भूतकार्यत्वं निश्चय इत्याशंक्य आगमानुमानाभ्यामित्याह अक्षादावपीति अन्न
मयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागित्यादिशास्त्रमनुमानं च विमतानि श्रोत्रा
दीनि भूतकार्याणि भवितुमर्हन्ति भूतान्वयव्यतिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुवि
धायि तत्तत्कार्यं दृष्टं यथा मृदन्वयव्यतिरेकानुविधायी घटो मृत्कार्यो दृष्टस्तथा चेमानि त

कानि तानि क्रियाजनकानीन्द्रियाणीत्यत आह वाक्पाणीति वागादिभिस्तैस्तत्क्रियाजनित्वात्सं
क्रियाणामित्यन्ति भवन्तीन्द्रियाणि अत्राप्युक्तिः करणपूर्विका [illegible] क्रियत्वादित्याह्रिका
र्थलिङ्गकमनुमानं द्रष्टव्यं तस्य कर्मेन्द्रियपञ्चकस्य स्थानान्याह गुदादीति आदिशब्देन
॥ करचरणौ गुदशिश्न [illegible] जिह्वे चाद्यस्थाने इन्द्रियाणीमनुक्त्वा दशेन्द्रियप्रेरकत्वेन प्रस्तुतस्य मन
सः कल्पस्थानं च दर्शयति मनश्चेति तस्यान्तरिन्द्रियत्वं सनिमित्तकमाह तच्चेति दशेन्द्रियाः
प्रवर्तनमेव विशदयति श्रोत्रेति श्रोत्रादीन्द्रियपञ्चस्य पुत्रैरुपतन्ममनो गुणदोषविचार

वाक्पाणिपादपायूपस्थैस्तैस्तत्क्रियाजननैः मूलाद्गोलके [illegible] तत्कर्मेन्द्रियपञ्चकम् ॥ ११ ॥
मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् अन्तःकरणं बाह्येषु सर्वेष्वाहुरिन्द्रियैः ॥ १२ ॥
श्रोत्रेष्वर्थानिवेशेन गुणदोषविचारके मनो [illegible] विक्रियन्ते हि तैः ॥ १३ ॥

कथमिदं समीचीनमिदमसमीचीनमित्यादिविचारकारीत्यर्थः स्वभावः आत्मनः प्रमातृत्वे
न सर्वज्ञानसाधारणत्वाच्चक्षुरादीनां च रूपादिज्ञानजननमात्रेण चरितार्थत्वाद्गुणदोषवि
चारस्यासम्भवमानस्यान्यथानुपपत्त्या तत्कारणत्वेन मनोऽभ्युपगन्तव्यमिति मननमात्रेण
कामाद्यनेकवृत्तिमत्त्वप्रदर्शनाय तस्य तत्तद्धिकारणत्वं दर्शयति सर्वमिति तेषां तद्गुणत्वेका रण

का१

अस्यानिरवयवत्वादित्याह सत इति नामरूपयोः सदवयवत्वं किं न स्यादित्याशंकायां दृष्टेः प्रागन्
योरभावात्सद्रूपत्वमित्याह नानेति उक्तौ नामरूपयोरभावस्यापेक्षायामाह नामरूपेति फलि
तमाह तस्मादिति अत्रायं प्रयोगः सद्वस्तु स्वगतभेदशून्यं भवितुमर्हति निरवयवत्वाद्गगन
वदिति २२ सास्वगतभेदः सजातीयभेदः किं न स्यादित्याशंकायां तत्सजातीयसदन्तरस्य

सतो नावयवाः शंकास्तदंशस्यानिरूपणात् नामरूपे न तस्यांशौ तयोरद्याप्यनुद्भवात् २२
नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा न तयोरुद्भवस्तस्मान्निरंशं सद्यथा वियत् २३ सदं
तरं सजातीयं न वैलक्षण्यवर्जनात् नामरूपोपाधिभेदं विना नैव सतो भिदा २४ ॥

निवक्तव्यत्वात्त्रिरूपत्वं न शंकाते सतो वैलक्षण्याभावादित्याह सदन्तरमिति ननु घटस्या
पटस्येति सताभेदः प्रतिभासत इत्याशंकायां घटाकाशमठाकाशवदौपाधिको भेदो न सतो
भातीत्याह नामरूपोपाधिभेदमिति अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितु
मर्हति उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वाद्गगनव
दिति २४

एवं भूतानि भौतिकानि च विविच्य दर्शयितुं प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयश्रु
त्यप्रतिपादिकां श्रुतिं व्याचष्टाणस्तस्या वाक्यस्थितेदंपदस्यार्थमाह एकादशेति प्रत्यक्षादि
भिः सर्वैः प्रमाणैः श्रुतिशब्दाद्यर्थापत्त्यादिप्रमाणान्तरैश्च यावत्किंचिज्जगदवगम्यते तत्स
र्वं सदेवेत्यादिवाक्यस्थेनेदंपदेनाभिहितमित्यर्थः एवमिदंशब्दार्थमभिधायेदानीं श्रु
तिस्थमेवार्थं तत्पठति इदं सर्वमिति अरुणस्यापत्यमारुणिरुद्दालकस्तस्य वचनमित्य १८

एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते यावत्किंचिद्भवेदेतदिदंशब्दोदितं जगत् १८ इदं
सर्वं पुरा सृष्टेरेकमेवाद्वितीयकम् सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः १९ वृक्षस्य स्व
गतो भेदः पत्रपुष्पफलादिभिः वृक्षान्तरात्सजातीयो विजातीयः शिलादितः २० तथा सद्व
स्तुनो भेदत्रयं प्राप्तं निवार्यते ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् २१ ॥

१९ थः एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगतादिभेदत्रयप्रसक्तं निवारयितुं लोके स्वग
तादिभेदत्रयं दर्शयति वृक्षस्येति स्वगमेव मात्मनि भेदत्रयं प्रदर्श्य सद्वस्तुन्यपि प्रसक्तं तद्भे
दत्रयं श्रुतिः पदत्रयेण निवारयतीत्याह तथेति वस्तुसामान्यात्तस्यात्मनो वस्तुरूपात्मनः ऽपि
प्रसक्तं स्वगतादिभेदत्रयं एकावधारणद्वैतप्रतिषेधाभिधायकैरेकमेवाद्वितीयमिति त्रिभिः
२१ पदैः क्रमेण निवार्यत इत्यर्थः सद्वस्तुनस्तावत्स्वगतभेदः प्रांकितु [illegible] ते ॥ ॥

पं॰ ह॰
हि॰
प

उक्तार्थस्याचार्यस्तुमिति निदर्शयति गीताचार्यइति केनवा केनोक्तं यत्तदप्याकांक्षायां तदीयं।
वाक्तिकमेवपठति अस्पर्शेति योगमस्पर्शयोगाख्यो निर्विकल्पकः समाधिः प्रसन्नयोगि
भिः साकारध्याननिष्ठैर्दुर्दर्शनं दुःखेन द्रष्टुं योग्यः दुष्प्राप्य इत्यर्थः तत्रोपपत्तिमाह योगिन

199

गीताचार्यो निर्विकल्पसमाधावल्पयोगिनाम् साकारब्रह्मनिष्ठानामत्यन्तं भयमूचिवे २८
अस्पर्शयोगनामैष दुर्दर्शः सर्वयोगिभिः योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः २९
भगवत्पूज्यपादाश्च शुकनकपद्मनमस्कृत् अक्रमात्प्रमितानन्दाज्ञानाच्चिन्तेऽस्मिन्दशमानि
३०

इति द्वियस्साकारणायोगिनः पूर्वोक्तद्वैतदर्शिनः अभयेभयस्थानेऽस्मिन्समाधौ निर्विकल्पे दृष्टे बाला
इव भयदर्शिनो भयहेतुत्वं कल्पयन्तोऽस्माद्योगाद्भीतिं प्राप्नुवन्ति श्रीमदाचार्यैरप्येतदभिहि
तमित्याह भगवत्पूज्यपादश्चेति ३० ॥ ॥ ॥

भवतु नहि विजातीयभेदः अस्यांशकस्य सतो विजातीयमसत्तस्यानैव प्रतियोगित्वासंभवेन तस्य
नियोगिकोऽपि भेदो नास्तीत्याह विजातीयमिति २५ फलितमाह एकमेवेति इदानीमसद्वादाभिम
तं न्यायेन श्रुतेरसमेवदन्त्विति पूर्वपक्षमाह अत्रेति विह्वलत्वे दृष्टान्तमाह मग्नस्येति द्वा २६

विजातीयमसत्तत्त्वं नन्वल्पक्षीति गम्यते नास्यातः प्रतियोगित्वं विजातीयात्भिदा कुतः २५
एकमेवाद्वितीयं सत्सिद्धमत्र तु केचन विह्वला असदेवेदं पुरासीदित्यवर्णयन् ॥ २६
मग्नस्याब्धौ यथाक्षाणि विह्वलानि तथास्य धीः अखण्डैकरसं श्रुत्वा निःप्रचारा बिभेत्यतः २७

ष्टांतकेषां जयति मग्नेति अस्या सद्वादिनः ज्ञानावेकवचनं धीरितः कारणमखंडैकरसं च ।
श्रुत्वा निःप्रचारा माकारस्य सतो वाखंडैकरसैव वस्तु निष्प्रचाररहिता सतो अतोऽस्माद्वस्तु
नो बिभेति २७ ॥ ॥ ॥

ननु न हि शून्यस्य वा सद्रूपस्य वा नोपि नामरूपे हि कल्पितत्वं वाणीकर्णयोभवन्नेवालवयोर्नामरूपयोरभा
वादिति शंकते सतोपीति विकल्पासहत्वादयं पक्षः पूर्वमनुपपन्न इत्यभिप्रायेण परिहरति नेदमिति अ
यमभिप्रायः सतो नामरूपे किं सति कल्पिते उतासति कल्पिते अग्न्याद्यनागतेनाद्यः शून्यस्यापि तन्ना
दैर्नामरूपयोरत्र शुक्तिकादावारोपदर्शनात् सतो नामरूपयोः सत्येव कल्पनायोगान्न द्वितीयः
असतो निरात्मकस्य चाधिष्ठानत्वायोगान्न तृतीयः सततदुभयत्वस्य जगतः सन्नामरूपकल्पनाधि

सतोपि नामरूपे द्वे कल्पिते चेत्तदा वद कुत्रेति निरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ३५ सदासीदि
ति शब्दार्थभेदे वैगुण्यमापतेत् अभेदे पुनरुक्तिः स्यान्मैवं लोके तथेक्षणात् ३६ ॥ ॥

ष्ठानत्वानुपपत्तेरिति भावः द्वैतेऽधिष्ठानमनयोः कल्पना किं न स्यादित्याशंक्याह निरधिष्ठान इति ३५
ननु सदेवेदमग्र आसीदित्यत्र यथाश्रुतग्रहणे अस्तु यावत्सदेव मनन आसीदित्यत्रापि दोषोस्तीति शंकते
सदासदासीदिति तथाहि सदासीदिति शब्दभेदयोरर्थभेदोऽभिधानवाचित्वं च दृष्टे तद्धानिर्नास्ति चेत्
पुनरुक्तिः स्यादितः सदासीदित्यनुपपन्नमिति द्वितीयपक्षमादाय परिहरति मैवमिति उक्तमेतत्कि
दोषस्य कथं परिहार इत्याशंक्याह लोक इति लोकप्रयोगे विधिरप्रयोगे तु पुनरुक्त्याभावः ३६ ॥ ॥

तदा तिष्ठति अनाहतेति इदानीमसहायं विकल्पहीनं तदुपपत्ति शून्यमिति शून्यमासीदित्यनेन वाक्येन शून्यस्य समाधौ सिद्धमाम्नायतो वा तद्रूपं निर्विकल्पाश्रितं भयं सत्तासम्बन्धस्य शून्यत्वलक्षणास्त्र शून्यस्याहृतत्वान्नत्ययस्य तद्व्यर्थः व्याहृतत्वमेवं सर्वान्न प्रवर्तकं तत्समर्थयति नयुक्तमिति ननु भवन्नेत

अनन्तस्य श्रुतिमौर्ध्न्योदितैर्वा ह्यज्ञमसितः आपेदिरे निराकृतमनुमानैकधर्मतः ३१
शून्यमासीदिति श्रुत्येकदेशं वा सन्नाम्नाम शून्यस्यानन्तत्वयुक्तमभयं व्याहृतं ततः ३२
नयुक्तमसमाहृतेनापि वासोऽन्तमोमयः सुखशून्यार्थविरोधि नाशून्यमासीत्कथं वद ३३
विषयादेर्नामरूपमाययासविकल्पतः शून्यस्यैव नामरूपे च नयोग्ये न सविकल्पं विरम् ३४

विषयादीनां निर्विकल्पब्रह्मणि संसर्गव्याहृतमित्याशंक्याह विषयादेरिति नहि शून्यस्य अपि नामरूपे सहमानविकल्पेन तदिति वदतो वा तस्यापि सिद्धान्त इत्यभिप्रायेणाह शून्यस्येति ३४

पं० टू०
टिं०
२

यस्मादर्थो नो हेतुनाभावेऽस्ति प्रमाणमिति नहेति स्थितिभिन्नेति सूत्रं गंभीरं दुरवगाहं मनसा विपरीक
तेमप्यशंकनतेनतस्तेजस्तत्वनाधिकरणं ननमन्त्रमोविलक्षणं अनावरणस्वभावं ततेनत्वात् अनाव
भासमानमप्यशंक्य अनभिव्यक्तं वक्तारादिभिः प्रविपरीकृतं सद्रूपत्वविलक्षणं अतएव किंचिदिति।
इत्यनानिर्दिष्टमप्यशंकामप्यवशिष्यते हेतुनिषेधावधित्वेनावतिष्ठत इत्यर्थः ४० ननु जनिमत्त्वेन

जन्मस्थितिभिन्नं गंभीरं तत्तेजो ननमन्त्रं तम् अनाश्रयमनभिव्यक्तं सत्किंचिदवशिष्यते ४० ननु भव
स्याद्धि कं मा भूत्तस्मात्वनुनाशना कथं न विपतनोऽसत्वं बुद्धिमारोहतीति चेत् ४१ अत्यन्तनि
रोगशून्यमपयात बुद्धिमाश्रितम् न तथैव सर्वत्रकाशं तत्तोनाभ्युपगमतम् ४२ निरोगहीनमद।
ष्टे चेत्प्रकाशनसौसौ विना कदृष्टं किंचित्तपदं तेन प्रत्ययविपतचल ४३ ॥

नित्यत्वस्मादेवस्तवमल्लनित्याऽऽकाशस्याप्यसत्वं कथमंगीक्रियत इत्याशंक्यते ननु इति दृष्टान्त
दृष्टेन परिहरति अत्यन्तमिति अत्यन्तनिरोगजन्यात्परं हितमित्यत्र नहि दृष्टेऽनुपपन्नं नामेति
न्यायमाश्रित्य सतोऽदयति अजगदादि दिति दर्शनमेवासिद्धमिति परिहरति प्रकाशेति अप।
सिद्धान्तोपीत्याह किंचिति ॥ ॥ ॥ ॥ ॥

201

कदाचिदिष्टत्वाभावात् कर्तव्यमिति भवनेऽवलोकेऽस्तु तौ किमाधानमित्यत आह इत्यादिति न
त्वद्वितीयेवत्वानिभ्रजकालाऽभावाद्ग्रस्तासीदित्युक्ते स्वपक्षेऽन्याशंकामाह कालकेति ननु
जगदुत्पत्तेः पुरा जगदभावेन सद्वितीयत्वं ब्रह्मणः इत्याशंकामुत्तिष्ठन्तेऽहं नवाह्मनाविशिष्ट

कर्तव्यं कृत्स्नेनावाक्यं ब्रूतेयाऽर्थस्य धारणं इत्यादिवासनाधिष्ठं प्रत्यासीत्सदितीरणम् ३७
कालाभावेऽपुरेत्युक्तिः कालवासनयाऽऽगतम् शिष्यप्रतिवचे तेन त्वाद्वितीयेन द्विकालके ३८
चोद्यं वा परिहारो वा किं यत्ताद्वैतभाषया सद्वैतभाषया चाद्यं नास्ति नापि तदुत्तरम् ३९

ज्ञानप्रतिबोधनार्थं तत्राज्ञातिशंकनीयमित्याह तेनेति इदानीं सिद्धांतरहस्यमाह चोद्य
मिति व्यवहारदशायां चोद्यादिकर्तव्यं परमार्थे तत्त्वाद्वैतमेव तत्त्वमिति तात्पर्यः ३९
शिव ॥ शिव

पं. द.
द्वि.
८

मायायाः किं लक्षणमित्यत आह निस्तत्त्वेति निस्तत्त्वा जगत्कारणस्य ब्रह्मणो वस्तुनः पृथक्सत्त्वर-
हिता कार्यगम्या अस्या वियदादिकार्यलिंगगम्या अस्य ब्रह्मणः शक्तिर्वियदादिकार्यजननसा-
मर्थ्यं मायेत्युच्यते वह्न्यादिस्वरूपातिरिक्तशक्तिसद्भावे दृष्टान्तमाह अग्नीति यथा वह्न्यादिरूपाति-
रिक्ता स्फोटादिकार्यलिंगगम्या वह्न्यादिकार्यनिष्ठसामर्थ्यरूपा शक्तिरस्ति तद्वदित्यर्थः शक्तेः कार्यलि-
गगम्यत्वे व्यतिरेकमुखेन दृष्टान्तयति नहीति एवं शक्तेः कार्यलिंगगम्यत्वमुपपाद्य निस्तत्त्वमु-

निस्तत्त्वा कार्यगम्याऽस्य शक्तिर्मायाऽग्निशक्तिवत् नहि शक्तिं क्वचित्कश्चिद्बुध्यते कार्यतः पुरा ॥४७
न सद्वस्तु सतः शक्तिर्नहि वह्नेः स्वशक्तिता सद्विलक्षणतायां तु शक्तेः किं तत्त्वमुच्यताम् ४८

पपादयति न सद्वस्त्विति अयमभिप्रायः सद्वस्तुनः शक्तिः किं सती उतासती न तावत्स-
ती तथात्वे सतोऽभिन्नत्वेन तच्छक्तितायोगात् उक्तार्थे दृष्टान्तमाह नहीति द्वितीयेऽपि किं न-
रविषाणतुल्याऽन्या सद्विलक्षणेति विकल्पाभिप्रायेणाह सद्विलक्षणतायां त्विति
४८ ॥ ॥ ४८ ॥

८

पं॰ द॰
टि॰
९

ननु शक्त्याधिक्ये जीविताधिक्यं दृष्टमेतेन शक्तेरधिष्ठयकं जीवितत्वमस्तीति शंकते शक्ती
ति न शक्तेर्जीवितवृद्धेः कारणमपि तु तत्कार्ययुद्धकर्मादीति परिहरति नेत्येति ५२ दार्ष्टान्तिके
योजयति तथेति सर्वथेति मायाशक्तिमात्रस्य द्वितीयत्वसत्वेऽपि तत्कार्येणाद्वन्द्वस्यैव साक्षात्
स्वतदानीं सत्वाभावेनापि न सद्वितीयत्वमित्याह शक्तीति स ननु सा शक्तिः सति सर्वत्र वर्त

203

शक्त्याधिके जीवितं चेद्वर्धतां तेन वर्धताम् न शक्तेः किन्तु तत्कार्ययुद्धकर्मादिकं तथा ५२
सर्वथा शक्तिमात्रस्य न दृष्टं वर्धनं क्वचित् शक्तिकार्यं तु नैवास्ति द्वितीयं शक्तितः कथम् ५३
न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्त्वेकदेशभाक् घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्तते ५४

ते उक्तैकदेशेनायं मन्त्रैः शक्त्या ब्रह्माभावप्रसंगः द्वितीयः निरंशत्वेन विरोधित्वादित्याशंक्या
धानेंगीकारत्वाद्द्वितीयपरिहारो वक्तव्य इत्यभिप्रायेणाह न कृत्स्नेति एकदेशे दृष्टान्तमा
ह घटेति ५४ ॥ ॥ ॥

९

तत्राग्रेपूर्वतमन्यदृष्यति शून्येति शून्यमनामरूपे च तथा चेद्यस्मिन्नाचिरमस्ति चेन्नार्थः न
स्माद्वितीयः पक्षपरिशिष्यत इत्याह नशून्यमिति मायालक्षणसत्त्वासत्त्वाभ्यां निर्वचनान
द्गमितिभावः अस्मिन्नर्थे श्रुतिं प्रमाणयति नासेति नासदासीन्नसदासीत्तदानीमित्यादि
श्रुतिः प्रमाणमित्यर्थः नहि तमआसीदिति कथं तमस्त्वमुच्यते इत्यत आह सर्वेति अ

शून्यत्वमिति चेत् शून्यं मायाकार्यमितीरितम् नशून्यं नापि सद्यादृक् तादृक् तत्त्वमिहेष्य
ते ॥ ४९ ॥ नासदासीन्नोसदासीत्तदानीं किं त्वभूत्तमः सद्योगात्तमसः सत्त्वं नसत्तः सत्त्वनिषेध
नात् ॥ ५० ॥ अतएव द्वितीयत्वं शून्यवन्न हि गण्यते न लोके चैत्रतत्कुड्यं जो वित्तं लिख्यतेऽन्य
क ॥ ५१ ॥

त्यत आह नद्वितीति कल्पितमाह अत इति यतस्तस्मात् सत्त्वं मायाया नास्ति अत एव शू
न्यस्येव मायाया अपि द्वितीयत्वं न गण्यते हि नैवाद्रियत इत्यर्थः अन्यत्र स्याद्वितीयत्वा
नगीकारे दृष्टान्तमाह नलोकेति ॥ ५१ ॥ ॥ ॥

यदर्थं ब्रह्मणि मायायाः समर्थितं तदिदानीमाह सत्तत्त्वमिति विक्रिया विविधत्वेन क्रियन्त इति विक्रियाः
कार्याणि विशेषा इत्यर्थः तत्र दृष्टान्तमाह वर्णा इति वर्णा रूपाणि नानादृश्यानि विशेषाः ५९ तत्र प्रथ
मं कार्यं विशेषयन्नुद्दिशति आद्य इति तत्स्वरूपमाह स इति आकाशस्य ब्रह्मकार्यत्वेऽनुमानमाह आ
काश इति ६० ततः किमित्यत आह एकेति उक्तमर्थं विशदयति नावकाश इति सद्वस्त्वनवकाशो।

सत्तत्त्वमाश्रिता शक्तिः कल्पयेत्सति विक्रियाः । वर्णा भित्तिगतास्तत्र भित्तौ चित्रं नानाविधं यथा ५९
आद्यो विकार आकाशः सोऽवकाशस्वरूपवान् । आकाशोऽस्तीति सत्तत्त्वमाकाशेऽप्यनुगच्छति ६०
एकस्वभावं सत्तत्त्वमाकाशो द्विस्वभावकः । नावकाशः सति व्योम्नि स चैषोऽपि द्वयं स्थितं ६१
यद्वा प्रतिध्वनिर्व्योम्नो गुणो नासौ सतीक्ष्यते । व्योम्नि द्वौ सध्वनी तेन सदेकं द्विगुणं वियत् ६२

नास्ति किंतु सत्स्वभावमेकमाकाशे तत्सच्च सत्स्वभावमयं चाप्यवकाशस्वभावोऽपीति द्वयं स्थितं वि
यत इत्यर्थः ६१ सदाकाशयोरेकद्विस्वभावत्वं प्रकारान्तरेणोपपादयति यद्वेति प्रतिध्वनिर्व्योम्नो
गुणः शब्दस्तद्यथादितमयत्वात् असौ प्रतिध्वनिः सद्वस्तुनि नेक्ष्यते नोपलभ्यते व्योम्नि तु ध्वनी सच्छ
ब्दश्च भाव उपलभ्येते तेन कारणेन सदेकस्वभावं वियद्द्विगुणं द्विस्वभावमित्यर्थः ६२ ॥ ॥

१०

प्राक्केवैकदेशाहृतिर्नेष्यमाणमाह पादोस्येति ५४ नकेवलं श्रुतिरेव स्मृतिरप्यस्तीत्याह विष्
टभ्येति ५५ इदानीं निर्मायस्वरूपसद्भावे प्रमाणमाह सभूमिमिति विकारावर्तिवचनयाह स्थि

पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि इत्येकदेशाहृतिं मायाया वदति श्रुतिः ५४ वि
ष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति कृष्णोऽर्जुनं प्रत्याह जगतश्चैकदेशतां ५६
सभूमिं विश्वतो वृत्वा ह्यत्यतिष्ठद्दशाङ्गुलं विकारावर्तिचाप्यत्तिश्रुतिरस्त्वकृतो वचः ५७
निरंशोऽप्यंशमारोप्य कृत्स्नेंशेवेति शङ्कतः नज्ञायथान्तरं ह्येतत् श्रुतिःश्रोत्रदिनेपिणो ५८

तमाहेति स्वत्रकारवचनमित्यर्थः ५७ नहि निरंशो विरोध इत्यस्य कस्यचिदाशङ्क्याशंकाबाल
वनिरंशतान्भ्युपगमात्र विरोध इत्यभिप्रायेणोदाहृतन्यस्याभिप्रायमाह निरंशोति ५८ ॥ ॥

मायाया विपरीतप्रतीतिहेतुत्वं लोके कल्याणप्रदर्शनेन स्पष्टीकरोति यथेति यद्वत्का
दिग्भ्रमेण शुक्तिकादिरूपेणावर्तमानेन स्वरूपेण शुक्त्यादिरूपत्वं प्रमाणतः स्फुरति तद्वत्।
मायात्वं जगदादिरूपत्वेन तद्रूपत्वात्मायात्वात्प्रतिभासात्मायेत्यायाः सा च लौकिकः सर्वलोकप्रसिद्ध इ
त्यर्थः ६५ एवं मायाया विपरीतप्रतिभानं दर्शयित्वा तन्निरूपणीयमाह एवमिति केन कारणात्

यद्यथा वर्तमानेन तस्य तथात्वं भाति मानतः । अन्यथात्वं भ्रमेणेति न्यायोऽयं सार्वलौकिकः ॥६५॥
एवं श्रुतिविचारात्प्राग्यथा सद्वस्तु भासते । विचारेण विपर्येति ततस्तच्चिन्त्यतां चिरम् ॥६६॥

ति विचारात्प्राक् श्रुत्यर्थविचारात्पूर्वं यद्वस्तु यत्स्वरूपं ब्रह्मात्मायथायेन जगदादिरूपेण।
वर्तमानेन श्रुत्यर्थपर्यालोचनेन विपर्येति निर्गतमायाविपरीतं स्वस्वरूपं ब्रह्मैव भवति त
तः श्रुतिविचारेणैव वस्तु यथा तथा दर्शनसंभावनार्थं यावच्चिन्त्यतां विचार्यतामित्यर्थः ६६
॥ ॥ ॥

205

नन्वाकाशस्य सद्वस्तुकार्यत्वेऽप्याकाशस्य सत्तेति स्वतन्त्राकाशधर्मता कुतः प्रतिभातीत्याशङ्क्याह
मायाशक्तिरिति मायामायासद्वस्त्वन्याकाशं कल्पयतीत्यापाद्य मनः स्वहेतोर्मायायां भेदं कल्पयति पश्चात्
उक्तधर्मधर्मिभाववैपरीत्यं न कल्पयति अतस्त्वाकाशस्य सत्तेति भानमुपपद्यत इत्यर्थः ९२ मा
यया वैपरीत्यकल्पनं कृतमित्याशङ्क्याह सन्नसदिति वस्तुतत्त्वविचारे क्रियमाणे सदेव वस्तुत्वमि

मायाशक्तिः कल्पयेद्धर्मसाम्यं सद्धर्मेणाभिन्नताम् धर्माणां धर्मधर्मित्वं व्यत्ययेनावकल्पयेत् ९३
सतो व्योमत्वमापन्नं व्योम्नः सत्तां तु लौकिकाः तार्किकाश्चावगच्छन्ति मायाया उचितं हि तत् ९४

यत्सतो व्योमत्वमापन्नं सद्वस्तु तन्न ह्याकाशरूपत्वं प्राप्तं लौकिकाः पामरा नाशास्त्रज्ञा मध्ये तार्कि
काश्च तद्वैपरीत्येन व्योम्नो गगनस्य धर्मिणः सत्तां सद्रूपत्वं धर्मं जातिव्याप्यं वगच्छन्ति जानन्ति
नन्वन्यस्यान्यथाप्रतीतिरनुपपन्नेत्याशङ्क्योक्तमाह मायाया उचितमिति तद्वैपरीत्यदर्शनं हि तत् तन्मायया
मायायुक्तमित्यर्थः ९४ ॥ ॥ ॥

विचारस्वरूपमेव यदि दर्शयति भिन्नेति प्रतिज्ञातमेव हेतुमाह । शान्तेति विपर्यस्तक्रमयोरप्यत्र
त्वादित्यर्थः । हेत्वन्तरमाह बुद्धेरेवेति तमेव हेतुं विस्पष्टयति वाय्वादिष्विति सत्ताद्यादिष्वप्यते
षु सत्तायाः सत्तेजस्त्वेनैव प्रकारेण अनुवृत्तेर्भासते व्योमनि तेनैव भासमानत्वे यत्तानन्त्याभेदधीः भे
दमुद्दिशेत्यर्थः । सर्वसत्ताकाशयोर्भेदं प्रश्नाय व्योम्नः सत्तेति भ्रान्त्या प्रतीतस्य पर्यन्तधर्मिभावस्य

भिन्ने विपर्यस्तमतीशयत्वभेदाद्बुद्धेरेव भेदतः । वाय्वादिष्वनुवृत्तं सत्त्वं व्योमेति भेदधीः ॥ ९७ ॥ सद्
रूपं किं कथं तिनाहं धर्मि व्योम्नस्तत्पर्यमता । पिण्डादिता कृतः कोऽस्य हि व्योम किमात्मकम् ॥ ९८ ॥

विचारेणास्य यद्दर्शयति सद्रूपमिति रूपस्पर्शादिशून्यत्वेन तस्य द्रव्यस्यैवाकाशवाय्वादिष्वनुवृ
त्तस्य सत्तायां धर्मित्वं स्पर्शादिभ्यो व्यावृत्तस्य रूपस्यैव वाय्वादिभ्यो व्यावृत्तस्य नभसोऽपि धर्मित्वमि
त्यर्थः । ननु तर्हि चरणादिशून्यस्य रूपस्य यथा वायुत्वं तथा तत्तो भिन्नस्य नभसोऽपि स्पर्शादित्वप्रसं
गः स्यादिति कुतस्त्यस्तस्य नभसोऽपि पिण्डत्वनिरूपतत्त्वानैवमित्याह पिण्डेति ॥ ९८ ॥

वियन्मिथ्यात्वे सतो वस्तुत्वे च सदा चिंतयतः किं भवतीत्यत आह वासनायामिति दृढः वि
यत्सतोस्तत्वे वेनाभ्यासेन सम्यक्प्रवृद्धायां वासनायां निरवकाशसद्वस्त्ववबोधरहितं च दृष्ट्वा विस्म
यं प्राप्नोतीत्यर्थः उक्तन्यायमन्यत्राप्यतिदिशति एवमिति ननु आकाशकार्यस्य वायोः का
रणाद्भेदेन सद्वस्तुना तादात्म्यप्रतीत्ययोगात्सतो विवेचनमप्रयोजकमित्याशंक्याह सत्ता

वासनायां प्रवृद्धायां वियत्सत्यत्ववादिनं सन्मात्रबोधयुक्तं च दृष्ट्वा विस्मयते बुधः ७६
एवमाकाशमिथ्यात्वे सत्सत्यत्वे च वासिते न्यायेनानेन वाय्वादेः सद्वस्तु प्रविविच्यताम् ७७
सद्वस्त्वेकदेशस्था माया तत्रैकदेशगं वियत्तत्राप्येकदेशगतो वायुः प्रकल्पितः ७८ शो
षस्पर्शौ गतिर्वेगो वायुधर्मा इमे मताः त्रयः स्वभावाः सन्मायाव्योम्नां ये ते पि वायुगाः ७९

वेधाभावेपि परंपर्यासंबंधोस्तीत्याह सद्वस्त्विति ७८ एवं सद्वाय्वोः संबंधं प्रदर्श्य तयोः ध
र्मभेदज्ञानाय वायौ प्रतीयमानान् धर्मानाह शोषस्पर्शाविति एवं प्रतिस्वकान् धर्मान् अभि
धाय कारणगतान् प्राप्तानाह त्रय इति सन्मायाव्योम्नां ये त्रयः स्वभावाः शीलविशेषास्ते
पि वायुगा वायौ विद्यन्त इत्यर्थः ७९ ॥ ॥ ॥

ननु तयोः सद्द्वयविलक्षणत्वात्सत्त्वलक्षणं मायायामयत्नं युक्तमनेन तद्विरुद्धं अव्यक्तस्वरूपमा।
या वैलक्षण्यात्सत्त्वमयुक्तमपि किं न स्यादिति चोदयति नन्विति नाव्यक्तत्वे मायायाः प्रयोज
कं किं तु निस्तत्त्वरूपत्वं तत्तु मायायां विवचनाख्यातं सम्यग्लीति न मायायामपमत्वहानिरिति

ननु सद्वस्तुपार्थक्यात्सत्त्वे चेन्नरलोकवत् अव्यक्तमायावैषम्यात्मायायामपि तत्त्वपि तो ८२
निस्तत्त्वरूपतैवात्र मायायास्तु प्रयोजिका शक्तिकार्ययोस्तुल्यात्यक्ताव्यक्तत्वभेदिनोः ८४
सदसत्त्वविवेकस्य प्रस्तुतत्वात्स चिन्त्यताम् अस्तिकोऽवान्तरो भेदस्त्वास्तां तच्चिन्तयात्र किम् ८५

परिहरति निस्तत्त्वेति ८४ ननु शक्तिकार्ययोरुभयोरपि निस्तत्त्वरूपतायामविशिष्टायां।
व्यक्ताव्यक्तत्वलक्षणो भेदः कुतस्त्य इत्याशङ्क्य तर्हि चार प्रस्तुतावनुपयुक्त इति परिहरति स
दसत्त्वे अस्तिको मायाकार्यरूपस्यावान्तरभेदो व्यक्ताव्यक्तत्वरूप इत्यर्थः ८५ ॥

केन धर्मेणोपपन्नमाह वायुरिति वायुरस्तीति व्यवहारहेतुरुपपन्नं स्वरूपेणोपनिषत्कः वायोस्तु
सत्तानोविवेचितेनस्तितयतिः सत्त्वरूपत्वं समायाय धर्मोऽहंनोयः शब्दो व्योम्नः स्वभावः प्रकाशकाशादागतो
धर्मोऽस्तीयद्वन्यर्थः ननु व्योमविवेचनप्रस्तावे वायोर्व्याहितं ननु हन्त सत्त्वं व्योमेति भेदधीरिति
इवाचाचादावाकाशानुवृत्तिनिवर्तिता इदानीं व्योमानुवृत्तिरभिधीयते ततः पूर्वोक्तत्वविरोध इ

वायुरस्तीति सद्भावः सतो वाच्योऽप्ययं कृते निसत्त्वरूपतामाया स्वभावो व्योमगो ध्वनिः ८०
सतोऽनुवृत्तिः सर्वत्र व्योम्नो नेति प्रतीतम् व्योमानुवृत्तिरयुक्ता कथं न व्याहतं वचः ८१
किंकृतानुवृत्तिर्नैतीति पूर्वोक्तिरयुक्ताविपन्ने शब्दानुवृत्तिर्वाकाशाच्च सा व्याहतिक्रमः ८२

किं कृते सतोऽनुवृत्तिरिति काव्योमानुवृत्तिर्युक्तोऽयं तेऽनुमितिवेदः पूर्वमेवाकाशलक्षण
स्वरूपानुवृत्तिरर्थवादिनिदानीं धर्मानुवृत्तिरेवाभिधीयते न स्वरूपानुवृत्तिरतो न व्याहत
मितिपरिहरति किंकृत इति ८२ ॥ ॥ ॥ शिव

पं· ह·
हि·
१५

वह्निः स्वरूपमाह वह्निरिति अत्रापि वायवीयकारणधर्मानुगमादित्याह पूर्वेति के
वलधर्माद्यत्राकाशवायवामाह अस्तीति ८१ एवमप्यकारणधर्मानुगमात्तु वाद पूर्वं केवलौ
ष्ण्यधर्मं दर्शयति तन्मात्रेति उष्णस्पर्शविशेषणाद्वह्निस्वरूपस्य तन्मात्रेदानीमह स्वतो वह्नि

209

वह्निस्तत्प्रकाशात्मा पूर्वानुगतिश्च अस्ति वह्निः स नित्यतच्छब्दवान्स्पर्शवा
नपि ८४ तन्मात्रयाभासवाङ्मयशेषोद्रिक्तस्यार्थनिर्जागुणः तद्रूपं तत्र तज्जातं वम
न्वहुस्याविविच्यन्तो ९० सतो विवेचिते वह्नौ मित्थ्यात्वे सलिलवासिते आपोद
यंशाग्रतोन्यूनाः कल्पिताः इति विनयेत् ९१

विविनक्ति तत्रेति तत्रेत्युमध्ये सतः स्वह्नतोऽन्यसर्वं धर्मजातं निष्कृत्य दुष्टा विवि
च्यतोऽरूपकं क्रियतामित्यर्थः ९० एवं वह्नौ मित्थ्यात्वनिष्कृपानेतन्मयामि ख्यातं
विनयेदित्याह सतइति ९१ ॥ ॥ ॥ १५

पं. द.
द्वि.
१६

तेषु सद्विवेचनेन फलमाह ब्रह्माण्डेति तद्भानेऽपीह का क्षतिरित्युक्तमेवार्थं स्पष्टीकरोति भूतेति
भूतानामाकाशादीनां भौतिकानां ब्रह्माण्डादीनां मायायाश्च तत्कारणभूतायाः मिथ्यात्वेन विवे
कज्ञानाभ्यासेन दृढे वासिते सति सद्वस्तुनोऽद्वैतबुद्धिः कदाचिन्न विहन्यत इत्यर्थः ९६

ब्रह्माण्डमध्ये तिष्ठन्ति भुवनानि चतुर्दश भुवने भुवने सन्ति प्राणिदेहा यथायथम् ९६
ब्रह्माण्डलोकदेहेषु सद्वस्तुनि पृथक्कृते असन्तोऽण्डादयो भान्तु तद्भानेऽपीह का क्षतिः ९७
भूतभौतिकमायानामसत्त्वेऽत्यन्तवासिते सद्वस्त्वद्वैतमित्येषा धीर्विपर्यस्यति न क्वचित् ९८
सदद्वैतात्पृथग्भूते द्वैते भूम्यादिरूपिणि तत्तदर्थक्रियारूपो यथादृष्टस्तथैव च ९९

ननु भूम्यादीनां मृषात्वे विदुषो व्यवहारलोपः प्रसज्येतेत्याशंक्य विवेकेन मिथ्यात्वनिश्चयेऽपि
भूम्यादिस्वरूपमर्दनाभावान्न व्यवहारो लुप्यत इत्याह सदद्वैतादिति ९९ ॥ ॥

पं.द.
चि.
१

ॐश्रीगणेशायनमः यस्यस्मरणमात्रेणविघ्नाहंप्रणमामिहि वंदेहंगजवक्त्रंतंवांछितार्थप्रदाय
कं ।नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियतेचित्रदीपस्यव्याख्यातात्पर्यबोधिनी वि
कीर्षितस्यग्रंथस्यनिष्प्रत्यूहपरिसमाप्तयेपरमात्मनीतिपदेनेष्टदेवतातत्त्वानुसंधानलक्षणं
मंगलमाचरन् ग्रंथस्यवेदांतप्रकरणत्वात्तदीयैरेवविषयादिभिस्तद्वत्तासिद्धिंमन्वानस्तथा

211

ॐयथाचित्रपटेदृष्टमवस्थानांचतुष्टयं परमा
त्मनिविज्ञेयंतथावस्थाचतुष्टयं ।१॥ ॥

यथाध्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यतइतिन्यायमनुसृत्य परमात्मन्यारोपितस्यजगतः
स्थितिप्रकारंसदृष्टांतंप्रतिजानीते यथेति यथाचित्रपटेवर्तमानानामवस्थानांचतुष्टयं
परमात्मनिविज्ञेयम् तथापरमात्मन्यपिवर्तमानमव
स्थाचतुष्टयं ।१॥

महाभूतविवेकस्य
ध्यानदीपः
*

पं॰ द॰
ष॰
२

दार्ष्टान्तिकेनान्वयमाह स्वत इति यतः परमात्मा मायातत्कार्यरहितश्चिद्रूपस्ततो मायायोगा
दन्तर्यामी अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा पञ्चीकृतभूतकार्यसम
ष्टिस्थूलशरीरयोगाद्विराडिति ननु परमात्मनश्चित्रपटस्थानीयत्वेन दर्शितानि चि

212

स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ४
ब्रह्माद्याः स्तम्बपर्यन्ताः प्राणिनोऽत्र जडा अपि उत्तमाधमभावेन वर्तन्ते पटचित्रवत् ५ ॥

त्राणि क्व स्थानीयानीत्यत आह ब्रह्माद्या इति अत्र परमात्मनि उत्तमाधमभावेन वर्तमाना ब्र
ह्मादिस्तम्बपर्यन्ताश्चेतनात्मकाः प्राणिनो गिर्यादिकम् जडं च चित्रस्थानीयमित्यर्थः ५ २
॥ ॥ ॥ ॥

पं.ध.
३

ननु सर्वैर्वादिभिर्लौकिकाश्चात्मन एव संसार इति वदन्ति न तु किं कारणमित्याशंक्य तान्प्रत्ये
व कारणमिति सिद्धान्तमाह ब्रह्माभासेति गिरिनद्यादीनां तु चिदाभासकल्पनाभावदृष्टे
नष्टः तस्मादाह चित्तस्थेति प्रयोजनाभावादिभावः एवमात्मन्यारोपितस्य संसारस्य ज्ञानेन नि

ब्रह्माभासस्थितिर्नात्र गिरिनद्यादिवस्तुषु तदन्तःकरणे जीवसंसारं चित्कृतं विदुः ८
चित्तस्थस्यैव नादीनां ब्रह्माभासो न लिङ्ग्यते सृष्टिस्थितिकादीनां चिदाभासत्वतो न हि ९
संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि इति भ्रान्तिरविद्या स्याद्विद्ययैषा निवर्तते १० आ
त्माभासस्य जीवस्य संसारो नात्मवस्तुनः इति बोधो भवेद्विद्या लभ्यतेऽसौ विचारणात् ११

२१३

वर्ष्यसिद्ध्ये ननु लभ्यतां नामविद्यामाह १० इति केयं विद्या तल्लाभोपायश्च क इत्याकांक्षायां
विद्यास्वरूपं तल्लाभोपायं च दर्शयति आत्माभासस्येति चिदाभासस्येत्यर्थः ११ ॥
॥ ॥ ॥ ॥ ॥

३

अस्माज्जगतश्चित्रस्यानीयते कारणं बन्धे दृष्टान्तमाह चित्रेति यथा चित्रे लिखितानां मनुष्या
दिशरीराणामेव नानावर्णोपितावस्त्रविशेषालिप्यन्ते नैव शुक्लतादिनिवारकत्वाद्वत्स्वाभासा
एव दार्ष्टान्तिकमाह पृथगिति एवं परमात्मान्यारोपितानां देवादीनां शरीराणामेव जीवानाम्।

चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक् चित्राधारेण वस्त्रेण समदृश्याश्च कल्पिताः
६ पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनां कल्प्यन्ते जीवनामानो बहुधा संसरन्त्य
मी ६

न चिदाभासाः प्रत्येकं कल्प्यन्ते न पर्वतादीनां तेषां कल्पने कारणमाह बहुधेति अमी जीवा
देवतिर्यङ्मनुष्यादिशरीरेषु बहुधा संसरन्ति न परमात्मा न स्वाने[illegible]रित्यादिरभि
प्रायः ६ ॥ ॥
शिव

पं द. ष. ४

स्यात्सैव शिष्यत इत्यनेनापि परमात्मनः सत्यत्वज्ञानमेव विवक्षितेन तदतिरिक्त जीवजगद्विस्मृ
तिर्जीवन्मुक्ति अभावप्रसंगादित्याह परमात्मेति सदा विचारयेदित्युक्तमादेहपातपर्यन्तं वि

परमात्मावशेषोऽपि तत्सत्यत्वविनिश्चयः न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत्
१४ परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा तत्रापरोक्षविद्याप्तौ विचारोऽयं समा
प्यते १५ अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् अहं ब्रह्मेति चेद्वेद साक्षात्का
रः स उच्यते १६

214

चारप्रसक्तौ समाप्तिं तस्यावधिमाह परोक्षा चापरोक्षेति विचारजन्या विद्या परोक्षा चापरोक्षा च भे ४
देन द्विधेत्युक्तम् तयोरुभयोः स्वरूपं क्रमेणोपदिशति अस्ति ब्रह्मेति चेदिति १६॥

वचारालम्भने विधेयत्वमुक्तं कस्य विचारालम्भने विधेयत्वमित्याशंक्याह सदेति ननु परमात्मा विचा
र्यतामेतावस्यावाप्तिफलत्वरूपेणावस्थानात् जीवजगतोर्विचारः कोपयुज्यत इत्याशंक्य तद्बा
धनेन परमात्मावशेषेण उपयुज्यत इत्याह जीवभावेति ननु विचारेण जीवजगतोर्बाधे

सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः जीवभावजगद्भावबाधे स्वात्मैव शिष्यते १२ नाप्र
तीतिस्तयोर्बाधः किन्तु मिथ्यात्वनिश्चयः नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः १३

तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं विशदयन्नाह
नाप्रतीतिरिति सुषुप्तिमूर्छादौ तत्र द्वैतप्रतीत्यभावात् तत्त्वज्ञानं विना मुक्तिः स्यादि
त्यर्थः १३ ॥ ॥

शिव

पे. ट.
प.
प

घटावछिन्नस्य घटाकाशस्य तदनवछिन्नस्य च महाकाशस्य प्रसिद्धत्वात् तौ विहायाप्रसिद्धं जला
काशमुत्पादयति घटावछिन्नेति घटावछिन्ने आकाशे यदुदकमस्मिन्नत्र जले प्रतिबिंबि

215

घटावछिन्नाकेनीरे यत्तत्र प्रतिबिंबितः सम्भानतत्र आकाशो जलाकाशदीर्यते ॥१९॥ महा
काशस्य मध्ये यमेघमंडलमिष्यते प्रतिबिंबितया तत्र मेघाकाशो जलेऽस्थितः २०

तो भ्रनतत्र सहित आकाशो नलाप्काशाहत्तुच्यते अभ्राकाशंमुत्पादयति महाका।
शस्येति तत्र मेघमंडले यज्जलं तस्मिन्नत्मर्यः २० ॥ ॥ प
॥ शिव ॥ शिव ॥

एवंविधसाक्षात्कारसाधारणकारणमात्मतत्त्वं विविच्य प्रतिजानीते तत्साक्षात्कारेति येन साक्षात्का-
रेणोत्पन्नेन सद्य एव विमुच्यते तत्साक्षात्कारसिद्ध्यै मिति पूर्वं गात्वयः चिदात्मनः पारमार्थि-
कमेकत्वं निश्चेतव्यमवच्छेदकदशायामप्युपेयमानं चेतनत्वभेदमतिदिशति कूटस्थ इति कथ

तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते येनायं सर्वसंसारात् सद्य एव विमुच्यते ॥१७॥
कूटस्थो ब्रह्म जीवेशावित्येवं चिद्विधा मता घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा
॥१८॥

कथमित्यत्र चातुर्विध्ये दृष्टान्तमाह घटाकाशेति ॥१८॥ ॥ ॥ ॥ शिव
॥ ॥ ॥ ॥ ॥

मुत्पादयति कूटस्थ इति तस्य जीवस्य जीवत्वप्राप्तिनिमित्तमाह प्राणानामिति कूटस्थातिरिक्तजीवकल्पनमप्रयोजकमित्याशंक्याविकारिणः कूटस्थस्य संसारासंभवात्तन्निर्वाहार्थं सोऽङ्गीकर्तव्य इत्यर्थः संसारेणेति ननु जीवातिरिक्तः कूटस्थोऽस्ति चेत्किमिति न प्रतिभासत

कूटस्थकल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बिता प्राणानां धारणाज्जीवः संसारेण स युज्यते २३
जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः यथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते २४

इत्याशंक्य जीवेन तिरोहितत्वादिति सदृष्टान्तमाह जलेति नन्वेतत्तिरोधानेन का पिणास्त्वप्रति पादितमित्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानान्नैवमित्याह सोऽन्योन्याध्यास इति उच्यते भाष्यादिष्विति विशेषः २४ ॥ ॥ ॥

ननु मेघजलस्याप्रतीयमानत्वात्तत्र कथं प्रतिबिंबितत्वमाकाशस्येत्याशंक्याह मेघांश इति मेघस्थस्य जलस्य प्रत्यक्षेणानुपलंभेऽपि वृष्टिलक्षणात्कार्यात्तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयते उदकत्वेनैव लिंगेन विमतं जलमाकाशप्रतिबिंबवद्भवितुमर्हति जलत्वात् घटगतजलवदित्यनुमानेन मेघांशरूपे जलेऽप्याकाशप्रतिबिंबसद्भावो वा।

मेघांशरूपमुदकं तुषाराकारसंस्थितं तत्र खप्रतिबिंबोऽयं नीरत्वादनुमीयते २१ अधि-
ष्ठानतया देहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते २२

स्यतेऽप्यर्थः एवं दृष्टान्तमाकाशचतुष्टयमभिधाय दार्ष्टान्तिके प्रथमोद्दिष्टं कूटस्थमुत्पादयति अधिष्ठानेति पंचीकृतापंचीकृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतया वर्तमानत्वेन ताभ्यामवच्छिन्न आत्मा कूटस्थ उच्यते तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह कूटवदिति एवं कूटस्थं निरूप्याथ जीवस्य कूटस्थे कल्पितत्वमुद्दिश

पं·द·
ष·
७

अज्ञानीति विद्वषा कूटस्थं किं जानासीति पृष्टो ज्ञानी नेन जानामीत्यज्ञानमनुभूयवदतिस्वय
मविद्यानुभवः नकेवलज्ञानानुभवमेववाच्यं अपितु नास्ति न भाति कूटस्थाभावाभानेवा
नुभूयवदतिस्वयमावरणानुभवः अनतउभयत्रानुभवः प्रमाणमिति भावः ननुभवन्मते आ

217

अज्ञानी विद्वषा दृष्टः कूटस्थं न प्रबुध्यते न भाति नास्ति कूटस्थ इति वुद्धे वदत्यपि २७
स्वप्रकाशे कुतो विद्या तां विना कथमावृतिः इत्यादि तर्कजालानि स्वानुभूतिर्ग्रसत्यसौ २८

त्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन तयोः
सर्वथानुपपत्तेः अविद्याभावे च तत्कृतमावरणं तु निरूप्यं स्यात् तदभावे च तन्मूलकस्य वि
क्षेपस्यासंभवः विक्षेपाभावे च ज्ञाननिवर्त्यस्यानर्थस्याभावात् २८ ॥ ॥

७

नन्वगमेवाध्यासस्तस्य कारणरूपाविद्याया वक्तव्येत्याशंक्य जीवकूटस्थयोः संसारदशायामभेद-
प्रतीतिरेवाविद्येत्याह अयमिति पूर्वोक्तस्य जीवस्याविद्याकल्पितत्वस्पष्टीकरणायाविद्या विभ-
जते विक्षेपेति विक्षेपहेतुत्वेनाभ्यां द्विगतत्वावृतिं प्रथमं लक्षयति न भातीति कूटस्थो न।

अयं जीवो न कूटस्थं विविनक्ति कदाचन अनादिरविवेकोयं मूलाविद्येति गम्यताम् २५
विक्षेपावृतिरूपाभ्यां द्विधाविद्या व्यवस्थिता न भाति नास्ति कूटस्थ इत्यापादनमावृतिः २६

भाति न प्रकाशते नास्ति चेत्यसद्व्यवहारहेतुरावरणमित्यर्थः नन्वविद्याया आवरकत्वेनावरणस्य
च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्यर्थ २६ ॥ ॥ ॥ ॥
शिव ॥ शिव

पं॰दृ॰
ष॰
८

आविद्यावरणस्याधकत्वेनत्वपेक्षितत्वाद्विरोधित्वेऽविद्याप्रतीतिरेवनस्यादितिभावः नन्वेवं विद्यायाः को
विरोधीत्यतआह विवेकइति विवेकउपनिषद्विचारजन्यज्ञानंविवेकस्याविरोधित्वंकुतइ
त्यतआह नत्वज्ञानीति एवमविद्यावरणंदर्शयित्वाविक्षेपाध्यासमाह अविद्येति इदंकू
टाविद्यावरणेचकूटस्थेप्रत्यगात्मन्यारोपितस्थूलसूक्ष्मशरीरसहितस्य दृश्याभासोविक्षे

नत्वेवंविरोधिकेमेयमाहनित्यद्रष्टुभ्रस्यनो विवेकस्तुविरोधस्यात्तत्त्वमानिरिडपर्णं ३२ अवि
द्यावृतिकूटस्थेदेहद्वयपुताचितिः शुक्तौरूप्यवदध्यस्ताविक्षेपाध्यासएवहि ३३ इदमंश
स्यसत्यत्वंशुक्तिगंरूप्यईक्ष्यते स्वयंत्ववस्तुताचैवंविक्षेपेवीक्ष्यतेऽनगम् ३४

पाध्यासस्यार्थः अस्यविक्षेपस्याध्यासत्वसिद्धयेशुक्तिरजताध्याससाम्यंदर्शयति इदमं
शस्येतिशुक्तिकायामारोपितरजतादेरूपादिसंवलितमवाध्यत्वंचयथारोपितरजतेवभास
ते एवंस्वयंत्ववस्तुत्वंचकूटस्थनिष्ठमारोपितेविदाभासेवभासतेइत्यर्थः ३५

॥ ॥ ॥ ॥ ॥

वैयर्थ्यात् तत्त्वनिर्णयादिकं शास्त्रप्रमाणेभ्यस्तादित्याशंक्यैतत्सर्वं दृष्टवोक्तानुभवबाधितमित्याह
स्वप्रकाशत्वइति नहि दृष्टे रूपपन्नं नामेति न्यायादिभावः २९ ननु अनुभवस्योक्तेन तर्कविरोधे
नाभासत्वात् तेन तत्त्वनिश्चय इत्याशंक्यानुभवानुभवप्रमाणानभ्युपगमे केवलतर्कस्यानिश्चा
यकस्वे तेनैवाभ्युपगंतव्यत्वात् ज्ञाताकिंकस्य तत्त्वनिश्चयः कादित्याद इत्याह स्वानुभूताविति

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थिते कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् २९
बुद्ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा मति स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां ३० स्वानु
भूतिरविद्यायामाहृतौ चप्रदर्शिता अतः कूटस्थचैतन्यमविरोधीति तर्क्यतां ३१ ॥

नन्वनुभवस्य तत्त्वनिश्चायकत्व एव तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोऽ
प्यभ्युपगंतव्य इत्याशंक्याभ्युपगमन्नपि तत्र हि नुभवानुसारेणैव तर्को वर्णनीय न तु हि रोधेनेत्याह बुद्ध्यारो
हायेति कोऽसावनुभवो यदनुसारेण तर्को वर्णनीय इत्याकांक्षायां पूर्वोक्तमविद्यादिगो
चरमनुभवं स्मारयति स्वानुभूतिरिति फलितमाह अत इति तमेव तर्कमभिनीय दर्शय

पं० दृ० ष० ९

ननु स्वयमहंशब्दयोरेकार्थत्वात् कथं दृष्टो मारुतदार्शीकयोः साम्यामित्याशंक्योदेवरूपशब्दा
र्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्यान्मैवमित्याह इदंतद्रू
पमतेइति स्वयंशब्दार्थस्य सामान्यरूपत्वं यस्पष्टीकर्तुं लौकिकप्रयोगं तावद्दर्शयति देवद।

इदंतद्रूपमते भिन्नेऽस्त्वनाहंते न तथेयता सामान्यं च विशेषश्च शब्दाभयत्रापि गम्यते ३८ देव
दत्तः स्वयं पचत्युक्ते त्ववीन्योऽस्त्वस्वयं न तथा अहं स्वयं न शक्नोमीत्येवं मो लोके प्रयुज्यते ३९ इद
रूपमिदं वस्त्विति यहदिदं न तथा अर्थोऽत्वमहमित्येष स्वयमित्यभिमन्यते ४० ॥ ॥

न भवन्त्ययं प्रयोगः कथमेतावतास्वयंशब्दार्थस्य सामान्यरूपत्वमित्याशंक्येदंशब्दार्थं वदि
त्याह इदंरूपमिति यथा रूपवदादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सामान्य
रूपत्वं तथा अर्थोऽत्वमेवमेम्येतेदमित्यादौ सर्वत्र स्वयंशब्दप्रयोगात्तदर्थस्यापि सामान्य
रूपत्वमेवमस्मत्कृत्यर्थः ४०

219

एवंसामान्यांशप्रतीतिमुपपत्त्या प्रदर्श्य विशेषांशप्रतीतिं सामान्याद्दर्शयति नीलेति सामान्य
रंदर्शयति आरोपितस्येति दृष्टान्ते शुक्तिरूपस्थलेपि आरोपितपदार्थस्य रूप्यनाम रूप्यमिति नाम
यथा एवं कूटस्थकल्पिते चिदाभासरूपवृत्तेस्पष्टत्वेन स्पष्टाहमिति नामेत्यर्थः ननु
दृष्टान्तेऽरोचतिनि स्फुरति किं सकलेन्द्रियसन्निकर्षेजाते सति रूप्यमिदमिदमिति नदति

नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं असंगानन्दताद्येवं कौटस्थेपि तिरोहितम्
३५ आरोपितस्य दृष्टान्ते रूप्यं नाम यथा तथा कूटस्थाध्यस्तवित्तेपि नामाहमिति निश्चयः ३६ इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते तथा स्वं च स्वतः पश्यन्नहमित्यभि
मन्यते ३७

३३

विक्तरजतमभिमानउपपद्यते नैवं दार्ष्टान्तिके आत्मातिरिक्तवस्त्वभिमानद्व्यांशे
काल्पनिकप्रकाशचिदात्मन्यवभासमाने तदिति विक्ताहमित्यभिमानउप
लभ्यते अतो नैकरूप्यमित्यभिप्रायेणाह इदमंशमिति ॥ ॥

पं. द.
६.
९

घटइति घटादिष्वपिस्फुरणरूपेणात्मचैतन्यस्यत्वात्तेष्वपित्वंयंशब्दप्रयोगोनविरुध्यतइत्याह
द्रष्टृत्वमिति ५४ ननुघटादिष्वप्यात्मचैतन्यसत्त्वेचेतनाचेतनविभागोनिर्निमित्तकःस्या
दित्याशंक्याचिदाभाससत्त्वासत्त्वलक्षणकारणसद्भावान्मैवमितिपरिहरति चेतनानिचे
तनाऽचेतनविभागस्यचिदाभाससत्त्वाऽसत्त्वप्रयुक्तत्वाऽभ्युपगमेऽचेतनेष्वात्मसत्त्वाऽभ्युप

220

गतःस्वयंनजानातीत्येवंस्वत्वंघटादिषु अचेतनेषुद्रष्टृत्वंचेद्द्रष्टृत्वमात्मसत्त्वतः ५४ चे
तनाचेतनभिदाकूटस्थात्मकृतानहि किंतुबुद्धिकृताभासकृतेत्यवगम्यताम् ५५
यथाचेतनआभासःकूटस्थेभ्रान्तिकल्पितः अचेतनोघटादिश्चतथातत्रैवकल्पितः ५६

गमेऽतिप्रसंगःस्यादित्याशंक्याचेतनाऽचेतनविभागहेतुत्वेनकूटस्थस्याऽनभ्युपगमात्तेऽ
प्यऽचेतनकल्पनाऽधिष्ठानत्वेनकूटस्थाभ्युपगमेनव्यवहाराभिप्रायेणाघटादेस्तत्रकल्पितत्वं।
सदृष्टान्तमाह यथाचेतनइति ५६ ॥ ॥

भवतु स्वयमहंप्रत्ययो लोके भेदयतां कूटस्थात्मनि किं मायावतामिति इच्छन्ति अहंत्वादिति
सामान्यरूपः स्वयंप्रकाशार्थं च कूटस्थ इतीदं मायावतामिष्टं स्वयंप्रकाशार्थ इति नन्वस्य तद्रूपो
पलम्भनत्वनिवारणेन न कूटस्थत्वं बोधयतीति शङ्कते अनन्यवारक इति स्वयंप्रकाशार्थकूट
स्थस्यैवात्मत्वात्स्वतो नान्यनिवारणमिहमेवेति परिहरति अन्यवारणं कूटस्थेति ननु
स्वयमात्मनोः प्रकाशयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवैकार्थत्वाभावात्कथमस्य

अहंत्वादिधर्मोऽस्त्विति कूटस्थेन न किं तव स्वयंप्रकाशार्थं चैव कूटस्थमिति तन्मे वेतनु ४२ अ
न्यवारकं तत्त्वमिति इदन्तावारणं कूटस्थस्यात्मनो वक्ता इति ममेवाहितम्भवे तनु ४२ स्वय।
मात्मेति पर्यायोतेन लोके नयोः सह प्रयोगो नास्ति तः स्वतमात्मत्वं चान्यवारकम् ४३

यंप्रकाशार्थस्य कूटस्थस्यात्मनो भिन्नांशं कसह ... कारादिशब्दवदेकार्थत्वापादनेमैवमिति।
परिहरति स्वयमात्मेतीति पर्यायत्वे सह प्रयोगाभावं दर्शयति नहि तेन लोके इति फलितमाह
अतः स्वत्वमिति ननु घटादिष्वेतन्नष्टोऽपि स्वयंशब्दस्य प्रयोगाद्दर्शनात् स्वयंत्वात्मत्वयो।
रेकान्तत्वं न घटन इति शङ्कते ४४ ॥ ॥ ॥ ॥

प्र. ष.
११

एवंप्रासंगिकंपरिसमाप्यकलितमदर्शनायलोकव्यवहारसिद्धार्थमनुवदति ननु इदं नेद
ति ननु प्रतियोगित्वमिदन्तायास्तदिदमिति स्वान्तप्रतियोगित्वमन्यत्वस्य स्वयमनुपरति त्वे
नाप्रयोगित्वमहन्तायास्त्वमहमिति लोके प्रतिहं हितेन प्रयोगदर्शनात्प्रसिद्धमिति भावः
भवत्वेवं लोके प्रकृते मायातमित्यत आह अन्यतायाइति अन्यत्वमतियोगीत्वयंप्रश्नार्थः

ह्र २

ननु इदं नेदं त्वमन्यत्वेत्वहमहन्तेदंतेपरस्परं प्रतिहं हितयालोके प्रसिद्धत्वात्किंसंशयः ४९ अ
न्यतायाप्रतिहं हीत्वयंकूटस्थइष्यता तेनतायाः प्रतियोगेपक्षोऽभिन्नामनिकल्पितः ५
अहन्तास्वत्वयोर्भेदंतूपेदंतयोरिव स्पष्टेपिमोहमापन्नाएकत्वंप्रतिपेदिरे ५१ ॥

शा २

तेनाप्रतियोगेपदंप्रश्नार्थेचिदाभासः कूटस्थेकल्पितः इत्यर्थः ननु कथंकारेणाजीवकूट
स्थयोर्भेदेसत्यपिसर्वेइत्यभिमिति न जानन्तीत्याशंक्याह अहन्तेतिबुद्धिस्थादिणः कूट
स्थस्येवत्वाप्रत्यतीकत्वमप्रकाशत्वादहत्वभेदप्रतिभासमानयोर्जीवकूटस्थयोर्भेदः।

सत्तात्मकयोरेकत्वे। निष्प्रसंगांशकत्वे ननु इदं तत्त्वे अपीति तन्महदादिषु सर्वेष्वनुगतस्वरूपत्वे
स्य वर्तत्त्वानुगतत्वोऽस्तु नेदं तयोरप्यात्मत्वं स्वरूप तात्किं न स्यादिति भावः। ननु इदं तयोरात्मत्वाद।
धिकवृत्तित्वादात्मत्वं न संभवतीत्याह तेष्वात्मत्वेऽपीति ननु इदं तेष्वस्तत्त्वमिव पप्पपितन्महद
मादिष्वनुगतत्वेन यापितेष्वनुवर्तमाने आत्मत्वेऽप्यनुगतत्वेन तदात्मत्वमिदमात्मत्वमित्या

ननु इदं तेष्वपि सत्त्वमिव तन्महदादिषु सर्वेष्वनुगतत्वेन तयोरप्यात्मत्वे विचेत ॥ ४७ ॥ ते
आत्मत्वेऽप्यनुगतत्वेन ननु इदं तेन तत्त्वयोः आत्मत्वं नैव संभाव्यं सम्यक्त्वादेर्यथा तथा ॥ ४८ ॥

हि व्यवहारसंभवात् तयोरात्मत्वादधिकवृत्तितादात्म्यत्वरूपत्वान संभावयते न त्वह।
ष्टान्तः सम्यक्त्वादेरिति आत्मत्वसम्यगात्मत्वमस्य सम्यगिति व्यवहारवशादात्मत्वमप्यनु।
वर्तमानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ॥ ४८ ॥ ॥
॥ ॥ ॥.

नन्वस्य जीवन्मुक्तस्य योगिनः कर्तृत्वभ्रमस्य किं कारणमित्यपेक्षायामाह नह्यात्मेति अज्ञात्मनि तदुप-
थेऽनादिरविवेकोऽयमित्यज्ञोक्तयाऽविद्ययोऽर्थः यतो विद्याकार्यमेतत्त्वमस्याऽनेनाऽविद्या
निवर्तकत्वात्तेनैव तन्निवृत्तिरित्याह अविद्यायामिति नन्वस्याऽविद्याकार्यत्वात् नि-
वृत्यानिवृत्तिरित्युक्तं तत्प्रतिपन्नं ब्रह्मात्मैकविद्यायां तु स्वज्ञायामनःपश्चाद्विद्याकार्यस्य देहादे-
रुपलभ्यमानत्वादित्यत आह अविद्याहतीति अविद्यकाकारणयोऽराहतिनादाम्यया
नास्त्यस्याऽप्यनवस्थात्वौको विद्ययाकृतः अविद्यायां निहतायां तत्कार्यं विनिवर्तते
पर अविद्यावृत्तिना सात्म्यविपर्येवविनश्यता विदेहस्य स्वरूपत्वेऽप्यारब्धदयमीक्षते पर
उपादानेविनिहतेऽपि तत्कार्यं प्रतीयते इत्याह स्वात्किं कालस्तदस्या कल्किंमततमेवं न
५४
विपर्येवनिवृत्तिःकर्मसहिताऽविद्याजन्यस्य तु विदेहपत्तरूपस्य कर्मावसानपर्यं-
तमवस्थानमित्यविरोध इति भावः ननु प्रारब्धकर्मणां निमित्तमात्रत्वात्तत्सद्भावमा-
त्रेणोपादानेविनष्टेऽपि कथं कार्यानुवृत्तिरित्याशंक्याऽऽशयात्मनैव तद्दृष्टान्तेनैतदनु-
वृत्तिं संभावयति उपादान इति ॥ ॥ ॥ ॥

पं॰ द॰
ष॰
१३

नेष्टव्येक प्रमत्तावादिनोपि परं व्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्यु
दाहरन्तीत्याह श्रौतीकृत्यमिति कोशमन्नमयमिति श्रुत्यान्नमयकोशप्रतिपादकं स।
वा एष पुरुषोऽन्नरसमय इत्यादिवाक्यं लक्षणे विरोचनस्य सिद्धान्तमिति तत्सिद्धान्तप्रतिपादक
मात्मैवाहमिह इत्यादिवाक्यं लक्षणे छान्दोग्यप्रमाणत्वेन प्रतिजानन्ते एवं तन्मतस्यापि पाद

श्रौतीकृत्य तत्पदं नेकोशमन्नमयं तथा विरोचनस्य सिद्धान्तं प्रमाणं प्रतिजज्ञिरे ९१ जी
वात्मनिर्गमे देहमरणस्यात्र दर्शनात् देहातिरिक्त एवात्मेत्याहुर्लोकायताः परे ९२
प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणं गमयेदिन्द्रियात्मानं वच्म्यादिप्रयोगतः ९३

223

यितं तमाः प्रकरणविरोधादितिभावः अस्मिन्मते दोषप्रदर्शनपरः स्वयं मतान्तरमुपन्यस्य।
पयति जीवात्मेति कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्याकांक्षाया
माह प्रत्यक्षत्वेनेति अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्ताहंबुद्धि

१३

ननु कूटस्थजीवयोरेकत्वं भ्रान्तिसिद्धं चेदिदं भ्रान्तमिति केऽपि जानते न ज्ञानेनेत्याशंक्यास्तु ती नात्यर्थालोचनस्वरूपत्वादित्याह भ्राम्यन्त इति तत्र भ्रान्त्यर्थं प्रवक्तारोऽपि केचिद्दिस्याज्ञो न ज्ञानेनेत्याशंकानेशास्त्राकल्पेन भ्रान्त्यर्थपर्यालोचनाभावादित्याह एवोपरेति तत्त्वता।

भ्राम्यन्ते पण्डितंमन्याः सर्वे लौकिकतैर्थिकाः अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः ५८ पूर्वापरपरामर्शविकलास्तत्र केचन वाक्याभासान्स्वस्वपक्षे योजयन्त्यप्यलज्जया ५९ कूटस्थादिशरीरान्तसंघातस्यात्मतां जगुः लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ६०

वक्ष्यमाणेऽप्युपन्यासेऽतिस्पष्टत्वाल्लोकायतादिपक्षं प्रथमतोऽनुभाषते कूटस्थादीति प्रत्यक्षसिद्धत्वेन देहादेरात्मत्वं पारमार्थिकं स्यादित्याशंक्याह प्रत्यक्षाभासमिति

६० ॥ ६०

पं.द.
प्र.
१४

प्राणस्यात्मत्वेफलंकिमाह प्राणस्येति मनसआत्मत्वेफलप्रतिपादिकांश्रुतिमाह।
मनएवेति तस्माद्वाएतस्मात्प्राणमयात् अन्योन्तरआत्मामनोमयइतिश्रुत्यंतरंद
र्शयति श्रुतइति फलितमाह तेनेति मनसोप्यंतरस्यविज्ञानात्मत्ववादिनोवौ

मनएवमनुष्याणांकारणंबंधमोक्षयोः श्रुतोमनोमयःकोशस्तेनात्मेतीरि
तेमनः ९८ विज्ञानमात्मेतिपरआहुस्तत् कवादिनः यतोविज्ञानमूलत्वंमन
सोगम्यतेस्फुटं ९९ अहंवृत्तिरिदंवृत्तिरंतःकरणंद्विधा विज्ञानंस्यादहंवृ
त्तिरिदंवृत्तिर्मनोभवेत् १०० अहंप्रत्ययबीजत्वमिदंवृत्तेरतिस्फुटम् ॥

इदमस्यमतंदर्शयति विज्ञानमिति विज्ञानस्यांतरत्वेयुक्तिमाह यतइति विज्ञानम
नःशब्दवाच्यकस्यांतःकरणस्यैकत्वात्कथंमनोविज्ञानयोःकार्यकारणभावइ
त्याशंक्यतदुपपादयितुंतयोर्भेदंतावद्दर्शयति अहंवृत्तिरिति तयोःकार्यकार

नन्विन्द्रियाणामचेतनानां कथमात्मत्वमित्याशङ्क्य श्रुतिसिद्धेन्द्रियसंवादश्रवणा-
द्चेतनत्वमपि सिद्धमित्याह वागादीनामिति चेतनत्वस्यात्मलक्षणत्वात्तेनना-
मिन्द्रियाणामात्मत्वमुचितमित्याह आत्मत्वमिति मतान्तरमुत्थापयति हैरण्यगर्भा
इति प्राणस्यात्मत्वे श्रौतलिङ्गानि दर्शयति प्राण इति प्राणस्य प्रपन्नास्मिन्पुरे।

वागादीनामिन्द्रियाणां कलहः श्रुतिषु श्रुतः तेन चैतन्यमेतेषामात्मत्वं तत एव
हि ॥ ६४ ॥ हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे
तु जीवति ॥ ६५ ॥ प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्यादिकं श्रुतं कोशः प्राणमयः स-
म्यग्विस्तरेण प्रपञ्चितः ॥ ६६ ॥ मन्यन्त आत्मानमन्ये मन उपासकाः प्राणस्याभो-
क्तृता स्पष्टा भोक्तृत्वं मनसस्तथा ॥ ६७ ॥

प्राणो जागर्तीत्यादिना प्राणो जागर्तीति श्रूयते न
प्राणे प्रपन्ने उदतिष्ठत्तद्धैतद्कथमभवत्तदेतदुक्थमिति प्राणस्य श्रेष्ठत्वादिकं श्रूयते
अन्योऽन्तर आत्मा प्राणमय इत्यादिना प्राणमयः कोशः प्रपञ्चितः आदिशब्दात्प्राण-

यंत्रारूढानित्यत्र यंत्रारोहणशब्दयोरर्थमाह देहादीति भ्रामयन्निति पदे प्रकृतमर्थमाह विहितेति इदानीं णिचप्रत्ययमायापदयोरर्थमाह विज्ञानमयेति अंतर्यामयतीति पदस्याप्य

देहादिपंजरं यंत्रं तदारोहोऽभिमानिता विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ७३
विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपता स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत् ७४
अंतर्यमयतीत्युक्त्यायमेवार्थः श्रुतौ श्रुतः पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया ७५
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः केनापि देवेन हृदि स्थितेन यथा नि
युक्तोऽस्मि तथा करोमि ७६

एवमेवार्थमित्याह अंतर्यामयतीति उक्तव्याख्यानं पर्यंतरेष्वति
दिशति पृथिव्यादिष्विति प्रवृत्तिज्ञानस्य सर्वस्येश्वराधीनत्वे वचनांतरमुदाहरति जाना
मि धर्ममिति ७६ ॥

यः सर्वाणि भूतान्यन्तरो यमयतीति वाक्यस्य तात्पर्यं स्पष्टयन्नाह श्लोकद्वयेन तन्त्रेति
तन्तुसंकोचादिना पटसंकोचादिर्यथा भवति एवं पृथिव्यादिरूपादानत्वेन स्थितो तथा
मीयमायया तासीत्तया यथा घटादिकार्यरूपेण विक्रियते न तथा न तत्कार्यं चेत्तानि तथा वर्षणं।
भवतीति भावः एवमन्तर्यामिमन्त्रपादिकां श्रुतिमुपपन्नस्य स्मृतिमुपपन्नस्याति ईश्वर इ

तन्तोः संकोचविस्तारचलनादौ पटस्तथा अवश एमेव भवति तस्मात्संपटे मनाक्
तथा तद्योग्यः यंयंत्र यथा वासनया यया विक्रियते तथा च पृथग्भवत्येव न संशयः ७०
श्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ७१ स
र्वभूतानि विज्ञानमयास्तेह हृदयस्थिता तदुपादानभूते भ्रान्तवा विक्रियन्ते खलु ७२

ति सर्वभूतानीति पदस्यार्थमाह सर्वभूतानीति तेच हृदयपुण्डरीके स्थिता न तु तेषां क्र
मो हृदयवस्थानमित्याकाह यथैवं तयोर्मिणो विज्ञानमयाकारेणापरिणामादित्याह
तदुपादानेति ॥ ॥ ॥

पं.द.
प्र.
२९

श्रुत्यादीश्वरस्य भीतिहेतुत्वमुक्तमित्याह आज्ञयाइति ईश्वरस्य भीतिहेतुत्वं किमर्थमि
त्याशंक्य सर्वेश्वरत्वस्यान्तर्यामित्वतः पार्थक्यसिद्ध्यर्थमित्याह सर्वेश्वरत्वमिति बहिर्व
तन्त्र्यस्य व्यपवादनियामकपत्न्यत्र श्रुतिद्वयमाह एतस्यवाइति क्रमेणोदाहृत्य योनिरित्यस्या

११८

आज्ञया भीतिहेतुत्वं भीषास्मादिति हि श्रुतं सर्वेश्वरत्वमेतस्य अंतर्यामित्वतः
पृथक् ८० एतस्य वा अक्षरस्य प्रशासन इति श्रुतिः अन्तः प्रविष्टः शास्ता यं जनाना
मिति च श्रुतिः ८१ जगद्योनिर्भवेदेष प्रभवाप्ययकृत्त्वतः आविर्भावतिरोभावा
वुत्पत्तिप्रलयौ मतौ ८२ ॥

र्थमाह जगद्योनिरिति प्रतिज्ञातेर्थे प्रभवाप्ययौ हि भूतानामिति वाक्यं हेतुत्वेन योजय
ति प्रभवतीति प्रभवाप्ययावुत्पत्तिप्रलयौ तत्कर्तृत्वाज्जगद्योनिरित्यर्थः उत्पत्तिप्रलयशब्द
योर्विवक्षितमर्थमाह आविर्भावेति उत्पत्तिप्रलयावाविर्भावतिरोभावौ मतावितियोज

टी
२९

ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्मै
वमिति निवर्हयति नार्थ इति सूत्रं प्रयोजनं पुरुषकारः पुरुषप्रयत्नः ननु पुरुषप्रयत्नस्या
पीश्वररूपत्वे यमयतीत्यामयतीति प्रतिपादितं तर्हि मिश्रवाग्व्यथा स्यादित्याशंक्यात तद्बोधेन
स्वात्मासंगत्वज्ञानलक्षणफलस्य सत्त्वान्मैवमिति निवर्हयति ईदृगिति ईदृग्बोधेनेशस्य पुरु

नार्थः पुरुषकारेणेत्येवं माशंक्यतां यतः । ईशः पुरुषकारस्य रूपेणापि विवर्त्तते ॥ ११ ॥ ई
दृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यताम् । तथापीशस्य बोधेन स्वात्मासंगत्वधीर्गतिः ॥ १२ ॥
तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा । श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितम् ॥ [illegible]

षकारादिरूपेणापि तस्याऽनन्तज्ञानेन प्रवृत्तिसंगत्यर्थं मिन्नरूपेणेश्वरस्यात्मनोऽसंगत्वज्ञानेनापि
किंप्रयोजनमित्यत आह तावतेति श्रुतिस्मृत्युक्तमिदं तस्यानतिलंघनीयत्वं स्मृतिं दर्शयति श्रु
तिस्मृतीइति ॥ ॥ शंकरायनमः ॥ ७२ ॥ ॥ ॥
॥ ॥ ॥

पं० २. ष० २.

नन्वेकस्यैवेश्वरस्य कथं चेतनाचेतनजगदुपादानत्वं भविष्यतीत्याशंक्योपाधिप्राधान्येनाचे
तनोपादानं विद्याप्राधान्येन चेतनोपादानत्वं भविष्यतीत्याह अचेतनानामिति ननु मायिन ई
श्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव जगद्धेत्वभिधानात्।

अचेतनानां हेतुः स्यात् जाड्यांशेनेश्वरस्तथा चिदाभासांशतस्त्वेष जीवानां कारणं भ
वेत् ८७ तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां परः कारणतामेति भावनाज्ञान
कर्मभिः ८८ इति वार्तिककारेण जडचेतनहेतुता परमात्मन एवोक्ता नेश्वरस्येति
चेन्न ८९ अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरे
श्वरः ८९.

ना

ईश्वर

इति शंकते तमःप्रधान इति तमःप्रधानस्तमोगुणप्रधानमायोपा
धिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्कारज्ञानं देवताध्याना
दि कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः तत्पदार्थ इव तत्पदार्थस्याधिष्ठानतो
पर्यायरन्योन्याध्यासस्याविवादितत्वान्नैवमिति परिहरति अन्योन्याध्यासमिति ॥

२

आविर्भावकारिणीत्वं सदृष्टान्तमुपपादयति आविर्भावयतीत्येति यथा संकुचितचित्रपटः स्वस्य
प्रसारणेन स्वनिष्ठानि चित्राण्याविर्भावयति एवमीशोऽपीत्यर्थः तस्यैव प्रत्युपकारणत्वं दर्शयति पु
नरिति स एव पटः संकुचितश्चित्राणि यथा तिरोभावयति तद्वदित्यर्थः आविर्भावतिरोभाव
योर्दृष्टान्तान्तराणि सदर्शयति रात्रिप्रस्तावेति यथोक्तः नन्वीश्वरस्य जगद्योनित्वं किमारम्भक

आविर्भावयति स्वस्मिन्विलीनं सकलं जगत्। प्राणिकर्मवशाद्देवः पटो यद्वत्प्रसारितः॥
८३ पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत्। प्राणिकर्मक्षयवशात्संकोचितपटो यथा॥
८४ रात्रिप्रस्तावसुप्तानां बुन्मीलननिमीलने। तूष्णीभावमनोराज्यकृतस्वप्नपदाविमौ॥
८५ आविर्भावतिरोभावौ शक्तिमत्त्वेन हेतुना। आरम्भपरिणामादिवादानां नात्र संभवः॥ ८६

त्वेन किं वा तदाकारपरिणामित्वेनापाद्यः अद्वितीयस्यारम्भकत्वासंभवात्। न द्वितीयः निरव
यवस्य परिणामासंभवादित्याशंक्य विवर्तवादश्रवणान्नापदेशयति परिहरति आविर्भावे
ति ॥ ॥ शिवं ८ ॥

कुतस्तर्हि ब्रह्मेश्वरयोर्भेदावगतिरित्यत आह उपक्रमादिभिरिति उपक्रमोपसंहाराव भ्यासोऽपूर्वता फलं अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इत्युक्तैः षड्विधैर्लिङ्गैः श्रुतितात्पर्यावधारणेन ब्रह्मासङ्गं मायावी सृजत्येव गम्यत इति शेषः श्रुतावुपक्रमोपसंहारैकरूप्यप्रदर्शनेनोक्तं ब्रह्मणोऽसङ्गत्वं स्पष्टयति सत्यमिति अतोऽसङ्गत्वनिर्णयोऽभवत्।

उपक्रमादिभिर्लिङ्गैस्तात्पर्यस्य विचारणात् असङ्गं ब्रह्म मायावी सृजत्येष महेश्वरः ५५ सत्यं ज्ञानमनन्तं चेत्युपक्रम्योपसंहृतम् यतो वाचो निवर्तन्त इत्यसङ्गत्वनिर्णयः ५६ मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ५७ ॥

नीतिशेषः मायाविन ईश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं प्रतिपादिकां श्रुतिमर्थतो दर्शयति मायीति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति श्रुतीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं च दर्शयतीत्यर्थः ५७ ॥ २१ ॥

ननु सत्येश्वराच्चार्थवीश्वरब्रह्मणोरन्योन्याश्रयः सिद्धवत्कृत्य चाद्धृतइति कुतो। वगम्यतइत्या शंकाश्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति सत्यमिति भवत्वेषा श्रुतिरन याकथमन्योन्याश्रयावगतिरित्यतआह आपातेति तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वं मायातत्तः प्रतीयमान

सत्यं ज्ञानमनन्तं यद्ब्रह्म तस्मात्समुत्थिताः। खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥५२॥
आपातदृष्टितस्तत्र ब्रह्मणो भाति हेतुता। हेतोश्च सत्यता तस्मादन्योन्याश्रय इष्यते ॥५२॥ अन्यो
न्याश्रयरूपोऽसावन्तर्लिङ्गः पटो यथा। चहिनेनैकतामेति न दृष्टान्तैकतां गतः ॥५३॥ मेघा
काशमहाकाशौ विविच्येते न पामरैः। तद्वद्ब्रह्मेशयोरैक्यं पश्यन्त्यापातदर्शिनः ॥५४॥

अन्योन्याश्रयमन्तरेण न घटत इति भावः एवमन्योन्याश्रयमलिङ्गमीश्वरब्रह्मणोरेकत्वं पूर्वं नोदाहृतं चहिनपटदृष्टान्तस्मरणेन दृढयति अन्योन्येति भात्यैकतापत्तेर्दृष्टान्तमभि। धायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टान्तान्तरं दर्शयति मेघाकाशेति ऐक्यं पश्यन्ति न भेदमित्यर्थः ॥५४॥

पं·द·
ष·
३१

हिरण्यगर्भस्य स्वरूपं निरूपयति सूत्रात्मेति सूत्रात्मा पटे सूत्रमिव जगत्यनुस्यूतत्वा
त्सूत्रस्वरूपं यस्य सूक्ष्मदेहस्तत्वात्मो यस्य स तथोक्तः यः सर्वजीवघनात्मकः सर्वेषां जी
वानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिस्वरूप तत्त्वहेतुः सर्वाहंमानेति स
र्वेषु व्यष्टिलिंगशरीरेष्वहं ममाभिमानवत्वादिति भावः इच्छाज्ञानक्रियाशक्तिमान् हि

सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः सर्वाहंमानधारित्वात्क्रियाज्ञाना
दिशक्तिमान् २० प्रत्यूषे वा प्रदोषे वा मग्नो मन्दे तमस्ययं लोको भाति यथा तद्व
दस्पष्टं जगदीक्ष्यते २१ सर्वतो लांछितो मष्या यथा स्याद्घट्टितः पटः सूक्ष्माका
रैस्तथेशस्य वपुः सर्वत्र लांछितं २२ ॥

रण्यगर्भावस्थायां जगत्प्रतीतौ दृष्टां
तमभियथा यथापीत इति पूर्वोक्तश्लोके अभिहितं लांछितं पदं दृष्टान्तयति सर्वत
इति यथा घट्टितः पटो मषीमयैराकारविशेषैः लांछितो भवति तथा मायिनः ईश्वरस्य
वपुः अपंचीकृतभूतकार्यैर्लिंगशरीरैः लांछितमित्यर्थः ॥ ॥ २२

॥ ॥ ॥

एवमानंदमयस्येश्वरस्य जगत्कारणत्वे श्रुतिं प्रदर्श्य तस्माज्जगदुत्पत्तिप्रकारमाह आनंद
मय इति ॥ इति वाक्ये हिरण्यगर्भरूपोऽभूदित्यन्वयः तत्र दृष्टांतमाह सृष्टिरिति तस्माद्वा एत
तस्मादात्मन आकाशः संभूतः इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्वमसृजतेति युगः
पच्छ्रवणाच्च कस्य प्रामाण्यं कस्य वा हेयत्वमित्याकांक्षायां श्रुतियुक्त्युपेतत्वादुभयं ग्राह्य

आनंदमय ईशोऽयं बहु स्यामित्यवैक्षत । हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवे
त् ॥ ५५ क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति । द्विविधश्रुतिसद्भावाद्द्विविधस्वप्न
दर्शनात् ॥ ५६ ॥

मित्याह क्रमेणेति यथा जगत्सृष्टिर्द्विविधश्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रुति
ज्ञेयेति योजना तत्रोपपत्तिर्द्विविधस्वप्नदर्शनादिति लोके क्रमयुक्तस्य वाक्रमयुक्तस्य
च स्वप्नपदार्थजातस्य दर्शनादिति भावः ॥ ५६ ॥ ॥

श्री· पं·द्र· ष· ३३

तदेवं भवतीति श्रुतिस्तन्मन्त्रजानस्तत्फलसद्भावे प्रमाणमित्याह यथायथेति नूनं स
र्वेषामीश्वराणां फलवैषम्यं ऊनत्वाधिक्याशंकाह ज्यानानामधिष्ठानानां मन्त्रजादीनामन्वादी

ईशास्तत्र विराड्देवो विष्णुरुद्रेन्द्रवह्नयः विघ्नभैरववर्गेशा मातृकायक्षराक्षसाः ॥ ६ ॥
विप्रक्षत्रियविट्शूद्रा गावोऽश्वा मृगपक्षिणः अश्वत्थवटचूताम्रयवव्रीहितृणादयः ॥
जलपाषाणमृत्काष्ठवास्यकुद्दालकादयः ईश्वराः सर्व एवैते मन्त्रजितिफलदायिनः ॥
७ यथायथाभासनेन फलमीयुस्तथा तथा फलोत्कर्षापकर्षौ तन्मन्त्रजापजानुसारतः ॥ ८ ॥

तोऽचलादिविकारादिभेदेन वैषम्यमित्याह फलोत्कर्षेति संसारिकफलेष्वेनासिद्धिरेवं
भवत्वन्त्यस्याः कस्योपासनया भवतीत्याशंक्य तज्ज्ञानमन्तिरेकेणान केनापि भवतीत्याह

३३

230

श्री॰ पं॰ द॰ ष॰ ३४

नन्वीशजीवयोर्ब्रह्माभिन्नयोः कथं जगद्धेतुत्वमित्याशंक्यानयोर्मायाकल्पितत्वेन
जगद्धेतुत्वमित्याह आनंदमयेति ताभ्यां सर्वं प्रकल्पितमित्युक्तं तत्र केन किं
यत्कल्पितमित्याकांक्षायामाह ईक्षणादीति स ईक्षत लोकान्नु सृजा इत्यादिकया
एतया द्वारा प्रापद्यतेत्यनया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका तस्य त्रयः स्वप्ना इत्यादि

आनंदमयविज्ञानमयावीश्वरजीवकौ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं ॥ १२
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ १३
अद्वितीयं ब्रह्मतत्त्वमसंगं तन्न जानते जीवेशावौपाधिकौ तौ द्वेष्येव कलहं ययुः ॥ १४

कया एतमेव पुरुषं ब्रह्म ततममपश्यदित्यनया श्रुत्या प्रतिपादितः संसारो जीवकर्तृक
इत्यर्थः ननु ब्रह्मण एव पारमार्थिकत्वेनादित्वात् जीवेश्वरतत्त्वविषया विप्रतिपत्तिः कुत
इत्याशंक्य श्रुतिसिद्धतत्त्वज्ञानस्याभावादित्याह अद्वितीयमिति ॥ ॥ ॥

तत्र दृष्टान्तमाह स्वप्नबोधमिति स्वजागरणमन्तरेण स्वनिद्राकल्पितस्वप्नमोहो यथा न निवर्तते
तथा ब्रह्मतत्त्वज्ञानमन्तरेणाज्ञानकल्पितः संसारो न निवर्तत इति भावः ननु द्वैतनि
वृत्तिलक्षणायां मुक्तौ स्वप्नदृष्टान्तेन तत्त्वबोधस्यापेक्षाभिधानमनुपपन्नं ज्ञानानि
वर्त्यस्य द्वैतस्य स्वप्नतुल्यत्वाभावादित्याशंक्यान्यथाग्रहणरूपत्वेनास्य स्वप्नतुल्य

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा । स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा १
अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत् । ईशजीवादिरूपेण चेतनाचेतनात्मकं ॥

तमस्त्येव द्वयमेतज्ज्ञात्वा तत्त्वज्ञानं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वान्नैवमित्या
ह अद्वितीयेति ईशजीवादिरूपेण वर्तमानं चेतनाचेतनात्मकं पदखिलं जग
दस्वप्नमद्वितीयब्रह्मतत्त्वे स्वप्न इति योजना ॥ ॥ ॥

पं॰ द॰
घ॰
३५

तर्हि किं कर्त्तव्यमित्याशंक्याश्रुतिविचारेणैव ब्रह्मबोध एव कर्त्तव्यः किंतु ब्रह्मेति ननु ब्रह्मतत्त्वनिश्चयोपाययोः स्वरूपहेयत्वेन ज्ञातव्यमित्याशंक्य तयोस्त्वजीवेशवादयोरेव बुद्धिर्न परिसमापनीयेत्याह पूर्वपक्षेति एतावता पूर्वपक्षतयात्तत्वनिश्चयं

तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः कार्या किंतु ब्रह्मतत्त्वं विचार्यं बुध्यतां जगत् ॥९॥ पूर्वपक्षतया तौ चेत्तत्त्वनिश्चयहेतुतां प्राप्नुतोऽस्तु निमज्जस्व तयोर्नैतावतावशः २ असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः ॥

भवेत्तयोर्जीवेशवादयोरेकदेशो विवेकज्ञानशून्यो न निमज्जस्वेति योगशास्त्रोक्तजीवेशयोः शुद्धचिद्रूपत्वेन भवद्भिरप्युपादेयत्वात्तयोः पूर्वपक्षत्वमिति शंकते असंगेति ॥ ॥

३५

232

जीवेश्वरविषयया वादिविप्रतिपत्तेर्ब्रह्मज्ञानमूलत्वेन व्यावित्थत्वं तेनैवोध्वनीयाद्युत्याशंक्य
तूष्णीम्भूतान्नेत्याह ज्ञात्वेति ईश्वरे जीवे च भ्रान्त्या विप्रतिपन्नान् वादिनो विभज्य
दर्शयति तृणेति कुतो भ्रान्तत्वं तेषामित्यत आह अद्वितीयमिति ततः किं तत्राह ते
षामिति परिगृहीतपक्षप्रतिपादनाभिनिवेशेनाचेतविमुक्त्यभावान्नेहिकमपि सुखं

ज्ञात्वा सदा तत्त्वनिष्ठामनुमोदामहे वयं अनुशोचाम एवान्यान्न भ्रान्तैर्विवदाम
हे १५ तृणार्चकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः लोकायतादिसांख्यान्ता जीवे
भ्रान्तिमाश्रिताः १६ अद्वितीयब्रह्मतत्त्वं न जानन्ति यदा तदा भ्रान्ता एवाखिलास्ते
षां क्व मुक्तिः क्वेह वा सुखं १७ उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं स्वप्नस्थरा
ज्यभिक्षाभ्यां न बुद्धिः स्पृश्यते खलु १८

तेषामित्याह क्वेह वा सुखमिति ननु तेषां ब्रह्मविद्याभावेऽपि इतरविद्याप्रफलकृत उत्त
माधमभावो दृश्यते अत उत्तमत्वप्रयुक्तं सुखं केषांचित्स्यादित्याशंक्याभ्युपगम्याभिव
नादरणीयत्वं दृष्टान्तेनाह उत्तमेति जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावान् ममक्व

पं.द.
ब:
३६

पदार्थशोधनप्रकारमेव दिदर्शयिषुस्तदुपायत्वेन पूर्वोक्तं दृष्टान्तं स्मारयति अत इति यतः पदार्थशोधने कर्तव्ये अत एव त्वंपदार्थशोधनप्रकारमाह जलेति येजलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वादपारमार्थिके तयोराधारभूतौ घटा

अत एवात्र दृष्टान्तो योग्यः प्राक्सम्यगीरितः घटाकाशमहाकाशजलाका।
शाभ्रखात्मकः २५ जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः आधारौ तु घटा।
काशमहाकाशौ सुनिर्मलौ २५ ॥

काशमहाकाशौ सुनिर्मलौ जलाभ्रोपाध्यनिरपेक्षावाकाशमात्रस्वरूपावित्यर्थः ३६
२५ ॥ ॥ ६२ ६२ ॥ ॥

233

सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः अद्वितीयत्वेपि तयोर्वास्तवभेदस्यैव नैरंतर्योक्त
त्वात्तन्न्यायमस्मत्सिद्धांतेऽन्याह आगमेनतत्त्वमोरिति तत्त्वंपदयोः क्रमशोर्थयोः अस्मत्
सिद्धांततत्त्वेनगताविति योजना ननु कूटस्थब्रह्मशबलांशयोः शुद्धांतत्त्वपदार्थयोर्भवच्छिदपि
भिन्नौ निरूपितावित्याशंक्याह अद्वैतबोधनायैवेति लोकप्रसिद्धभेदनिरासद्वा

योगोक्तस्तत्त्वमोरर्थौ शुद्धौ नाविति चेत्क्वचित् न तत्त्वमोक्रमाद्वर्थौ अस्मत्सिद्धांत
तौ गतौ अद्वैतबोधनायैव सा कदाकाचिदिष्यते २२ अनादिमायया भ्रांतौ जी
वेशौ सुविलक्षणौ मन्यंते तद्व्युदासाय केवलं शोधनं तयोः २३ ॥

गात दैक्यप्रतिपादनायैव तौ भेदेन उच्यादितौ न तत्तयोर्भेदः प्रतिपाद्यत इति भावतत्
हि पदार्थशोधनं किमर्थमित्यत आह अनादीति अत्रमायाशब्देन स्वाश्रयव्यामोह
कारिविद्यालक्षणतेनतया विपरीतज्ञानेन शास्त्रस्य कर्तृत्वादिमतं जीवस्य सर्वज्ञत्वादिगुण
गणमितरेश्वरस्य पारमार्थिकं मन्यंते अतस्तान्निवृत्त्यर्थं मे वशोधनं क्रियत इति भा

पं·द·
ष·
३१

अभिसंधिमाविःकरोति यथेति असंभवमेवास्पष्टयति अवश्यमिति फलितमाह
कोऽस्येति संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः
पुनः संगाख्यनिरतिशंकते अविवेकेति एवं सत्यपसिद्धान्तापातइतिपरिहव

॥ मायावत्प्रसंगइति ॥

यथास्रगादिनित्यत्वं दुःसंपाद्यं तथात्मनः असंगत्वं न संभाव्यं जीवतो जगदी
शयोः ३० अवश्यंप्रकृतिसंगं पुरेवापादयेत्तथा निरोद्धुमेव भीष्मोपि कौ
स्पेयादस्त्यक्ष्यामिति ३१ अविवेककृतः संगो नियमश्चेति चेत्तदा बलाद्।
पतितो मायावादः संगोऽस्य तु मते ३२ ॥

ति बलादिति अयंभावः अविवेको नाम किं मविवेकाभावो वा किंवा तदन्यद्वत
द्विरोधीनाद्यः अभावमात्रस्य भावकार्यजनकत्वायोगात् नद्वितीयः विवेकाद
न्यस्य तदादेः संगहेतुत्वादर्शनात् तृतीये तत्स्यभाववद्रूपाज्ञानत्वमेवेति मा

३१

त्वाद्योगेति कस्मादाह एवमिति ननु पदार्थद्वयशोधनं कर्त्तव्योपयोगित्वेनापि सांख्ययोगा
मतद्वयमंगीकार्यमिति चेदन्यस्यापि द्वष्टव्यत्वेन तर्हि बौद्धमपि स्वीकार्यं स्यात् नन्नु कर्त्तव्योपयो
गित्वेनास्माभिरभ्युपेयत्वादित्याह एतदिति कुतस्तर्हि सांख्ययोगयोर्वेदान्तविरोधि

एवमानन्दविज्ञानमयौ मायाधियोर्वशौ । तदधिष्ठानकूटस्थौ ब्रह्मणीति स्वनि
र्मिते २६ एतत्कर्त्तव्योपयोगेन सांख्ययोगौ मतौ यदि । देहान्नमयकर्त्तृत्वादात्मता।
नाभ्युपेयताम् २७ आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयम् । त्यज्यते तैस्तदा सां
ख्ययोगवेदान्तसंमतिः २८ जीवासंगत्वमात्रेण कृतार्था इति चेत्तदा । स्रक्चन्द
नादिनित्यत्वमात्रेणापि कृतार्थता २९ ॥

नमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरतटस्थत्वलक्षणांशत्रयं त्याज्यमित्याह आत्मभेद इति
ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधेनेत्याशंक्याद्वैतज्ञानमं
तरेणासंगत्वादिकं न संभाव्यत इत्यभिसंधिं हृदि निधायोपहासमाह जीवेति २९

पं॰ द॰
ष॰
३८

एवं जीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुपसंहरति मायाख्याया इति न
नु जीवेश्वरयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वेपि कूटस्थब्रह्मणोः पारमार्थिकत्वे
न तद्भेदोपि पारमार्थिकः स्यादित्याशंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्या
भावान्नैवमिति परिहरति कूटस्थेति नाममात्रा इ॰ द्वयोरनौपाधिकत्वेनाभेदाभा

मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ यथेच्छं पिबतां द्वैतं तत्त्वमद्वैतमेव
हि ३६ कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि घटाकाशमहाकाशौ वियु
ज्येते न हि क्वचित् ३७ यदद्वैतं श्रुतं सृष्टेः प्राक् तदेवाद्य चोपरि मुक्तावपि वृ
था माया भ्रामयत्यखिलाञ्जनान् ३८

वेदृष्टान्तं स्मारयति घटाकाशेति एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्य
त आह यदद्वैतमिति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्योपद
र्शितं ब्रह्म प्रतिपादितं तदेव कालत्रयेप्यबाध्यत्वेन वास्तवं न भेद इति भावः क
र्हि सर्वैर्भेदाभिनिवेशः क्रियत इत्यत आह वृथा मायेति तज्ज्ञानरहितत्वाद्

३

त्मैकत्वाभ्युपगमे बंधमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्त्तव्य इति चोदयति बंधमो
क्षेति एकस्यैवात्मनो मायया बंधमोक्षव्यवस्थोपपत्तेर्मैवमिति परिहरन्दर्शयति न यत इ
ति मायायिकबंधव्यवस्थोपपादितेत्याशंक्य तस्या दुर्घटत्वात्त्वमात्मेत्याह दुर्घटमि
ति बंधस्याविद्याकृतत्वेपि मोक्षो वास्तवोभ्युपगंतव्य इत्याशंक्य श्रुतिविरोधान्मैवमित्याह

मू बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यते इति चेन्न यतो मायाव्यवस्थापयितं
मू तामा ३३ दुर्घटं घटयामीति विरुद्धं किं न पश्यसि वास्तवौ बंधमोक्षौ न श्रुतिर्न्दे
मू सहते तराम् ३४ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इ।

वास्तवाविति न सहते तराम् तितिक्षां नैव सहत इत्यर्थः बंधमिव मोक्षमपि वास्तवं
न सहत इति भावः मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति न निरोध इति निरो
धो नाशः उत्पत्तिर्देहसंबंधः बद्धः सावद्यः लोदियमवान् साधकः श्रवणाद्यनुष्ठाना
मुमुक्षुः साधनचतुष्टयसंपन्नः मुक्तः निवृत्ताविद्यः इत्येतत्सर्वं वस्तुतो नास्तीत्यर्थः ॥

श्री· पं·दृ· ष· ३५

ननु किमित्याशंक्य स्वस्वनिश्चयानुसारेण फलं भवतीत्याह स्वस्वेति अर्हन्तं भानीत्तु किः धा
स्वतएव नान्यभवतो तोननन्नियस्य यऽतिशंकते नाहंतमिति अनुभवायोचरत्वमस्तिह
मितिपरिहरति नचिद्रूपेणेति यतः स्फुरति यदः स्फुरतीति यदादिश्चतु स्वतः स्फुरण
रूपेणाभानादित्यर्थः ननु चिद्रूपत्वस्यभानेपि तत्कार्त्स्न्येन न भजनीयमत इत्याशंकते अशे
षेणेति साकल्येन भानाभावोऽर्हन्तेपि समान इत्याह हन्त किमिति एवं दोषसमान

स्वस्वनिश्चयतो बद्धो मुक्तोऽहं वेति मन्यते ४१ नाहन्तमप्रथोऽन्त्वेन्न चिद्रूपेणाभासनात्
अशेषेण न भानं चेद्धन्त किं भासते शिवः ४२ दिङ्मात्रेणाविभानं तु द्वयोरपि समं भव
तु हन्तासिद्ध वदर्हन्तासिद्धिस्तेनावकाशः किं ४३ ॥

इत्याह हन्त किमिति एवं दोषसामान्यमभिधाय परिहारसामान्यमाह दिङ्मात्रेणै
कदेशेन द्वयोरर्हन्ताहंतयोरित्यर्थः एतावताकथं परिहारस्तास्यमित्याशंक्याह हन्तासिद्धि
वदिति ननु वयं तावता एकदेशप्रतीतिसद्भावेन हन्तासिद्धिवद्धन्तनिश्चयइवार्ह
न्तासिद्धिर्हन्तनिश्चयोपि किं न भवति किं तु भवत्येवेत्यर्थः ४३ ॥ ॥

२९८

ननुप्रपंचस्यमायामयत्वेनतत्स्वप्नादितुल्यत्वंचेत्पूर्वंज्ञायतेतर्हिविशेषत्वेनोक्तप्रपंचेऽतत्त्वज्ञाने
नकिंप्रयोजनमितिशंकते येवदंतीति कर्मवशात्केचिच्चिद्वद्वारेणापिएवंवदंभि
निर्विशेषाभावान्नैवइतिपरिहरति नयथेति ज्ञानिनांभ्रांत्यभावदर्शिनमज्ञानिनांश्र
यतावदाह ऐहिकेति इहलोकेभवऐहिकः पुत्रकलत्रादियोगरूपः आमुष्मि

येवदंतीत्यमेतिपिभ्रांत्यैतेविषयाविकिं नयथापूर्वमेतेषामनुभ्रांतेरदर्शनात
ऐहिकामुष्मिकः सर्वः संसारोवास्तवस्ततः नभातिनास्तिचाद्वैतमित्यज्ञानिवि
निश्चयः ४ ज्ञानिनांविपरीतोस्मान्निश्चयस्सर्वगीत्वनेः ॥

अयलोकेभवआमुष्मिकः स्वर्गस्त्रीवाद्यनुभवरूपः तत्त्वज्ञानिनिश्चयस्यततोवैलक्षण्यं
वर्णयति ज्ञानिनामिति अद्वैतेपारमार्थिकेभातिवस्संसारस्यपारमार्थिकइतिनि
श्चयस्त्वर्थः ॥ ॥ ॥

पं·८
प·
५०

परिशीलनप्रकारमेव दर्शयति अचिन्त्येति नचिन्त्या अचिन्त्या रचनारूपं यस्य तेन तथावि-
धेन सकलं जगन्मायेव निर्मितवत्यनेन प्रकारेणानिर्वचनीयत्वान्मिथ्यात्वेऽहं तस्यानिश्च-
त्यवाभ्रवमहं तेनापरिशीलनीयमित्यर्थः नन्वेवमहं तानि स्वयं कृतोपि पुनः पुनरहं तस्य

अचिन्त्यरचनारूपं मायैव सकलं जगत् इति निश्चित्य कस्मात्त्वमहं तेनापरिशीलनाम्
५६ पुनरहं तस्य वस्तुत्वं भाति चेत्तन्न यातु नः परिशीलय कोवावप्रयासस्तेन तेवद ५७

(237)

त्वत्सर्वं वासनया भातीत्याशंकानिराकरणोपपत्तिः पुनरपि मिथ्यात्वं विचारयेदित्याह पु-
नरहं तस्येति आह निरुक्तहेत्वपदेशादिति चतुर्थ्यायामात्मनः स्वरूपाज्ञानात्
तस्य विहितत्वात् व्यासेनेति भावः ५८ ॥

५

पूर्ववादी प्रकारान्तरेणा हेतावसिद्धिं शङ्कते हेतावेति अद्वैते हेतौ तद्धितत्वयोः परस्परवि
रोधात्तयास्त्विति हेतौ प्रतीतावद्वैते न संभवतीत्यर्थः ननु तर्हि तद्वैतस्याप्यद्वैते विरोधिता
द्वैते प्रतिभासमाने द्वैतस्यासिद्धिरिति चोद्यं समानमित्याशङ्क्याह पूर्ववादी विज्ञानेति
ति भवन्मते चिद्रूपप्रतीतेरद्वैतप्रतीतित्वात्तस्याश्चि विरोद्वैते विरोधित्वाभावाद्भ्रम

द्वैते न ह्यहीनमद्वैतं द्वैतज्ञाने कथं निदम् विज्ञानेत्वविरोध्यस्याद्वैतस्यातोऽसमेऽउभे ५५
एवं तर्हि स्वरूपाद्वैते नमस्तस्मायामयत्वतः तेनवास्तवमद्वैतपरिशेषाद्धि भासते ५५

यः साम्यमिभावः प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावाद्वास्तवाद्वैतविघातित्व
मतिपरिहृतमिति सिद्धान्ती एवमिति प्रसक्तप्रतिषेधेनान्यत्राप्रसंगात्क्षिप्यमाणस्य
प्रत्ययपरिशेषः ॥ ॥ राम
॥ ॥ ॥ ॥ राम

वस्तुतस्त्वतीतप्रमादेऽपि भ्रांत्या तत्प्रसक्तिः स्यादिति शंकते विरूपेति एवं तर्हि नर्थंहे
तोरध्यासस्यानिवृत्तेः ऐसदा विवेकः किं यत्नामित्याह नाध्यासमिति ग्रन्थादिवास
नावशात्पुनः पुनरध्यासागमने तन्निवृत्तये विवेक एवावर्तनीयो यावदावर्तनामित्या
हफलतीति ननु विचारेण द्वैतस्य मायामयत्वफले ऽवसिद्धे विनानुभवतद्व्यत्याशंक्या
चिन्मरचनात्वलक्षणमिथ्यात्वानुभवस्य स्वसादिकत्वान्मैवमिति परिहरति वि

चिद्रूपेऽपि प्रसक्त्यैरं स्त्रादात्म्याध्यासतो यदि माध्यासं कुरु किंतु त्वं विवेकं कुरु
सर्वदा ॥५०॥ झटित्यध्यासमायाति दृढवासनयेति चेत् आवर्तयेद्विवेकं च दृढं
वासनया मुहुः ॥५१॥ विवेके द्वैतमिथ्यात्वं युक्त्यैवेति न भण्यताम् अचिन्त्यरचनात्व
स्यानुभूतिर्हि स्वसाक्षिकी ॥५२॥ चिदप्यचिन्त्यरचना यदि तर्ह्यस्तु नो वयं चितिं सु
चिन्त्यरचनां ब्रूमो नित्यत्वकारणात् ॥५३॥ वेक्ष्यते ननु चिन्त्यरचनात्वं मिथ्या
पदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तमिति शंकते चिदपीति प्रागभावफलत्वे
सत्यचिन्त्यरचनावत्त्वं मिथ्यात्वं मिथ्यात्वलक्षणमिति विवक्षितचिन्त्यवनात्वमात्म

कियन्तं कालमित्यत्र विचारणीयमित्याशंक्यापरोक्षात्परोक्षाच्च विद्या द्वेधा विचार।
ज्ञाने तत्रापरोक्षविद्यायां विचारोऽयं समाप्यत इति विचारकस्यावधेः स्फुटत्वान्नाद्वैत
विचारे यथा वेदोक्तः किन्त्वद्वैतप्रतिभासपर्यवसायफलकत्वात् कियन्तमिति नन्वेवम्।

कियन्तं कालमिति चेत्खेदोऽयं द्वैत इष्यतां अद्वैते तु न कोऽयं सर्वानर्थनिवारणात् ४४ क्षुत्पिपासादयो दृष्टा यथापूर्वं मयीति चेत् मच्छब्दवाच्येऽहंकारे दृश्यन्तां नेति को वदेत् ४५ ॥

द्वैतात्मतत्त्वापरोक्षज्ञानवतोऽपि ममापि क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादन
र्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शंकते क्षुत्पिपासादय इति किं मच्छब्दवाच्यो
ऽहंकारे दृश्यन्त उत मल्लक्ष्ये प्रत्यगात्मनीति विकल्प्याद्यमंगीकरोति मच्छब्दवा

पं.१६.
७
४२

एवं च प्रागभावयुक्तत्वे सत्यचिन्निर्वचनात्मस्य मिथ्यात्वलक्षणस्य सङ्ग्राह्यत्वाद्धेतुर्मि
थ्यात्वे सिद्धमित्याह प्रागभावेति प्रागभावयुक्तमिति हेतुगर्भितं विशेषणं हेतुः।
प्रागभावयुक्तत्वाद्धटादिवद्वृत्त्यनेहितथापि वर्तमानत्वेपि तस्य रचनात्वेनानव
वर्तमानत्वेपि तस्य सत्यचिन्मात्रवचनात्वेनेन्द्रजालवदैन्द्रजालिकप्रासादादिवन्मिथ्या

प्रागभावयुक्तत्वे हेतौ रज्ज्वादौ हि घटादिवत् तथापि रचनात्वेन मिथ्यात्वेनेन्द्रजा-
लवत् ५५ चिन्मात्रत्वात्तस्य मिथ्यात्वं वानुभूयते नाहं तमपरोक्षं चेतेत।
तस्माद्धेतुः कथम् ५६ न्यर्थः चितिस्वात्मप्रकाशत्वेन नित्यापरोक्षत्वादस्मा-
स्मै विद्युतिरिक्तस्य मिथ्यात्वं तथैव विनानुभूयत इति दर्शितं एवं च सत्यहं।
तस्यापरोक्षं नास्तीति वदतो व्याघातस्तु स्यादित्याह चिन्मात्रत्वेति चिद्रूपत्वाभा-
स्वनादित्यभिन्नफलकिस्य च यथार्थत्वात् सर्वाहं तमपरोक्षोनेत्येतत्कथं न व्याहत-
त्वेनेति योजना ॥ ॥ ॥

२३९

चितेर्नित्यत्वं कुत इत्याशंक्य प्रागभावाननुभवाभावादित्याह प्रागभाव इति यत
श्चितेः प्रागभावो नानुभूतस्ततो नित्येति योजना इदमत्राकूतं चितेः प्रागभावोऽस्तीति
वदन्प्रष्टव्यः चित्प्रागभावः किं चितानुभूत उतान्येन नान्येन तस्य तदन्यस्य जडत्वेनानु
भवितृत्वानुपपत्तेः चितानुभूयत इत्यपि पक्षे किं चिदन्तरेणोत स्वेनैव वा आद्ये द्वैतवाद
चिदन्तरस्यैवाभावात् तत्स्वीकारे चित्प्रतियोगिकस्याभावस्य चिद्ग्रहणमन्तरेणाग्र।

प्रागभावो नानुभूतश्चितेर्नित्या ततश्चितेः । द्वैतस्य प्रागभावस्तु चैतन्येनानुभूयते ॥ ५४ ॥

गृहीतमशक्यत्वात् स्वस्याप्रियप्रमाणत्वेन घटादिवद्‌चित्यापत्तेः नापि द्वि
तीयः स्वाभावस्य स्वेन गृहीतुमशक्यत्वादिति ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात्तदभा
वस्य चेतनेनैवानुभवितुमशक्यत्वात्तन्मध्ये च तत्प्रागभावानुचैतन्नेव द्वैतस्यापि नित्य
त्वापत्तिरित्याशंक्यानुभवितुं शक्यत्वात्प्रागभावोऽस्तीत्यतः परिहरति द्वैतस्येति जाग्रदादिद्वैता
भावस्य सुषुप्तौ साक्षिणानुभूयमानत्वात्तत्समयः साक्षी सर्वस्य साक्षीति स्वतेस्यतिभा

पं.द.
५.
४६

मर्त्यः पूर्वं देहतादात्म्याध्यासेन मरणशीलः पुरुषः अमृतः अध्यासाभावेन त
द्रहितो भवति तत्र हेतुमाह अत्र ब्रह्म समश्नुत इति अत्रास्मिन्नेव देहे ब्रह्म सत्या
दिलक्षणं समश्नुते सम्यगाप्नोति तस्याः श्रुतेरर्थः श्रुत्या इति पादेन फलं का
मानैः सत्यादिलक्षणं नाम भवति स्रेह्वाकिं तस्य आहमेवेति शंकते इति श्रोतमिति स

इति श्रोतं फलं दृष्टं नेति चेद्दृष्टमेवतत् ॥५४॥ यदा सर्वे प्रभिद्यन्ते हृदयग्रंथ
यस्त्विति कामाग्रंथिस्वरूपं व्याख्यातावाक्यशेषतः ६ ॥

मनंतरं श्रुतिवाक्यतात्पर्यालोचनया तस्य दृष्टत्वं सिध्यतीत्यभिप्रायेणापरिह
रति दृष्टमेवतदिति तस्य दृष्टत्वस्पष्टीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमा
ह यदा सर्वे इति अनेन वाक्यशेषेण कामप्रमोचकस्य ग्रंथिभेदकत्वेन व्याख्या
तत्वाद्ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभ

240

एवं वेदान्तार्थज्ञानवतामपि पुरुषाणां केषांचिद्विषयस्पृहः कुतो मज्जायत इति पृ
च्छति इत्थमिति सम्यग्विचारशून्यत्वादिति विवक्षुः श्रुतिवेदीत्यादि चार्वाकादे
रिति आदिशब्देन यामरागान्तेन प्रबुद्धस्याहारादौ कुशलस्य प्रतिवेदीमोचनेशंक
ते सम्यगिति सामेन समाधत्ते न चेति धीदोषादित्यनुवक्ष्यमाणतत्त्वशब्दूषणवशब्दार्थः

इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुत इतीर्यतां चार्वाकादेः प्रबुद्धस्याप्यात्मा देहः
कुतो वद ५७ सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा असंतुष्टास्तु शास्त्रा
र्थं न तैर्दृष्टं विशेषतः ५८ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ॥

इत्यन्तेन विचार्यमाणेन तत्त्वज्ञानफलं विचारयितुं तत्प्रतिपादिकां श्रुतिं पठति
यदेति अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मंत्रस्योत्तरार्द्धं अस्यार्थः अस्य
विदुषो हृदि श्रिता ये कामाः कामास्तादात्म्याध्यासमूला इच्छादयः संति ते सर्वे यदा य
स्मिन् काले प्रमुच्यन्ते तत्त्वज्ञानेनाध्यासनिवृत्तौ निवर्तन्ते अथ तदानीमेव ॥

पं.द.
ष.
४४

अध्यासाभावेऽहंकारगतेच्छादेर्बाधकत्वे दृष्टान्तमाहप्रदर्शनेन विशदयति
अहंकारेति यथा देहगतव्याध्यादिभिरहंकारस्यादिनो बाधो नास्ति देहसंबंधर
हितत्वात् यथा वृक्षादिगतैर्जन्मादिभिरेवमध्यासरहितत्वादहंकारगतेच्छादिभि
रपीति भावः चिदात्मनोऽसंगत्वस्यैकरूपत्वान्नित्यत्वमपि कामादिभिर्बाधो नास्ती

अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा वृक्षादिजन्मनाशैर्वा चिद्रूपा
त्मनि किं भवेत् ४४ ग्रन्थिभेदात्पुराप्येवमिति चेत्तन्न विस्मर अयमेव ग्रन्थिभे
दस्तव तेन कृती भवान् ४५ नैवं जानन्ति मूढाश्चेत्सोऽयं ग्रन्थिर्न चापरः ग्रन्थित
द्भेदमात्रेण वैषम्यं मूढबुद्धयोः ४६ ॥

न

241

शंकते ग्रन्थिभेदादिति पूर्वं विषयबोध
स्यैव ग्रन्थिभेदत्वेनास्माभिरभिधीयमानत्वादिदं बोधमस्मदनुकूलमित्या
ह तन्न विस्मरेति पूर्वं विषयज्ञानाभावः एव ग्रन्थिरित्याह नैवमिति नन्वज्ञानि
नोऽपीच्छाद्युपगमे ज्ञानिनः कुतो वैलक्षण्यमित्याशंक्य ग्रन्थिभेदातिरेकेणान्य
कुतोऽपीत्याह ग्रन्थितद्भेदेति ॥ ॥

४४

ननुलोकेकामशब्देनेच्छाभेदएवोच्यतेऽतः कथंतस्यग्रंथित्वेनव्याख्यानमित्या
शंक्याध्याससमूलस्यैवेच्छाविशेषस्यकामशब्दवाच्यत्वंनेच्छामात्रस्येत्याह अहंका
रेति ननु अध्याससमूलस्यैवकामस्यात्यागेऽपितत्त्वविदोऽभ्युपेतत्वात्कःस्यादित्याशंक्याह अथ

अहंकारचिदात्मानावेकीकृत्याविवेकतः । इदंमेस्यादिदंमेस्यादितीच्छाः
कामशब्दिताः । अप्रवेश्यचिदात्मानंपृथक्पश्यन्नहंकृतिं । इच्छंस्तुकोटिव
स्तूनिनबाधोग्रंथिभेदतः ॥ ९१ ॥ ग्रंथिभेदेपिसंभाव्याइच्छाःप्रारब्धदोषतः ।
बुध्वापिपापबाहुल्यादसंतोषोयथातव ॥ ९२ ॥

कृत्वाद्यभ्युपेयतत्पूर्वज्ञात्वा
ह अप्रवेश्येति अहंकारेचिदात्मानमप्रवेश्यतादात्म्याध्यासेनात्मभावेनत्वर्थः
ननु अध्यासाभावेकामानामनुदयप्रसंगःस्यादित्याशंक्यारब्धकर्मवशात्तेषांका
मानामुत्पत्तिःसंभवतीत्याह ग्रंथिभेदेपीति तत्रदृष्टांतमाह बुध्वापीति ॥

कारणान्तराभावमेव विशदयति प्रवृत्ताविति उक्तार्थे दृष्टान्तमाह भ्रान्तेति ज्ञानिनोऽपि
शिष्टत्वे गीतावाक्यं प्रमाणयति न द्वेष्टीति संप्रवृत्तानि प्राप्तानि दुःखानि न द्वेष्टि निवृ
त्तानि सुखानि न कांक्षति उदासीनवदित्येतदुक्तमर्थः ग्रंथिभिदो ग्रंथिभेदः इदं वाक्य

प्रवृत्तौ वा निवृत्तौ वा देहेन्द्रियमनोधियां न किंचिदपि वैषम्यमस्त्यतो निर्विकल्पयोः ६
भ्रान्तज्ञयोर्यतो देहकृतानामविशेषतः नाहंकारस्य वासिभेदः सोऽयं प्राग्यो निरूपितः ७
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति उदासीनवदासीन इति ग्रंथिभिदुच्यते ६
औदासीन्यं विधेयं चेद्वच्छब्दव्यर्थता तदा न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ८

मौदासीन्यविधिपरं तत्तु ग्रंथिभेदप्रमाणमिति शंकते औदासीन्यमिति विधेय
त्वे वच्छब्दो व्यर्थः स्यादिति परिहरति वच्छब्देति ज्ञानिनो देहादेः कार्यमतत्वात्
प्रवृत्तिनैव ग्रंथिभेदादित्याशंक्याह न शक्ता इति ॥ ॥

वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनादभेदाशंकायां तद्धेत्वादीनां
भेदाद्बोद्धव्य इत्याह हेतुस्वरूपेति तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति दो
षदृष्टिरिति इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति श्रवणादीनि आदि

हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः यथावदवगन्तव्यः शास्त्रार्थं प्रवि
विच्यता २७ दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता असाधारणहेत्वाद्या वै
राग्यस्य त्रयोऽप्यमी २८ श्रवणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं पुनर्ग्रन्थेरनु
दयो बोधस्यैते त्रयो मता २९ ॥

243

हेतुर्मननं निदिध्यासनेन गृह्यते आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासि
तव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानात् स्वरूपमाह ज्ञानहेतुत्वं तत्त्वमि
थ्याविवेचनं कार्यमाह कामादेस्त्रभेदज्ञानग्रंथेरनुदयोऽन्योन्याध्यासानुस

संगोपि कुतस्त्याज्यत इत्यत आह संगीति ननु तर्हि मा भूत्संगस्यैव त्याज्यत्वेन संग
शून्यानां हि व्यवहरतामज्ञानादिकं जनैः कथमुच्यत इत्याशंक्याशास्त्रतात्पर्यज्ञान
शून्यतादित्याह अज्ञानेनेति अतो मूढत्वव्यवहारो नात्र विचारणीय इत्याह मूर्खाणामि

संगी हि बाध्यते लोके निःसंगः सुखमश्नुते तेन संगः परित्याज्यः सर्वदा सुखमि
च्छता २४ अज्ञानात्मस्व हृदयं मूढानां वक्त्रमन्यथान्यथा मूर्खाणां निगदस्त्वास्तां म
स्मिन्सिद्धान्त उच्यते २५ वैराग्यबोधौ परमौ सहायौ स्तः परस्परं प्रायेण सह वर्तेते
वियुज्येते क्वचित्क्वचित २६ ॥

ति तर्हि किमत्र संगेयमित्याकांक्षायां शास्त्रहृदयमित्याह अस्मिन्सिद्धान्त इति को
सावित्यत आह वैराग्येति ॥ ॥

पं. द.
पं.
१

ॐ श्रीगणपतये नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ महावाक्यविवेकस्य कुर्वे
व्याख्यां समासतः १ समस्तोपनिषत्सारं ब्रह्मात्मैकत्वावगतिसिद्धानां चतुर्णां महावा-
क्यानामर्थं क्रमेण निरूपयन् परमकृपालुराचार्यः आदौ तावदैतरेयारण्यकगतं प्रज्ञा-
नं ब्रह्मेति महावाक्ये प्रज्ञानशब्दस्यार्थमाह येनेक्षत इति येन चक्षुर्द्वारनिर्गतान्तःकरण-
परिणतचैतन्येन इदं दृश्यं नीलपीतादिरूपादिकमीक्षते पश्यति शृणोतीत्यत्र श्रोत्रद्वारनिर्गता-
न्तःकरणवृत्त्युपाधिकेन येन शब्दजातं शृणोति येन च घ्राणद्वारनिर्गतान्तःकरणवृत्त्युपा-

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितं १

धिकेन येन गंधजातं जिघ्रति येन वागिंद्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति ये-
न रसनेंद्रियद्वारनिर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वादुरसौ विजानाति तत्सम्यग्या-
र्थं स्वशब्दः तथा चोक्तानां सकलेंद्रियैरंतःकरणवृत्तिभेदैरुपलक्षितं यच्चैतन्यम-
लिंगदेहावच्छिन्नं तत्प्रज्ञानमित्युच्यत इत्यर्थः अनेन येन वा पश्यतीत्यादि सर्वाण्येतानि प्र-
ज्ञानस्य नामधेयानीत्यन्तस्याऽर्थोऽनेकवाक्यसमूहसंदर्भस्यायं संक्षिप्य दर्शितः १ ॥

244

पं॰ द॰
पं॰
२

एवंऋक्शाखागतमहावाक्यार्थंनिरूप्ययजुःशाखास्थमाध्येबृहदारण्यकोपनिषद्गतस्याहं
ब्रह्मास्मीतिमहावाक्यस्यार्थोऽविष्करणायाऽहशाखास्थस्यार्थमाह परिपूर्णइति परिपू
र्णःस्वभावतोदेशकालवस्तुभिःऽपरिच्छिन्नःपरमात्मास्मिन्मायाकल्पितेजगतिविद्या

परिपूर्णःपरात्मास्मिन्देहेविद्याधिकारिणि बुद्धेः
साक्षितयास्थित्वास्फुरन्नऽहमितीर्यते ३ ॥ ॥

245.

धिकारिणिशमादिसाधनसंपन्नत्वेनविद्यासंपादनयोग्येऽस्मिन्कृतवर्णाद्यनुष्ठानवति देहेम
नुष्यादिशरीरेबुद्धेर्बुद्ध्युपलक्षितस्यसूक्ष्मशरीरस्यसाक्षितयाऽविकारित्वेनाऽवभासकतया
स्थित्वावस्थायस्फुरन्प्रकाशमानोऽहमितीर्यतेलक्षणयाहंपदेनोच्यतेइत्यर्थः ३ ॥ ॥

२

एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दस्यार्थमाह चतुर्मुखेति उक्तमेव देवादिषु मध्य
मेषु मनुष्येषु अधमेष्वश्वगवादिषु देहेष्वपि तथा आकाशादिषु भूतेषु च जगज्जन्मस्थित्यादि
हेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः अनेन च पदपदार्थौ वद अनेन च पदपदार्थौ

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु चैतन्यमे
कं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि २ ॥ ॥

दृश्यादेः प्रज्ञाप्रतिष्ठेत्यनेन स्वात्मवाच्यार्थः संक्षिप्य दर्शितः इत्यपदार्थमभिधा
य वाक्यार्थमाह मय्यपीति यतः सर्वेषां दृश्यानां प्रज्ञानं ब्रह्मातो मय्यपि स्थितं
प्रज्ञानं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः २ ॥

पं. ८. पं. २

त्वंपदस्यार्थमाह श्रोतुरिति श्रवणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तुर्देहेन्द्रियातीतं देहेन्द्रियो-
पलक्षितं स्थूलादिशरीरत्रयसाक्षितया तद्विलक्षणमहं त्वंपदेरितं तेन वाक्यानेन त्वमिति
पदेन लक्षितमित्यर्थः एतद्वाक्यस्थेनासीतिपदेन तत्त्वंपदसमानाधिकरण्यलब्धपदार्थ-
द्वयैक्यं शिष्यं प्रत्याय्यत इत्याह एकतेति सिद्धमर्थमाह तदैक्यमिति तयोस्तत्त्वंपदार्थयोरैक्यं
प्रमाणसिद्धमेकत्वमनुभूयतां मुमुक्षुभिरित्यर्थः क्रमप्राप्तस्यार्थवादगतस्याय

श्रोतृदेहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् एकताग्राह्यतेऽसीति तदैक्यमनुभूयतां ६ स्वप्र।
काशाऽपरोक्षत्वमयमित्युक्तितो मतम् अहङ्कारादिदेहान्तात्प्रत्यगात्मेति गीयते ७

मात्मा ब्रह्मेति वाक्यस्यार्थमाविष्कीर्षुरादावयमात्मेति पदद्वयेन विवक्षितमर्थं
क्रमेण दर्शयति स्वप्रकाशेति अयमित्युक्तितोऽयमिति शब्देन स्वप्रकाशाप
रोक्षत्वं स्वयंप्रकाशत्वेनाऽपरोक्षत्वमतमभिमतं अहङ्कारादिवत्तिस्यपरोक्षत्वं। २
वयदिवक्षितं च व्यावर्तयितुं ॥ विशेषणमाह अयमिति वाहङ्कारादेहादि

पं॰ द॰
स॰
२५

शून्यस्यैव तद्रूपतेः प्रतीयमानत्वाज्जगतः कारणमित्यत आह ज्ञानेति तदेतन्मतं दू-
षयति निरधिष्ठानेति निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्र-
मस्यानुपपत्तेर्जगत्कल्पनाधिष्ठानस्यात्मनः सत्त्वाभ्युपगन्तव्यात्किं च शून्यवादिना-
पि शून्यस्यात्मत्वेन तावदवश्यमात्माभ्युपगन्तव्यः अन्यथा तस्यानभ्युपगमे शून्यस्याक्तिः

ज्ञानज्ञेयात्मकं सर्वं जगज्ज्ञातिप्रकल्पितं २५ निरधिष्ठानविभ्रान्तिरभावादात्म-
नास्तिता शून्यस्यापि समास्तित्वादन्यथा नोक्तिवस्य ते २६ अन्यो विज्ञानमयत
आनन्दमय आन्तरः अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनम् २७ अणुमहान्म-
ध्यमो वेत्येवं तत्रापि वादिनः बहुधा विवदन्ते हि श्रुतियुक्तिसमाश्रयात् २८ ॥

शून्यमित्यभिधानं तेनैवेष्यत एवमतेनास्तित्वसिद्धिरिति भावः कृत्स्नसिद्धान्तमत आह।
अन्य इति तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्मानन्दमयः अस्तीत्येवोप
लब्धव्यस्तत्त्वभावेनेति च श्रुतिसिद्धानन्दमयस्यात्मनोऽभ्युपगन्तव्य इति वैदिक
दर्शने वैदिकसिद्धान्त एवमात्मस्वरूपविप्रतिपद्यमानविशेषविवादि

५

तदेवोपपादयति अविद्येति अहंकारस्य दृश्याभावे ऽहंकारस्य नदृश्यादन्ययोः कार्यकारण।
भाव इत्यर्थः तस्य विज्ञानस्य लक्षणिकत्वे ऽनुभवं प्रमाणयति लोणलोण इति लाक्षणिक
स्य स्वप्रकाशत्वमुपपादयति स्वप्रकाशस्वलक्षणितैः स्वेनैव प्रमितत्वादित्यर्थः विज्ञा
नस्यात्मत्वे आगमः प्रमाणमित्याह विज्ञानमयेति तस्मादेतस्मादन्नमयात्

अविदित्वात्मात्मानेवाहं देवेति न तत्फलविज्ञ लोपलोपजन्मनाशाद् दृष्टनिमित्तोयतः
विज्ञानलक्षणिकेतेन स्वप्रकाशस्वलक्षणिते ७२ विज्ञानमयकोशोऽयं जीव इत्यागमा
जगुः सर्वसंसारएतस्य जन्मनाशसुखादिकः ७३ विज्ञाने लाक्षणिके नात्मा विशुद्धस्व
नि भवेत् अन्यस्तदुपलब्ध्यात्मा स्फुरन्नमयादिकाजगुः ७४ असदेव इदमित्यादिविद्मे
वस्तुततः ॥

अन्योन्तरस्मादात्मा चिन्मयः विज्ञानमयस्ततान्तरतद्ध्यादिवाक्यं विज्ञान
स्यात्मत्वप्रतिपादकमिति भावः बाह्यस्यान्तरमेदस्पष्टत्वबादिनो मतं दर्शयति विज्ञा।
नमिति तत्र श्रुतिमाह असदेवेदमिति ७५ ॥ ॥ ॥
ॐ ॥ ॥ ॥

पं॰ ८॰
स्व॰
१६

सूक्ष्मनाडीति यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशात्स
हस्तावयवानां सूक्ष्माणां नाडीभ्रप्रचारेणात्मनोपि प्रचारः स्यादयमर्थः तथात्म
नो नियतमध्यमपरिमाणत्वेकमेव शरीरं न्यूनाधिकशरीरप्रवेशेन न घटते तदूनाधिकाः स्व
वागमाऽत्तायाभ्यामात्मनो नियतमध्यमपरिमाणत्वे देहवदवयवनविरुद्धत इत्याह

सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत् स्थूलदेहस्य हस्ताभ्यां कंचुकस्तनिमोकवत्
८२ न्यूनाऽधिकशरीरेषु प्रवेशोऽपि समागमैः स्यादंशानां भवेतेन मध्यमत्वं स्थितिः।
स्थिते ८६ सांशस्य घटवन्नाशो भवत्येव तथापि हि कृतनाशाकृताभ्यागमयोः कोवा
दको भवेत् ८५

अंशाधिकेति फलितमाह तेनेति आत्मनः सावयवत्वे घटादिवद
नित्यत्वप्रसंगेन तद्दूषयति सांशस्येति भवतु को दोषस्तत्राह तथापीति कृत
योः पुण्यपापयोर्भोगमन्तरेणानाशः अकृतयोस्तत्कर्मफलदातृत्वमकृताभ्यागमः
एतद्दोषद्वयमात्मनोऽनित्यत्वाऽभ्युपगमे भवेदिति भावः, ८५ ॥ ॥ ॥

248

अत्राणुत्ववादिनस्तावद्दर्शयति अणुरिति अणुत्वाभिधानहेतुमाह सूक्ष्मेति तदुप
पादयति रोमाग्र इति नाडीष्विति शेषः सूक्ष्मासु नाडीषु संचारोऽणुत्वमन्तरेण न घटत इ
त्यभिप्रायः अणुत्वे किं प्रमाणमित्यत आह अणोरणीयानिति अणोः अणीयान्महतो।
महीयानेषो ऽणुरात्मा चेतसा वेदितव्यः सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादि श्रुतय इत्यर्थः

अणुं वदन्त्यन्तरात्मा सूक्ष्मनाडीप्रचारतः रोमाग्रसहस्रभागेन तुल्यः प्रचरत्ययं ७९
अणोरणीयानेषोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति अणुत्वमाहुः श्रुतयः प्रतिशायसहस्रशः ८०
वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इति चाह परा श्रुतिः ८१
दिगंबरा मध्यमत्वमाहुरापादमस्तकं चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ८२

श्रुत्यन्तरमुदाहरति वालाग्रेति मध्यमपरिमाणवादिनो दर्शयति दिगंबरा इति तन्नो
पपत्तिमाह आपादेति सपदशदृष्टिप्रविष्टस्य नखाग्र इति श्रुतिरपि तत्र प्रमाणमित्याह
आनखाग्रेति ननु मध्यमपरिमाणत्वे श्रुतिसिद्धो नाडीप्रचारो न घटत इत्याशंका
ह ८२ ॥ ॥ ॥

पं·द·
स·
८

तस्यैव विशेषगुणान्तराण्याह इच्छेति तत्संस्कारो भावनाः एतेषां गुणानां जन्यानि नाश
कारणमाह आत्मन इति स्याऽदृष्टवशात् आत्मनो मनसा संयोगोऽत्यन्वयः आत्मनो
विभुत्वे कथं चेतनताऽसमवायिकत्वाशंकायां चितिमत्वादित्याह चितिमत्वादिति
आत्मनः चेतनत्वे हेतुमाह इच्छेति तस्यैवाह द्वेषरूपमाह स्यादिति तत्त्वा।

इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ तथात्मनि तत्संस्कारश्च तस्यैते गुणाश्चित्तिविदीरि
ता ५५ आत्मनो मनसा योगोऽदृष्टवशात्ततो गुणाः जायन्ते यत्नतो देहस्तत्पुनर्देह
सञ्चयात् ५६ चितिमत्वाच्चेतनोऽयमिच्छाद्वेषप्रयत्नवान् स्याद्धर्माधर्मयोः कर्ता भोक्ता
दुःखादिमान् ततः ५७ यथात्र कर्मवशतः कादाचित्कं सुखादिकं तथा लोकान्तरे देह
कर्मणोच्छादि जन्यते ५८

त्मनो विभुत्वे लोकान्तरगमनादिकं कथं घटेदित्याशंका।
भिन्नदेहे कर्मवशादिच्छाद्युत्पत्तौ तस्यात्मनो गमनादिव्यवहार इव कर्मवशात्
लोकान्तरे देहान्तरोत्पत्तौ तदवच्छिन्नात्मप्रदेशे सुखाद्युत्पत्तिवशात्तत्रात्मनो गमनादि
व्यवहारस्त्वौपचारिक आत्मनो गमनादिकमित्यभिप्रेत्याह यथात्र कर्मवशत इ ति ८

२५७

अतः परिशेषादात्मनो विभुत्वं सिद्धमित्याह तस्मादिति तत्र प्रमाणमिति आकाशव-
दिति आकाशवत्सर्वगतश्च नित्यः निष्कलो निष्क्रिय इत्यागमः प्रमाणमित्यर्थः एवमा-
त्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वे निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति स्वकेति
अचिद्रूपत्ववादिनो दर्शयति प्रभाकर इति तत्र क्रियामनुभाषते आकाशवद्व्य

तस्मादात्मा महांश्चैव नैवाणुर्नापि मध्यमः आकाशवत्सर्वगतो निरंशः श्रुतिसम्मतः
